आजादी का अमृत महोत्सव

आजादी का अमृत महोत्सव अनुवादप्रकल्प ग्रंथावली – 5

पारस्करगृह्यसूत्र

अनुवादक

डॉ. अमित भार्गव

प्रधान संपादक

कुलगुरू,

कुलगुरू, क.का.सं.वि., रामटेक

संपादक

प्रो. कृष्णकुमार पाण्डेय

संचालक, संशोधन व प्रकाशन विभाग

राष्ट्रहिताय संस्कृतम्

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

राष्ट्रीय मूल्यांकन व प्रत्यायन परिषदद्वारा (NAAC) A+ श्रेणी प्राप्त

२०२५

शीर्षक - **पारस्करगृह्यसूत्र**

अनुवादक - **डॉ. अमित भार्गव**

प्रधान संपादक - **कुलगुरू,**
क.का.सं.वि., रामटेक

संपादक - **प्रो. कृष्णकुमार पाण्डेय**
संचालक, संशोधन व प्रकाशन विभाग

आजादी का अमृत महोत्सव अनुवाद प्रकल्प समिती

1. डॉ. मधुसूदन पेन्ना - अध्यक्ष
2. प्रा. नंदा पुरी - सदस्य
3. प्रा. कृष्णकुमार पाण्डेय - सदस्य
4. प्रा. ललिता चंद्रात्रे - सदस्य
5. प्रा. हरेकृष्ण अगस्ती - सदस्य
6. प्रा. कविता होले - सदस्य
7. प्रा. प्रसाद गोखले - सदस्य
8. प्रा. पराग जोशी - सदस्य

© (Copyright with Publisher)

प्रकाशक - कुलसचिव, क.का.सं.वि., रामटेक ४४११०६

प्रकाशन वर्ष - २०२५

आवृत्ती - प्रथम

आय.एस.बी.एन. - ९७८-८१-१९२२७-९८-३

मूल्य - ३००.००

मुखपृष्ठ - श्री. उमेश पाटील

मुद्रक - मे. लाभ प्रिंट अँड पब्लिकेशन, नागपूर

The Kavikulaguru Kalidas University does not hold any responsibility regarding the content, language, originality, plagiarism or views expressed by the author of this book. The respective author is solely responsible.

प्रस्तावना

1. गृह्यसूत्राणां परिचयः –

गृह्यसूत्राणां सम्बन्धो मुख्यरूपेण भारतीयार्यजनानां गृहस्थजीवनेन सह वर्तते, अतः गृह्याग्निसाध्ययागानां विस्तृतं विवेचनं गृह्यसूत्रेषु लभ्यते । गृह्यसूत्राणि गृहस्थं जनमनुलक्ष्य प्रवृत्तानि गार्हस्थानि कर्माणि प्रतिपादयन्ति। एषु गर्भाधानपुंसवनसीमन्तोन्नयनादि विवाहमध्याश्वरकर्मान्ताः मानवस्य कृत्स्नेऽपि जीवने क्रियमाणाः संस्काराः सन्ति। औपासनहोमादयो सम्पूर्णस्य वत्सस्य विशिष्टेषु कालेषु प्रत्यक्षं च क्रियमाणाः सप्तपाकयज्ञसंस्थाः, नैमित्तिकानि च गृहप्रवेशवास्त्वन्नग्रहणादि कर्माणि, शान्तिकर्माणि, पुष्टिपालकानि कर्माणि स्वरक्षोपयोगीनि अभिचारकर्माणि, किं बहुना राजकर्मादीनि तत्तद्वर्गविशेषणो-पादेयानि,जीवनोपकारकाण्यदृष्टोत्पादकानि, प्रतिष्ठाजननानि,मानवस्य सर्वतोभावेनाभ्युन्नतिकराणि कर्माणि च उपदिष्टानि सन्ति । अतः गृह्यसूत्रं भारतीयवैदिकसंस्कृतेः सभ्यतायाश्च परिचायकग्रन्थम् अङ्गीक्रियते ।

2. गृह्यसूत्रेषुवर्ण्यविषयाः

शास्त्रदृष्ट्या संस्काराः गृह्यसूत्राणां विषयक्षेत्रान्तर्गतमायान्ति । किन्तु अत्रापि संस्कारशब्दस्य प्रयोगः तस्य वास्तविकार्थे नैवोपलभ्यते। गृह्यसूत्रकाराः मीमांसकानां सम्मतार्थे एव संस्कारशब्दस्य प्रयोगं कुर्वन्ति तथा च पंचभूसंस्काराश्चोल्लिखन्ति गृह्यसूत्रकाले सामाजिकमनोविज्ञाने यज्ञानां विशेषः प्रभाव आसीत् । अतस्ते समस्तानां गृह्यविधिविधानानां वर्गीकरणम्, विविधानां यज्ञानामान्तर्गतं चक्रुः दैहिकसंस्काराणां गणना पाकयज्ञेषु आसीत् । पारस्करगृह्यसूत्रे पाकयज्ञकर्माणि हुताहुतप्रहुतप्राशितादि - क्रमचतुष्टये गृह्यन्ते । बौधायनगृह्यसूत्रे पाकयज्ञकर्माणि सप्तधा वर्णितानि, तानि च हुतः, प्रहुतः, आहुतः, शुलगवः, बलिहरणम् प्रत्यावरोहणम् अष्टकाहोमादिनामानि सन्ति ।

वैखानसस्मार्तसूत्रेषु दैहिकसंस्कारेषु तथा च विभिन्नावसरेषु देवार्चनार्थं क्रियमाणेषु यज्ञकर्मसु सुस्पष्टो भेदः । एतेषु गर्भाधानातद् विवाहपर्यन्तं अष्टादशसंस्कारक्रमः प्राप्यन्ते-शारीर -, एतदतरिक्ताः द्वाविंशयज्ञाः अपि सन्ति ।

गृह्यसूत्राणि साधारणतया विवाहतः आरभ्य समावर्तनपर्यन्तं दैहिक - संस्कारकर्म्माणि निरूपयन्ति । तेषु च अधिकांशतः अन्त्येष्टिकर्माणि न सामान्यतया अन्त्येष्टिसंस्कारं वर्णयन्ति ।

3. पारस्करगृह्यसूत्रस्य-परिचयः

शुक्लयजुर्वेदस्य माध्यन्दिनीशाखायाः एकमेवगृह्यसूत्र पारस्करगृह्यसूत्रम् । इदं शुक्लयजुर्वेदस्य वाजसनेयकाण्वशाखयोः प्रतिनिधिबं करोति अतः - वाजसनेयगृह्यसूत्रम् इति नाम्नापि अभिधीयते ।

गृह्यशब्दस्यार्थो योगरूढतया गृह्याय गृहस्थाश्रमहिताय च प्ररिगृह्यते । खादिरगृह्यसूत्रस्योदाहरणेन तथ्यमिदं स्पष्टीभवति यत् "यस्मिन्नग्नौ पाणिं गृह्णीयात् स गृह्यः ।'

वस्तुतः गृह्योपासनावसथ्यश्च गृह्यशब्दस्य पर्यायमात्रः । अतः स्मार्ताग्नेः संज्ञा गृह्योपासनावसथ्याश्चेति सन्ति । तथ्यमिदं पारस्करगृह्यसूत्राणां प्रयोगेश्चापि सुस्पष्टतया दृष्टुं शक्यते । "गृह्यस्थालीपाकानां कर्म ॥१॥ आवसथ्याधानम् ॥२॥ औपासनस्य परिचरणम् ॥३॥

इत्थं गृह्याग्नौ जायमानानि कर्माणि गृह्याणि प्रोच्यन्ते । तेषां कर्मणां संक्षेपतः प्रतिपादनमेव गृह्यसूत्रं भवति । यथा गोभिलापस्तम्बप्रभृतिभः महर्षिभिः स्वनामाङ्कितानि गृह्यसूत्राणि निबद्धानि । तथैवाचार्येण पारस्करेणापि एकं गृह्यसूत्रं प्रणीतम् ।

युगान्यावत् कृतेन निरीक्षरेणेन अनुभवेन त्रुटिभिः विश्वासैश्च भारतीयैः एतदनुभूतं यदिह जगतौ कलान्तरमिव जीवनमपि एका कला वर्त्तते तदर्थं

संस्काराः परिष्करणानि चापेक्षन्ति स्म । पञ्चतत्त्वात्मकपिण्डरूपेण विद्यमानः मनुष्यः सर्वथा असभ्यनाममात्रेणेव पशुभ्योर्भिन्नः समजायत । मानवजीवनरक्षायै विकासाय च तावत्यावश्यकतासीत् यावत्युद्याने लघुपादपायक्षेत्रे कृष्यैः पशुसंघैः पशवे च भवति । संस्काराः अस्यावश्यकतायाः पूर्तये चेतनप्रयत्नः आसन् । प्राचीनकालीनैः महर्षिभिः स्वज्ञानेन वन्यां पशुतां संस्कृतमानवतारूपेण परिणमितुं प्रयत्नाः कृताः । सर्वेऽपि संस्काराः तेषां विधिविधानानि च जीवनकेन्द्रतः समुत्पद्यन्ते । तेन सह एते च भवन्ति । संस्काराणां प्राचीनतमाः आकरग्रन्थाः गृह्यसूत्राणि च विवाहसंस्कारतः समारभ्यन्ते यतः विवाहसंस्कारोऽयं जीवनस्य केन्द्रबिन्दुबेन स्वीक्रियते स्म । यः संस्कारः सर्वाश्चापि सामाजिक्य गतयः धारयते अनुप्राणयति च ।

संस्काराणां पद्धतयः तासां स्वरूपञ्च निरीक्षणानि अनुभवान् तर्काच समाश्रयन्तः 1 अत्यन्तं प्राचीनकालेऽपि संस्काराणां पद्धतयः सुविशिष्टाः सुविस्तृताश्चासन् । संस्काराणामुद्देश्यं व्यक्तेः पूर्णतया व्यक्तित्वस्य विकासमासीत् येन सः पुरूषः स्वात्मानं मानवातिमानवीय शक्तिपूर्णजगदनुरूपं कर्तुं शक्नुयात् ।

पारस्करगृह्यसूत्रस्यविषयाः प्रायः त एव सन्ति यत् अन्येषुगृह्यसूत्रेषु वर्णिताः। केवलं तु क्रमव्यवस्थायाञ्च अन्तरं लक्ष्यते । अस्मिन् गृह्यसूत्रे त्रयः काण्डाः सन्ति।

अत्र-क्रमशः-नवदशपञ्चदशकण्डिकासु-सप्तदश-विभक्ताः अस्मिन् ग्रन्थे प्रतिपादितविषयाणां विवरणं इत्थमेव अस्ति ।

प्रथमकाण्डे - आवसथ्याधानं-नैमित्तिकप्रायश्चित-पाकयज्ञ-मधुपर्क-दारहरण--निष्क्रमण-नामकरण-मेधाजनन-जातकर्म-सीमन्तोन्नयन-पुंसवन -गर्भाधान अन्नप्राशनञ्च ।

विषय सूची

१. प्रथमकण्डिका	5-14
२. द्वितीयकण्डिका	15-27
३. तृतीयकण्डिका	28-46
४. चतुर्थकण्डिका	47-58
५. पञ्चमकण्डिका	59-71
६. षष्ठकण्डिका	72-76
७. सप्तमकण्डिका	77-75
८. अष्टमकण्डिका	82-83
९. नवमकण्डिका	91-87
१०. दशमकण्डिका	97-91
११. एकादशकण्डिका	101-97
१२. द्वादशकण्डिका	109-100
१३. त्रयोदशकण्डिका	113-102
१४. चतुर्दशकण्डिका	115-105
१५. पञ्चदशकण्डिका	118-110
१६. षोडशकण्डिका	124-124
१७. सप्तदशकण्डिका	139-126
१८. अष्टदशकण्डिका	142-130
१९. नवदशकण्डिका	147-150

॥ श्रीः ॥

पारस्करगृह्यसूत्रम्

'हरिहर"-भाष्ययोपेतं हिन्दीव्याख्यासहितञ्च

प्रथमकाण्डम्

प्रथम कण्डिका

अथातो गृह्यस्थालीपाकानां कर्म ॥ १.१.१॥

इष्टापूर्तक्रियासिद्धिहेतुं यज्ञभुजां मुखम् ।
अग्नि त्रयीवचःसारं वन्दे वागधिदैवतम् ॥ १॥
पारस्करकृते गृह्यसूत्रे व्याख्यानपूर्विकाम् ।
प्रयोगपद्धति कुर्वे वासुदेवादिसम्मताम् ।। २ ।।

हरिहरभाष्यम् - 'अथातो गृह्यस्थालीपाकानां कर्म' अथ श्रौतकर्मविधानानन्तरम्, यतः श्रौतानि कर्माणि विहितानि स्मार्तानि तु विधेयानि अतो हेतोर्गृरह्येआवसथ्येऽग्नौ ये स्थालीपाकाः गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म क्रियाऽनुष्ठानमिति यावत् । वक्ष्यत इति सूत्रशेषः ॥ १.१.१॥

श्रौत कर्म (दर्शपूर्णमास आदि) करने के बाद (स्थालीकपाक से अनुष्ठेय) स्मार्त कर्म को करना चाहिये । अतः श्रौतसूत्र के बाद आवसथ्य अग्नि में घृत,चरु और पुरोडाश आदि पकाकर होम और गर्भाधान आदि संस्कार कर्मो को विधान इस ग्रन्थ में वर्णित किया गया है । सूत्रकार प्रथम क्रम मे उन कर्मो को कहते है । जो आवसथ्य से लेकर समस्त अग्नि - स्थापन में काम आते है । इन गृह्योक्त कर्मो की यह एक विषेशता है कि इनमें ब्रह्मा के अतिरिक्त कोई भी ऋत्विक् नही होता । किन्तु यजमान ही सब कार्यो का सम्पादन करता है ।

व्याख्या - अथ - श्रौतकर्मान्तर अब , अतः - स्मार्तकर्म विधेय होने के कारण , गृह्यस्थालीपाकानाम् - आवस्थ्य अग्नि में घृत , चरु , पुरोडाश आदि पाकों के , कर्म को कहते है ।

अनुवाद - वेदविहित कर्मों का विधान श्रौतसूत्र में हो चुका है, इसके बाद अब क्रमप्राप्त स्मृति पर आधारित अथवा धर्मशास्त्रविहित कर्मों का विधान करता चाहिए । अतः अग्निहोत्र की आग में पकाये गये एक धार्मिक कृत्य, जिसका अनुष्ठान गृहस्थ करते हैं- इस प्रकार किये जाने वाले कर्मों का निरूपण करते हैं।

व्याख्या- अथातो-अथ शब्द मंगलसचक है, किसी रचना के प्रारम्भ में प्रयोग होता है. जिसका अर्थ 'इसके बाद' 'अब' यहाँ होता है । संस्कृत भाषा में यह शब्द बड़ा ही पवित्र माना जाता है. क्योंकि यह शब्द सर्वप्रथम ब्रह्मा के कण्ठ से निसृतःमाना जाता है।

ओङ्कारश्चाथ शब्दश्च द्वावेतो ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातो तेन माङ्गलिकावुभौ' ।।

इसका शांकरभाष्य भी 'अर्थान्तरप्रयुक्तम् अथशब्दं श्रुत्या मङ्गलमाचराति आश्व० गृ० सू० (१।१।१) से इसकी तुलना की जा सकती है ।

पाश्चात्य विद्वानों ने पारस्करगृह्यसूत्र के जर्मन अनुवाद में स्टेञ्जलर ने अथातः का अर्थ 'Nanalso' लिखा है। किन्तु उनक उनकी दृष्टि में आगे के किसी सन्दर्भ की सूचना अतः श्रौतसूत्रों का प्रारंभ 'अथातोऽधिकार साहित्य का प्रथम खण्ड ही माना जाता है। किन्तु उनके इस अर्थ से ओल्डेनवर्ग यह विचार भारतीय प्राचीन कर्कादि भाष्यकारों के विचार से सामञ्जस्य स्थापित नहीं कर पाता है । अतः यह मत उचित प्रतीत नहीं होता।

गृह्य-यहां गृह्य से उस गृह्याग्नि का तात्पर्य है, जिसे अग्निहोत्र की आग कहते

हैं, जिसको स्थापित किये रखना प्रत्येक ब्राह्मण का विहित कर्म है । ग्रह, धातु से क्यप् प्रत्यय लगने पर गृह्य शब्द का निर्माण हुआ है । यहाँ गृह्याग्नि से तीन प्रकार की आग का बोध होता है-आवसथ्याग्नि, शालाग्नि एवं औपासनाग्नि ।

स्थालीपाकः - स्थाली शब्द का अर्थ है-पकाने का बर्तन अर्थात् मिट्टी की हांडी, सामासिक स्थालीपाक शब्द का अर्थ है-एक धार्मिक कृत्य, जिसका अनुष्ठान प्रत्येक हिन्दू के घर में होता है । इसका संदर्भगत अर्थ है-आज्याधिश्रयण, पुरोडाशनिर्माण, धाना तथा सत्तू प्रभृति ।

परिसमुह्योपलिप्योल्लिख्योद्धत्याभ्युक्ष्याऽग्निमुपसमाधाय, दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्थिवदासाद्य, पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत् प्रोक्ष्य निरूपाज्यमधिश्रित्य पर्यग्नि कुर्यात् ॥ १।१।२॥

हरिहरभाष्यम् - तत्रादावाधानादिसर्वकर्मणां साधारणो विधिः प्रथमकण्डिकयोच्यते । तत्र गृह्येष्वावसथ्याधानादिषु सर्वकर्मसु यजमान एव कर्ता नान्य ऋत्विक तस्यानुक्तत्वात् । अथ यजमानः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचान्तः कर्मस्थानमागत्य वारणादियज्ञियवृक्षोद्भवासने प्राग्ग्रानुदग्ग्रान्वा त्रीन्कुशान्दत्त्वा प्राङ्मुख उपविश्य वाग्यतः शुद्धायां भूमौ सप्तविंशत्यङ्गुलं मण्डलं परिलिख्य तत्र। 'परिसमुह्य' त्रिभिर्दर्भः पांसूनपसार्य 'उपलिप्य' गोमयोदकेन त्रिः । 'उल्लिख्य' त्रिः खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन प्रागग्रा उदक्संस्थाः स्थण्डिलपरिमाणास्तिस्रपे रेखाः कृत्वा । 'उद्धत्य' अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो लेखाभ्यः पासूनुद्धृत्य । 'अभ्युक्ष्य' मणिकाद्भिरभ्युक्ष्याभिषिच्य । 'अग्निमुपसमाधाय' कर्मसाधनभूतं लौकिकं स्मात श्रौतं वाऽग्निम् आत्माभिमुखं स्थापयित्वा । 'दक्षिणतो ब्रह्मासनमास्तीयं' तस्याग्नेर्दक्षिणस्यां दिशि ब्रह्मणे आसनं वारणादियज्ञियदारुनिर्मितं पीठमास्तीर्य कुशः स्तीर्वा तत्र वारणाभरणाभ्यां

पूर्वसम्पादितं कर्मसु तत्त्वज्ञं ब्रह्माणं तदभावे पञ्चाशत्कुशनिर्मितम् अग्नेरुत्तरतः प्राङ्मुखमासीनं स्वयमुदङ्मुख आसीनोऽनुलेपनपुष्पमाल्यवस्त्रालङ्कारादिभिः सम्पूज्य अमुककर्हिं करिष्ये तत्र मे त्वममुकगोत्रामुकप्रवरामुकशर्मन् ब्राह्मण त्वं ब्रह्मा भवेति वृत्वा भवामीत्युक्तवन्तमुपवेश्य । 'प्रणीय' अप इति शेषः । तद्यथा अग्नेरुत्तरतः प्रागग्रं कुशरासनद्वयङ्कल्पयित्वा वारणं द्वादशाङ्गुलदीर्घ चतुरङ्गुलविस्तारं चतुरङ्गुलखातं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तोद्धतपात्रस्थोदकेन पूरयित्वा पश्चिमासने निधायालभ्य पूर्वासने स्थापयित्वा । 'परिस्तीर्य' अग्निम्, बहिर्मुष्टिमादाय ईशानादिप्रागनेबहिभिरुदक्संस्थमग्नेः परिस्तरणं कृत्वा । 'अर्थवदासाद्य' यावद्भिः पदार्थैरर्थः प्रयोजनं तावतः पदार्थान् द्वन्द्वं प्रासंस्थान् उदगग्रानग्नेरुत्तरतः पश्चाद्वा आसाद्य । तद्यथा पवित्रच्छेदनानि त्रीणि कुशतरुणानि पवित्रे साग्रे अनन्तर्गर्भे द्वे कुशतरुणे, प्रोक्षणीपात्रं वारणं द्वादशाङ्गुलदीर्घ करतलमितखातं पद्मपत्राकृतिक कमलमुकुलाकृति वा, आज्य स्थाली तैजसी मृन्मयी वा द्वादशाङ्गुलविशाला प्रादेशोच्चा, तथैव चरुस्थाली,सम्मार्जकुशास्त्रयः, उपयमनकुशास्त्रिप्रभृतयः, समिधस्तिस्त्रः पालाश्यः प्रादेशमात्र्य, स्त्रुवः खादिरो हस्तमात्रः अङ्गुष्टपर्वमात्रखातपरिणाहवर्तपुष्करः। आज्यं गव्यम् । चरुश्चेद् व्रीहितण्डुलाः, षट्त्रिंशादधिकमुष्टिशतद्वयपरिमितं परार्ध्यं बहुभोक्तृपुरुषाहारपरिमिततमपराध्यं तण्डुलाद्यन्न, पूर्णपात्रं दक्षिणा वरो वा यथा 'पवित्रे कृत्वा' प्रथमं त्रिभिः कुशतरुणरग्रतः प्रादेशमात्र विद्या 'प्रोक्षणीः संस्कृत्य' प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय पात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणेनोच्छाल्य प्रणीतोदकेन प्रोक्ष्य । अर्थवत्प्रोक्ष्यं अर्थवन्ति प्रयोजनवन्ति आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तानि प्रोक्षणीभिरद्भिरासादन क्रमेणैकशः प्रोक्ष्य असञ्चरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रन्निधाय । निरुप्याज्यम्

आसादितमाज्यमाज्यस्थाल्यां पश्चादग्ने निहितायाम्प्रक्षिप्य, चरुश्चेचरुस्थाल्याम्प्रणीतोदकमासिञ्चय आसादितांस्तण्डुलान्प्रक्षिप्य । 'अधिश्रित्य' तत्राज्यं ब्रह्माधिशयन रतः स्वयं चरुमेवं युगपदग्नावारोप्य । 'पर्यग्नि कुर्यात्' ज्वलदुल्मुकं प्रदक्षिणमा समन्ताद् भ्रामयेत् अर्द्धश्टते चरौ ॥ १।२।२॥

व्याख्या -[जहाँ होम करना हो उस स्थान को] **'परिसमुह्य** - (कुश से) झाड़कर; **उपलिप्य-** (जल व गोवर से) लीपकर; **उल्लिख्य** - (तीन) रेखा [स्फ्य, कुश या खुव से] खींचकर; **उद्धृत्य** - [उन तीनों रेखा कीं क्रमशः मिट्टी] निकालकर; **अभ्युक्ष्य** - (जल से) सींचकर; **अग्निम्** - अग्निको; **उपसमाधाय** - भलीभाँतिं (वेदी ' के मध्य में) स्थापित करके; **दक्षिणतः** - दक्षिण की ओर;**ब्रह्मासनम्** - ब्रह्मा के लिए आसन; **आस्तीर्य**-बिछाकर; **प्रणीयं**-जलयुक्त प्रणीता को आगे रखकर;**परिस्तीर्य**-अग्नि के चारो ओर कुशे बिछाकर; **अर्थवत्** - [यज्ञ के लिए] आवश्यक वस्तुएँ; **आसाद्य**-रखकर; **पवित्रे कृत्वा** - पवित्री बनाकर; **प्रोक्षणीः संस्कृत्य**-प्रोक्षणी को [जल और पवित्री से] ओक्षित करके अथांत् जल छिड़ककर संस्कार करके; **अर्थवंत् प्रोक्ष्य** - आवद्यक वस्तुओं को प्रोक्षित करके; **आज्यं निरूप्य**-घी अच्छे से देखकर को थाली में रखकर; **अधिश्रित्य-** उसे अग्नि पर रखकर; **पर्यग्निं कुर्यात्** उसके [घी के] चारो ओर अभि का उल्मुक घुमाना चाहिए ॥ २ ॥

प्रसङ्ग - होम के लिए किसी वेदी में जो अग्नि स्थापित का यहाँ सामान्य निरूपण है। होमकर्ता स्नान कर अच्छी यज्ञीय पवित्र आसन पर पूर्वाभिमुख होकर बैठ जाय । पूनः २७ अंगुली का बना ले । फिर उसे तीन कुशों से होम स्थान को लीप कर, व मूल न रेखाओं से उठी धूलि को या तांबे के बर्तन में आग लेकर बायें हाथ में रखकर उसे पवित्र और कुश फैला दें। फिर यज्ञ अवयव-धूलि झाड़कर, गोबर और पानी से उस स्थान को मे या किसी काठ के टुकड़े से तीन रेखाएँ खींचकर, उन रेखाओं उठा ले । फिर उस

स्थान पर पानी छींटकर, कांसे या तांबे के बर्तन के बीच में अग्नि-स्थापन करें। वेदी से दाहिने ब्रह्मा के लिये आसन बिछा दें। फिर प्रणीता नामक यज्ञीय काष्ठपात्र को बायें हाथ में रखकर जल से भर दें। फिर उस स्थापित अग्नि के चारों ओर कूश फैला दें। उपयोगी वस्तुओं को इकट्ठा कर लें। उसके बाद पवित्र नामक कुशों को दो भागों में विभक्त कर अर्थात तीन पवित्र कुशों से दो तरुण कुशों पर आगे से एक बित्ता को कर उसके टुकड़ों को प्रोक्षणीपात्र के जल से सींचकर प्रोक्षणीपात्र का संस्कार कर अनुष्ठानोपयोगी वस्तुओं को जल से सींचकर, आज्यस्थाली में घी डालकर उसे प्रज्वलित आग पर रखकर, उसके चारों ओर जलती लकड़ी को घुमा कर घी को पिघला दें।

व्याख्या- ऐसे इस प्रथम कण्डिका में कुल मिलाकर २४ ल्यबन्त शब्दों का प्रयोग किया गया है । आचार्य कुलमणि मिश्र ने इस सूत्र के पाँच समूहनादि शब्द के व्याख्या-क्रम में कहा है कि ये पांच ल्यबन्त देवकर्म में तीन-तीन तथा एक-एक पितृकर्मजन्य संस्कार हैं । किन्तु भर्तृ यज्ञ ने इन्हें पांच भू-संस्कार माना है तथा कोचाय ने इन्हें पांच अग्नि-संस्कार माना है । इस सन्दर्भ में जयराम, हरिहर, गदाधर तथा विश्वनाथ भी कर्काचार्य से सहमत हैं। .. परिसमूह्यादि परि और सम पूर्वक वह धातु का ही प्रयोग है । कर्क आचार्य ने इसे 'ऊह' धातु मानकर 'परिसमूह' का प्रयोग किया है। यज्ञोपयोग यहाँ निम्नलिखित वस्तु-समूह का बोध होता है। तीन सम्पूर्ण कुशाएं, दो प्रोक्षणीपात्र-(प्र+उक्ष + ल्युट + ङीप) अग्नि-स्थापन के क्रम में 3 होने वाला यह शब्द 'पवित्र जल से परित कलश' के अर्थ में है। आज्यस्थाली- आज्यते-आ+ अ + क्यप; स्थाली-स्थाल+ङीष्, आज्यस्थाली - पिघले हुए घी को रखने के लिए मिट्टी का बर्तन, चरुस्थाली-देवताओं की सेवा में अर्पित करने के लिए चावलों को पकाने का बर्तन । सम्मार्जनकुशा - सम् + मृज् + ल्युट् - वेदी की भूमि को झाड़ने के लिए सम्पूर्ण कुशाएँ, दो

तरुण कुश, ही में प्रयुक्त होने वाले कुशों का संग्रह, समिधाएँ-होम की आग को प्रज्वलित की लकड़ियाँ, स्मृत्यर्थसार के अनुसार ये लकड़ियां-पलाश, खैर, पीपल, शमी, अलर आदि की होती हैं । ये लकड़ियां एक-एक बित्ते अर्थात् १२ अंगुलियों की सूखी गीली, पकी और बराबर से कटी हुई होनी चाहिए, घुन लगी लकड़ियों का होम में प्रयोग सर्वथा वजित है। उपयमनकुशा=अग्नि को यज्ञीय भूमि में स्थापित करने वाले कुश, सुवा=लकड़ी का बना यज्ञ का चम्मच, जिससे होमाग्नि में आहतियां दी जाती है । गाय का घी, चावल से भरे मिट्टी के बर्तन, दक्षिणा एवं गौ। प्रोक्षण-कर्म-ऊपर उठे हुए हाथों से किये जाते हैं तथा अभ्युक्षण-कर्म-नीचे झुके हाथों से सम्पादित होते हैं । यथा

'उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम् ।
तिरश्चावीक्षणं कुर्यान्नीचरभ्युक्षणं कृतम् ॥'

ब्रह्मा-यज्ञीय कार्य सम्पादन के निमित्त कर्मकाण्ड में नैष्ठिक पवित्र ब्राह्मण को ब्रह्मा कहा जाता है । सभी कर्मों में निष्णात ब्रह्मा का यदि अभाव हो तो पचास कुशों से निर्मित ब्रह्मा का ही वरण कर लेना चाहिए।

प्रोक्षणी: संस्कृत्य-प्रणीता के जल को प्रोक्षणीपात्र में तीन बार डालें, फिर प्रणीता के जल से प्रोक्षणीपात्र का मार्जन करें, इसके बाद वेदी के मध्य में अग्निस्थापन करें। प्रोक्षणी-संस्कार के क्रम में पहले प्रोक्षणीपात्र को प्रणीतापात्र के पास रखकर प्रणीता का पवित्र जल उस पर छिड़ककर तथा इकट्ठा किये गये यज्ञीय सभी द्रव्यों पर जल छिड़ककर, यज्ञाग्नि और प्रणीतापात्र के बीच में प्रोक्षणीपात्र को रख दें । जल-सिंचन के पूर्व दाहिने हाथ से प्रोक्षणीपात्र को बायें हाथ में रखकर ही जल छिड़कना चाहिए। जल-सिंचन के क्रम में-प्रणीता के जल को प्रोक्षणीपात्र में तीन बार डालें, पूनः प्रणीता के जल से प्रोक्षणीपात्र का छिड़काव करें । पुनः घी को देखें, यज्ञाग्नि के पीछे रखे घी को आज्यस्थाली में डालकर आग पर घी को पिघलाने के

लिए रखकर पर्यग्नि करें अर्थात् जलती हुई समिधा की लकड़ी को चरुपात्र, आज्यस्थाली के चारों ओर घुमाकर घी पिघला लें।

स्रुवं प्रतप्य सम्मृज्याऽभ्युक्ष्य पुनः प्रतप्य निवष्यात् ॥ १।१।३॥

(हरिहरभाष्यम्)- स्रुवं प्रतप्य, दक्षिणेन हस्तेन स्रुवमादाय प्राञ्चमधोमुखमग्नो तापयित्वा । सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्जनमूलतोऽग्रपर्यन्तम् 'सम्मृज्य' मूलरग्रमारभ्य अधस्तान्मूलपर्यन्तम् । 'अभ्युक्ष्य' प्रणीतोदकेनाभिषिच्य । 'पुनः प्रतप्य निदध्यात्' पुनः पूर्ववत्प्रतप्य दक्षिणतो निदध्यात् ॥ १।१।३ ॥

व्याख्या -- **स्रुव प्रतप्य** स्रुवा ' को (आगे की ओर से) तपाकर, सम्मृज्यनमाजेन करके; **अभ्युक्ष्य** -प्रणीता, के जल से. प्रोक्षित करके; **पुनः प्रतप्य** - फिर से तपाकर; **निदध्यात्** - वेदी के दक्षिण भाग में रख देना चाहिए ॥ ३ ॥

अनुवाद- अधोमुख स्रुवा को होमाग्नि में तपाकर सम्मार्जन कुश से उसे झाड़कर, प्रणीता के जल से उसे अभिसिंचित करने के बाद उसे आग पर फिर से तपाकर वेदी की दाहिनी ओर रख दें।

व्याख्या-पूर्व वर्णित स्रुवा को आग में तपाकर अधोमुख सामने के की ओर मुड़े हुए अंश को होमाग्नि में तपाकर, उसे बाँयें हाथ में लें। हाथ से सम्मार्जन कुश से सम्पूर्ण स्रुवा को झाड़-पोंछ दें। फिर उस पर जल छिड़क दें, फिर पूर्ववर्णित क्रम से उसे आग में तपाकर यज्ञाग्नि की ओर रख दें।

आज्यमद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान कुशानामा समिधोऽभ्याधायपर्युक्ष्य जुहुयात्।१।१।४॥

हरिहरभाष्यम् –'आज्यमुद्वास्य' आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय चरुञ्चानीय आज्यस्योत्तरतो निधाय, एवं त्रिचतुरादीन्यन्यान्यपि हवींष्युद्वासयेत् ।

अधिश्रृतानाम्पूर्वेणोद्वासितानाम्पश्चिमतो हविष उद्वास्यानयनमिति याज्ञिकसम्प्रदायात् । 'उत्पूय' ऊवं पूर्ववत् पवित्राभ्याम् । 'अवेक्ष्य' अवलोक्याज्यं तस्मादपद्रव्यनिरसनम् । 'प्रोक्षणीश्च पूर्ववत्' पवित्राभ्यामुत्पूय पूर्ववत् । 'उपयमनान् कुशानादाय' दक्षिणपाणिना गृहीत्वा सव्ये निधाय । 'समिधोऽभ्याधाय' तिष्ठन्समिधः प्रक्षिप्य । 'पर्युक्ष्य जुहुयात्' प्रोक्षण्युदकेन सर्वेण सपवित्रेण दक्षिणचुलकेन गृहीतेन अग्निमीशानादि उदगपवर्गम्परिषिच्य जुहुयात् आघारादीन् । संस्रवधारणाय पात्रं प्रणीतारन्योर्मध्ये निदध्यात् ॥ १।१।४ ॥

व्याख्या - आज्यम् - घी को; **उद्वास्य** (अग्नि से) उतार कर; **उत्पूय** - (दोनो हाथ की अनामिका* और अंगुठ से. पुवित्री कुश पकड़े हुए) **उत्पवन -** करवे; **अवेक्ष्य**-देखकर [कि कोई अपव्य तो नहीं है]; **च**-और; **प्रीक्षणीः**- प्रोक्षणी के जल को मी; **पूर्ववत्** - पहले की भाँति; (घृत की ही तरह पवित्र करके); **उयमनान् कुशान्** - उपयमंन संज्ञक कुशों को; **आदाय**-दाहिने हाथ में छेकर (फिर बाएँ हाथ. में लेवें ; **समिधः** (घृताक्त) समिधाओं [लकड़ियों] को; **अभ्याघाय**-अग्नि में छोड़कर; **पर्युक्ष्य**-पर्युक्षण करके [जल छिड़क कर]; **जुहुयात्** हवन करना चाहिए ॥ ४ ॥

अनुवाद -घृतपात्र को आग पर से उतार कर पवित्र कर अर्थात् अनामिका एवं अंगूठे से पकड़े गये पवित्रों से तीन बार पवित्र कर यह देख लें कि उस घी में कोई अपद्रव्य तो नहीं है और अगर है तो उसे निकाल दें। फिर पहले की ही तरह प्रोक्षणीपात्र के जल का भी निरीक्षण तथा परिशोधन कर लें। फिर उपयमन नामक कुश को दाँयें हाथ से उठाकर बाँयें हाथ में लेकर, आग में समिधाएँ डालकर, जल छिड़ककर हवन करें।

व्याख्या- आज्य शब्द का यहाँ अर्थ है-होम के लिए रखा गया गाय का घी, उद्वास्य=बाहर निकालकर, अर्थात् आग पर रक्खे घी को बाहर निकालकर, उत्पूय = उत् +पू+ ल्यप्=मार्जन या शोधन करना, पवित्र नामक दो

कुशाओं से घी का परिशोधन कर, अवेक्ष्य = अव + ईक्ष+क्त्वा+ ल्यप् =अच्छी तरह उस घृत को देखकर, प्रोक्षणीश्च पूर्ववत्-प्रोक्षणीपात्र में रखें पवित्र जल का भी घी की तरह ही ठीक से देख-भालकर, उपयमनान् = उप+यम् + ल्युट - अग्नि के पास स्थापित, कुशान् आदाय = कुशों को दाँयें हाथ से उठाकर बाँयें हाथ में लें । समिधोऽभ्याधाय = घी लगी लकड़ियों को खड़े होकर कुण्ड में डालकर, पर्युक्ष्य =(परि + उक्ष् + ल्यप्) बिना किसी मंत्रोच्चारण के चारों ओर चुपचाप जल के छींटे देना, अर्थात् जल को वेदी के चारों ओर ईशान से उत्तर तक दक्षिणावर्त गिराकर आगे बतलायी जाने वाली विधि से, जुहुयात् =होम करना चाहिए।

एष एव विधिर्यत्र क्वचिद्धोमः ॥ १।१।५॥

हरिहरभाष्यम् - 'एष एव विधियंत्र क्वचिद्धोमः' एषः परिसमूहनादिपर्युक्षणपर्यन्तो विधिरेव न मन्त्राः वचित् यत्र क्वचन लौकिके स्मार्ते वाऽग्नौ होममात्रं तत्र वेदितव्यः ॥ १।१।५ ॥

व्याख्या - एष एव - यही; **विधिः-** (होम की सामान्य) विधि है; **यत्र क्वचित् -** जहाँ कहीं भीं; **होमः -** हवन हो (ऐसा हो करना चाहिए)॥ ५ ॥

अनुवाद -जहाँ कहीं भी हवन होगा यही विधि अपनाई जायेगी।

व्याख्या- एष एव =परिसमूहन से पर्युक्षण पर्यन्त होम की सामान्य यही विधि है। यत्र क्वचिद् होमः जहां कहीं भी होम किया जाता है। विधि शब्द के आगे यहां एव शब्द का प्रयोग है, जिसका तात्पर्य मंत्रोच्चार के बिना ही विधि का सम्पादन करना है । 'यत्र क्वचित्' से तात्पर्य होम-विधि से ही है, अर्थात् जहाँ कहीं भी लौकिक कर्म में, स्मात्तं या अग्नि कर्म में होम का विधान है, उसकी विधि यही होगी।

॥ प्रथमकाण्ड में प्रथमकण्डिका समाप्त ॥

द्वितीया कण्डिका

आवसथ्याधानं दारकाले ॥ १।२।१॥

हरिहरभाष्यम् -'आवसथ्याधानन्दारकाले' आवसथ्याग्निना साध्यानि कर्माणि व्याख्यातुं प्रतिज्ञातानि प्रथमसूत्रे सूत्रकृता पारस्करेण यतोऽतस्तस्याधानविधि व्याख्यातुमुपक्रमते । आवसथ्यस्य गृह्यस्य अग्नेराधानमावसथ्याधानम् । तद्दारकाले विवाहकाले चतुर्थीकर्मानन्तरं कुर्यात् प्राक् चतुर्थीकर्मणः पत्न्या भार्याऽस्यानुपपत्तेः सभार्यस्य च आधानेऽधिकारः । वैवाहिकोऽग्निरेवोपासनाग्निरित्याश्वलायनादीनाम्पक्षः । ते हि विवाहहोममेव दाराग्न्योः संस्कारकं मन्यन्ते अस्माकन्तु आवसथ्याधानन्दारकाल इत्यारभ्याग्निसंस्कारस्य पारस्कराचार्येण पृथगभिधानात् तत्संस्कारसंस्कृतोऽग्निरोपासनः ।१।२।१।

प्रसंग-आचार्य पारस्कर ने प्रथम कण्डिका में आवसथ्याधान के द्वारा निष्पाद्य कर्मों की व्याख्या करने की प्रतिज्ञा की है।

अनुवाद - गृह्याग्नि की स्थापना विवाह के समय करनी चाहिए।

व्याख्या-आवसथ्यः = (आ+वस् + अथच् +ष्यञ्) वह (अग्निहोत्र की) पवित्र आग, जो घर में रखी जाती है । आधानम् = (आ+धा+ल्युट्) यज्ञाग्नि को स्थापित करना (अग्न्याधान), 'पुनर्दारक्रियां कुर्यात् पुनराधानमेव च'[1] । दारः=(दृ+घञ्) पत्नी, काले = पाणिग्रहण समय में । आवसथः गृहम्, तत्र भवः आवसथ्यः = गृहशाला की अग्नि, तस्य आधानम् = उसकी स्थापना, दारकाले विवाह के समय, अर्थात् चतुर्थी कर्म के बाद ही

[1] मनुस्मृति ५.१६८

गृह्याग्नि की स्थापना का विधान है। क्योंकि चतुर्थी कर्म के पूर्व पत्नी भार्या नहीं बनती है और सभार्य व्यक्ति ही अग्न्याधान करने का अधिकारी है।
इस सन्दर्भ में आश्वलायन प्रभृति कतिपय आचार्यों का मत है कि वैवाहिक अग्नि ही औपासनाग्नि है। इनके विचार में विवाह काल में स्थापित वेदी वाले विवाह-होम को ही पत्नी और होम का सस्कर्ता मानते हैं। किन्तु हरिहर का कहना है कि पारस्कर ने 'आवसथ्याधानं दारकाले' के द्वारा अग्नि-संस्कार का अलग ही विधान किया है । अतएव इस संस्कार के द्वारा सुसंस्कृत अग्नि ही औपासनाग्नि है ।

दायाद्यकाल एकेषाम् ॥ १।२।२॥

हरिहरभाष्यम् -'दायाद्यकाल एकेषाम्' एकेषामाचार्याणाम्मते दायाद्यकाले भातृणाम् पितृधनविभागकाले। अविभक्ते हि पित्र्ये धने सर्वेषाम्भातृणां स्वबस्य साधारणबेन विनियोगानर्हबात् धनविनियोगसाध्यं हि आवसथ्यादिकर्मानुष्ठानम् । अतो भातृमतां विभक्तानामाधानेऽधिकार इति तेषामभिप्रायः । अभ्रातृकस्य दारकाले एवं व्यवस्थितो विकल्पः । एवङ्कृतविवाहस्य विभक्तधनस्य च आधाने अधिकारमभिधाय इदानीमाहरणपक्षे आधानमाह ।

प्रसङ्ग - अग्नि स्थापन के लिये समय का प्रासंगिक विकल्प बतलाया गया है।

व्याख्या-कुछ आचार्यों के विचार से यह 'अग्न्याधान' 'भाइयों के बीच पिता का मृत्यु के बाद दाय-विभाजन के समय ही होना चाहिए। अतः 'भातृहीन या विवाहोपरान्त तथा कई भाईवाले पैतृक सम्पत्ति के बंटवारे के समय ही अग्न्याधान करें। यह कर्काचार्य और जयराम की निष्कर्षात्मक व्यवस्था है। क्याकि भर्तृयज्ञभाष्य के अनुसार-पिता प्रत्तामादाय निष्क्रामति' (पा० गृ० सू० १।४।१५) । इस तरह अग्न्याधानकाल के सन्दर्भ में दो परस्पर विरोधी मतों के बीच सामञ्जस्य स्थापित करने का प्रयास कर्क और जयराम का इस प्रकार है-'**अभ्रातृकस्य दारकाले भ्रातृमतो दायाद्यकाले ।**'

वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य ॥ १।२॥३॥

हरिहरभाष्यम् -वैश्यस्य वहुपशोर्गृहादग्निमाहृत्य ।। १।२।३ ।।

प्रसङ्ग-अग्नि-स्थापन के लिए कहां से आग का आहरण करना चाहिए, इसका उल्लेख है।

अनुवाद- अत्यन्त धनसम्पन्न वैश्य के घर से आग लाकर अग्निस्थापन करना चाहिए।

व्याख्या-बहुपशोः = अत्यधिक पशुओं से समद्ध, वैश्यस्य =वैश्य के, गृहात् - घर से, अग्निम् = आग,आहृत्य = लाकर, पूर्वलिखित विधि से अग्निस्थापन करें ।

इस सन्दर्भ में गोभिल प्रभृति कतिपय आचार्यों का कहना है कि यदि वैश्य के घर की आग उपलब्ध न हो तो बाजे-गाजे के साथ वेदमंत्रोच्चार करते हुए भड़भूजे अथवा बहुयाजी ब्राह्मणों के घर से भी आग लाई जा सकती है। इसके बाद पांच भूमि संस्कारों से सुसंस्कृत यज्ञीय भूमण्डप में उस आग को रखकर, ब्रह्मा-वरण तथा ब्राह्मण-भोजन के बाद यपाविहित कर्म प्रारम्भ करना चाहिए ।

चातुष्प्राश्यपचनवत् सर्वम् ।। १।२।४ ॥

हरिहरभाष्यम् - चातुष्प्राश्यपचनयत्सर्वम् ।

अग्न्याधानपद्धति-तत्रावसथ्याधानङ्करिष्यन्-उक्तकालातिकमाभावे-ज्योतिःशास्त्रे-अग्न्याधानार्थोपदिष्टमास-तिथि-नक्षत्र-वारादिके काले प्रातः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचान्तः सपत्नीकः गोमयोपलिप्ते शुचौ देशे स्वासने उपविश्य अद्येहेत्यादिदेशकालो स्मृत्वा आवमच्याग्नि महमाधास्य इति सङ्कल्पं विधाय मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं यथोक्तं कुर्यात् । कालातिक्रमे तु'यावन्त्यन्दान्यतीतानि निरग्नेविप्रजन्मनः । तावन्ति कृच्छाणि

चरेद्धौम्यं दद्याद्यथाविधि' ॥ इति वचनात् अतिक्रान्तसंवत्सरसङ्ख्या प्राजापत्यरूपम्प्रायश्चित्तम्मुख्यविधिना चरित्वा तदशक्तो प्रतिप्राजापत्यङ्गान्दत्त्वा तदलाभे तन्मूल्यं निष्कमेकमद्धन्तदई वा द्वादशब्राह्मणभोजनम युतगायत्रीजपं वा गायथ्या तिलाज्यसहस्रहोम वा शक्त्यपेक्षयाऽन्यतमं विधाय होम्यं सायम्प्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपर्याप्तमतिक्रान्तदिवसान् गणयित्वा ब्राह्मणेभ्यो दद्यात् । तत्रावसध्यप्रशंसावाक्यं गृह्यकाण्डे -'नावसथ्यात्परो धर्मो नावसध्यात्परन्तपः। नावसथ्यात्परं दानन्नावसथ्यात्परं धनम् ॥ नावसथ्यात्परं श्रेयो नावसथ्यात्परं यशः । नावसध्यात्परा सिद्धिविसथ्यात्परा गतिः ॥ नावसथ्यात्परं स्थानं नावसथ्यात्परं व्रतम्' । इत्यावश्यकत्वान्नित्यम्, तस्मादकरणे प्रत्यवायात् तत्क्षयार्थं प्रायश्चित्तमुचितम् । तत्र वाक्यम्- आवसथ्याधानमुख्यकालातिकान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय एतावन्ति प्राजापत्यव्रतानि चरिष्ये । तदशक्तौ प्राजापत्य प्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं सम्प्रददे। एवमन्येषु गोमूल्यदाननिष्कृतदद्धिद्वादशब्राह्मणभोजनायुतगायत्रीजपगायत्र्या तिलाहुतिसहस्ररूपेषु वाक्यमूहनीयम् । ततः स्वशाखाध्यायिनं कर्मसु तत्त्वज्ञं ब्राह्मणं गन्धपुष्पमाल्यवस्त्रालङ्कारादिभिरभ्यामुकगोत्रममुकशर्माणममुकवेदममुकशाखाध्यायिनमावसथ्याधानं करिष्यन् कृताकृतावेक्षकत्वेन ब्रह्माणमेभिश्चन्दनपुष्पाक्षतवस्त्रालङ्कारस्त्वामहं वृणे, वृतोऽस्मीति तेन वाच्यम् । केचिद् ब्रह्माणं मधुपर्केणार्चयन्ति ऋत्विक्त्वाविशेषात् । ततः पत्न्या सहाहते वाससी परिधाय अभ्याधानदेशे स्थण्डिलमुपलिप्य पञ्च भूःसंस्कारान्कृत्वा तं देशमहतवाससा पिधाय ब्रह्मणा सह समृदं स्थालीमादाय ब्राह्मणैः परिवृतो वेदघोषमङ्गलगीतवाद्यादिभिनितोत्साहो 'वैश्यस्य' तृतीयवर्णस्य 'बहुपशोः' पशुभिः समृद्धस्य तदलाभे गोभिलादिसूत्रवचनाद् भ्राष्ट्रगृहात् अम्बरीषाद्

बहुयाजिनो ब्राह्मणस्य गृहात् वा बह्वानपाकात् ब्राह्मणस्य महानसाद्वा स्थाल्यामग्नि गृहीत्वा तथैव गृहमागत्य परिसमूहनादिपञ्चभूसंस्कारसंस्कृते स्थण्डिले प्राङ्मुख उपविश्यात्माभिमुखमग्नि निदध्यात् । ततो ब्रह्मोपवेशनादि ब्राह्मणभोजनान्तं वक्ष्यमाणं कर्म कुर्यात् । चातष्प्राश्यपचनवत्सर्वमिति सूत्रकृता पूर्वपक्ष उपन्यस्तो नतु सम्मत इति कर्कोपाध्यायो भाष्ये निरूपितवान् ।।१।२।४॥

अनुवाद- श्रौतकर्म-साधनभूत आग में चार याज्ञिकों के भोजन योग्य पाक की तरह सभी कर्म यहां भी करना चाहिए।

व्याख्या-'चातुष्प्राश्यम् =चत्वारः याज्ञिकाः प्राश्नन्ति = भक्षयन्ति यस्मिन कर्मणि तत् चातुष्प्राश्यम्' अर्थात् चार याज्ञिकों के भोजन योग्य कर्म को 'चातुष्प्राश्यम्' कहा जाता है । तदर्थ यत् पचनम् = इसके लिए जो पाक-क्रिया है, उसे ही चातुष्प्राश्यपचन कहते हैं । तद्वत् । सर्वम् =उसी की तरह सभी कृत्य करने चाहिए। इस पर कर्काचार्य का कहना है कि पारस्कर ने पूर्वपक्ष के रूप में इसे उपन्यस्त किया है, यह उनका सिद्धान्त नहीं है । श्रौताधान में चातुष्प्राश्यपचन देखा जाता है । इसी तरह यहाँ भी अग्निमात्र का उपाधान कर आधान करना चाहिए । यह मत भी एकदेशीय ही है।

अरणिप्रदानमेके ॥ १।२।५ ॥

हरिहरभाष्यम् - अधुनाऽऽरणेयपक्षमाह- अरणिप्रदानमेके । एके आचार्याः अरणिप्रदानं प्रशब्द उपशब्दस्यार्थे अरणिप्रदानमुपादानं कारणम् उत्पत्तिस्थानं यस्याग्नेः सोऽरणिप्रदानस्तमरणिप्रदानमग्निमादधीतेति मन्यन्ते ॥ १२॥५॥

प्रसङ्ग- आरणी के द्वारा प्राप्त अग्नि में ही यज्ञ करने का विधान है, यही प्रसंग उल्लिखित. किया जा रहा है। **अनुवाद**-यज्ञ की अग्नि उत्पन्न करने के लिए अरणि का प्रदान अर्थात् उपादान किया जाय, ऐसा किसी आचार्य का मत

है।

व्याख्या-शमी की लकड़ी का टुकड़ा, जिसके घर्षण से यज्ञ के अवसर पर आग उत्पन्न की जाती है, उसे 'अरणि' कहते हैं। शमी के पेड़ पर स्वतः उत्पन्न पीपल की यह डाल, जो पूरब की ओर फैली हो; अग्नि-मन्थन के लिए उसी की लकड़ी से 'अरणि' बनाई जाती है। यह अरणि २४ अंगुल लम्बी, छः अंगुल चौड़ी और चार अंगुल मोटी होनी चाहिए । जड़ की ओर आठ अंगुल तथा आगे की ओर बारह अंगल के भाग को छोड़कर बीच के चार अंगुल में ही अग्नि का निवास होता है, क्योंकि इसे ही देवयोनि कहा गया है। अतः इसी तरह की लकड़ी के घर्षण से अग्नि उत्पन्न करनी चाहिए । प्रथम घर्षण के बाद इस नियम को शिथिल किया जा सकता है। अरणि-मन्यन के क्रम में यह कहा गया है कि सर्वप्रथम यज्ञ करने वाले यजमान की पत्नी को अरणिमन्थन करना चाहिए, तत्पश्चात् किसी बलिष्ठ ब्राह्मण को । अरणि के चार अवयव माने गये हैं-उत्तरारणि, आविली, नेत्र और रस्सी । आविली और नेत्र की सहायता से उत्तरारणि को अधरारणि पर रगड़कर आग प्रज्वलित की जाती है।

प्रदानम्- यहां 'प्र' शब्द 'उप' उपसर्ग के अर्थ में प्रयुक्त है। इसलिए प्रदान का अर्थ यहां उपादानकारण अर्थात् उत्पत्ति-स्थान माना गया है ।

पञ्चमहायज्ञा इति श्रुतेः ॥ १।२।६॥

हरिहरभाष्यम् -'पञ्चमहायज्ञा इति श्रुतेः' पञ्चमहायज्ञानां श्रौतत्वात् आरणेयेऽग्नावनुष्ठानं युक्तमित्यभिप्रायः । ततो ब्रह्मोपवेशनादि आज्यभागान्तं कर्म कृत्वा ॥ १।२।६ ॥

अनुवाद- श्रुति अर्थात् वेद के कथनानुसार पांच महायज्ञ करना चाहिए।

व्याख्या-चातुष्प्राश्य नामक पचनाग्नि में किये गये यज्ञ की तरह ही पञ्चमहायज्ञ भी करने चाहिए। यह वाक्यार्थ है, सिद्धान्तपक्ष कोई नहीं।

क्योंकि यह न तो उपदेश वाक्य है और न अतिदेश वाक्य ही।

अग्न्यायदेवताभ्यः स्थालीपाकधपयित्वाऽऽज्यभागाविष्ट्वाज्याहुतीर्जुहोति ॥ १।२।७॥

हरिहरभाष्यम -'अग्न्याधेयदेवताभ्यः स्थालीपाकं…..'इत्यष्टौ' अग्न्याधेयस्य श्रौतस्य देवताः अग्निः पवमानोऽग्निः पावकोऽग्निः शुचिरदितिश्च अग्न्याधेयदेवताः ताभ्यः स्थालीपाकं चहं श्रपयित्वा यथाविधि पक्त्वा आज्यभागौ आग्नेयसौम्यो आधारपूर्वकौ हुत्वा आज्येन आहुतयो होतव्याः आज्याहुतयस्ता भाज्याहुतीजुहोति ।।१।२।७।।

अनुवाद-अग्नि में आधेय देवताओं के लिए पतीली प्रभृति पात्र में चरु पकाकर अर्थात् चावल पकाकर आज्यभाग नामक आहुतियों को देकर तत्पश्चात् घी की आहुतियां दें।

व्याख्या-अग्न्याधेय निम्नलिखित चार देवता है-१. पवमान, २. पावक, ३. शुचि, ४. अदिति ।

आहुतियाँ निम्न प्रकार से दे

'ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम' । इसका मन ही मन उच्चारण करे । तत्पश्चात्-'ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम । ॐ अग्नये स्वाहा, इदमग्नये न मम । ॐ सोमाय स्वाहा, इदं सोमाय न मम' । इस तरह आज्यभाग की आहुति से हवन कर स्रुवा में लगे हुतशेष घी को प्रोक्षणीपात्र में डाल दे।

ॐ बन्नोऽअग्ने' 'सन्बन्नोऽअग्न' 'इमम्मे वरुण' 'तत्वायामि' 'ये ते शतम्'. 'अयाश्चाग्न' 'उदुत्तमम्' 'भवतन्न' इत्यष्टौ ॥१।२।८॥

हरिहरभाष्यम् - बन्नो अग्न इत्यादिभिर्भवतन्न इत्यष्टौ ताभिरष्टभिऋग्भिः प्रत्युचमष्टो । ननु अग्न्याधेयदेवताभ्यो हुत्वा जुहोति इति वक्ष्यति

तत्किमर्थमत्राग्न्याधेयदेवताभ्य इत्युक्तम्, बह्वीनां देवतानां देवताबज्ञापनायेति चेत्, ननु बहुबमस्त्येव कुत इयं शङ्का पवमानादिविशेषणविशिष्टस्याग्नेरेकबात्। अग्नेरेका अदितिद्वितीयेति द्वे एवाग्न्याधेयदेवते इति द्वयोरेव देवताबं मा भूदिति । पुनर्ग्रहणात् बह्वीनामेव देवताबं, विशिष्टस्य देवतान्तरबमिति इन्द्रमहेन्द्राधिकरणे जैमिनीयनिर्णीतबात् । आज्यभागाविष्ट्वेति किमर्थम्पुनर्वचनम् आधारादीनां चतुर्दशानां क्रमेण पठिष्यमाणबात्, उच्यते । आज्याहुतीनां किं स्थानमिति संशये आज्याहुतिस्थानविधानार्थम्, अष्टग्रहणं त मन्मप्रतीकसंशयनिवृत्त्यर्थम् ।

'पुरस्तादेवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्या हुबा जुहोति' पुरस्तात् पूर्व, कस्य अग्न्याधेयदेवताहोमस्याष्टी जुहोति यथा ॥१।२।८॥

अनुवाद–'बन्नो अग्न' इत्यादि आठ मन्त्रों के ये प्रतीक मात्र हैं । सम्पूर्ण मन्त्र नीचे दिये जा रहे हैं।

(१) ॐ बं नो अग्ने वरुणस्य विद्वान देवस्य हेडगे अवयासिसोष्टाः।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥
स्वाहा, इदमग्निवरुणाभ्यां न मम ।(यजु० २१।३)

मन्त्रार्थः - (ऋषि वामदेव; त्रिष्टुप् छन्द; अग्नि और वरुण देवता।) हे अग्निदेव ! आप सब कुछ जानते हैं, यज्ञादि सम्पूर्ण कर्मों के प्रधान हैं। आप हविष्-वाहक और कान्तिमान् हैं। आप की कृपा से वरुण देव मुझ पर प्रसन्न हों। आप हमारे सम्पूर्ण दुर्भाग्य को हमसे दूर कर दो।

(२) ॐ स बं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।
अषयक्ष्व नो वरुण रराणो वीहि मृशोक सुहवो न एधि ॥
स्वाहा, इदमग्निवरुणाभ्यां न मम ।(यजु० २१।४)

मन्त्रार्थ-हे अग्निदेव ! हमें सम्पन्न बनाने के लिए आप अपने समग्र रक्षा-साधनों के साथ इस प्रभातवेला में हमारे पास आकर हमारी रक्षा करें।

हमारी आहुति हमारे राजा वरुण के पास पहुँचाकर उन्हें सन्तुष्ट करें। हम अपने सुखकारी हवि का भोजन करने के लिए आपका आवाहन करते हैं ।

(३) ॐ इमं मे वरुण श्रुधी हवमथा च मृज्य । ब्रामवस्युराचके ॥
स्वाहा, इदं वरुणाय न मम।(यजु० २१-०४)

मन्त्रार्थ-(ऋषि शुनःशेप; गायत्री छन्द; वरुण देवता ।) हे वरुणदेव ! हम आत्मरक्षा हेतु आपका आवाहन करते हैं । आप हमारी बातें सुनें तथा हमें हर तरह की सुख-सुविधा प्रदान करें।

(४) ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरशस मा न आयुः प्रमोषीः॥ स्वाहा, इदं वरुणाय न मम । (यजु० २१:२)

मन्त्रार्थः-(ऋषि शुनःशेप; त्रिष्टुप् छन्द; वरुण देवता।) हे वरुणदेव ! मैं आपक स्तुति करते हुए आपसे उस फल की याचना करता हूँ, जिसकी अभिलाषा प्रत्येक हविष्यदाता यजमान करता है । आप हमें धन तथा पुत्र दें।

(५) ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशाः विताता महान्तः ।
तेभिर्न्नो अद्य सवितोऽतविष्णुविश्व मुञ्चन्तु मरुतः स्वर्काः ॥
स्वाहा, इदं वरुणाय सवित्रे, विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।

मन्त्रार्थ - (ऋषि वामदेव; जगती छन्द; वरुण देवता ।) हे वरुणदेव ! आपके पास शस्त्र की तरह प्रयुक्त होने वाले असंख्य यज्ञों से उत्पन्न पाश हैं, जो विस्तृत और अपरिहार्य हैं । हम सभी उनमें जकड़े हैं। सर्वपूज्य सूर्य, भगवान् विष्णु एवं मरुद्गण हमें वरुणदेव के उन बन्धनों से मुक्त करें।

(६) ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि ।
अयानो यज्ञं वहास्य यानो धेहि भेषजम् ॥ स्वाहा, इदं अग्नये अयसे न मम ।

मन्त्रार्थ-(ऋषि वामदेव; त्रिष्टुप् छन्द; अग्नि देवता ।) हे अग्निदेव ! आपका

निवास भीतर-बाहर सभी जगह समान रूप से है। अनभिशप्त लोगों को आत्मसात् कर उन्हें आप पवित्र बना देते हैं। प्रायश्चित्त अनुष्ठान के द्वारा उनके कर्मपालक हैं। यह भी सच है कि आप शुभ-प्रणेता हैं। यही कारण है कि आप हमारे पवित्र हृदय में रहकर हमारे यज्ञ का वहन करते हैं । आप हमें औषधि प्रदान करें।

(७) ॐ उदुत्तमं वरुण पाशमस्मदवाघमं वि मध्यमं श्रथाय ।
अथा व्वयमादित्य व्रते तवानागसो अदितये स्याम ॥
स्वाहा, इदं वरुणाय न मम ।(यजु० १२।१२)

मन्त्रार्थ- (ऋषि शुनःशेप; त्रिष्टुप् छन्द; वरुण देवता।) हे वरुणदेव ! आप सभी प्राणियों को बन्धनों और संतापों से मुक्त करने वाले हैं । हमारे मस्तिष्क और कण्ठ प्रभृति उत्तमाङ्गों तथा कमर आदि निम्न अवयवों में पड़े अपने बन्धनों से हमें छुटकारा दीजिए, जिससे आपराधिक मनोवृत्ति से मुक्त होकर हम अपने अनुष्ठानों को सम्पादित कर सकें। हे अदितिनन्दन वरुण ! आप हमें दैन्यरहित अखण्ड ऐश्वर्य पाने का अधिकारी बना दें।

(८) ॐ भवतन्नः समनसौ सचेतसावरेपसौ।
मा यज्ञ हिसिष्टं म्मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥
स्वाहा, इदं जातवेदोभ्यां न मम । (यजु० ५।३)

मन्त्रार्थ- (ऋषि प्रजापति; पंक्ति छन्द; जातवेदस् देवता।) हे जातवेदस् ! आप दोनों के मन एक हैं, चेतना एक है। हमारे प्रयोजनों की सिद्धि के लिए, हमसे अपराध होने पर भी आप हम पर क्रोध न करें, हमारे यज्ञों को नष्ट न करें। अलमानों का वध न करें, हमारे यज्ञों को विनष्ट न करें । आप हमारे लिए मंगलमय हों।

इस तरह पूर्वोक्त आठ मन्त्रों से घी की आठ आहुतियां दें, फिर चरु-होम

करें।

पुरस्तादेवमुपरिष्टात् स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति ॥१।२।९॥

(हरिहरभाष्यम्)-'एवमुपरिष्टात्' एवं तथा ब्रन्नो अग्न इत्यादिना क्रमेण उपरिष्टादूर्व जुहोत्यष्टौ किं कृत्वा हुत्वा काभ्यः अग्न्याधेयदेवताभ्यः पूर्वोक्ताभ्यः कस्य स्थालीपाकस्य चरोः स्थालीपाकस्येत्यवयवलक्षणा षष्ठी ॥ १।२।९ ॥

अनुवाद-इसी प्रकार अग्न्याधेय देवताओं के लिए चरु अर्थात् सिद्धान्न की आहुतियां देकर, बाद में भी पूर्वोक्त 'ब्रन्नो अग्ने' आदि आठ मन्त्रों से घी की आहुतियां देनी चाहिए।

व्याख्या- कुछ आचार्यों के मत से निम्नलिखित चार मन्त्रों से चार आहुतियां दें-(१) ॐ अग्नये पवमानाय स्वाहा, इदमग्नये पवमानाय न मम । (२) ॐ अग्नये पवमानाय स्वाहा, इदमग्नये पवमानाय न मम । (३) ॐ अग्नये शुचये स्वाहा, इदमग्नये शुचये न मम । (४) ॐ अदित्यै स्वाहा इदमदित्य न मम ।

स्विष्टकृते च ॥१२॥१०॥

हरिहरभाष्यम् - 'स्विष्टकृते च' स्विष्टकृते चाग्नयेऽष्टर्चहोमान्ते स्थालीपाकस्य हुत्वा चशब्दात् ॥ १।२।१० ॥

अनुवाद - इसके बाद स्विष्टकृत मन्त्र से आहुति दें।

व्याख्या- 'ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम् अग्निश्च स्विष्टकृतिद्याक्तत्सर्व स्विष्टं सुहतहुतं करोतु मे । अग्नये स्विष्टकृते सुहुतहते सर्वकामानां समर्धयित्रे. सर्वान्नः, कामान् समर्धय स्वाहा, इदमग्नये स्विष्टकृते प्रायश्चित्ताहुतीनाम्' इस मन्त्र से चरु की एक आहुति दें। यहाँ च शब्द चरु के लिए ही प्रयुक्त है ।

अयास्यग्नेर्वषट्कृतं यत् कर्मणात्यरीरिचं देवगातुविद इति ।१।२।११।

हरिहरभाष्यम् - 'अयास्यग्नेर्वषड्कृतं यत्कर्मणात्यरीरिचं देवा गातुविद इति' अथास्यग्नेर्वषटकृतमित्यनेन मन्त्रेणाज्याहति जुहोति । ननु स्विष्टकृते इति किमर्थमुक्तं प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति वक्ष्यमाणत्वादत्र चान्यस्य हविषः सद्भावात् प्राङ्महाव्याहृतिभ्यः प्राप्तत्वात्स्विष्टकृद्धोमस्य । उच्यते-अयास्यग्नेरिति आज्याहुतेमहाव्याहृतिभ्यः पूर्व प्राप्त्यर्थम् ॥ १।२।११॥

अनुवाद- 'अयास्याग्ने' इत्यादि मन्त्र से अन्त में घी की आहुति दे।

मन्त्रार्थ -(गौतम ऋषि; गायत्री छन्द; गातुविद देवता ।) हे यज्ञ के जानकार देवगण ! अग्निदेव के लिए 'वषड्कार' करके मैं यज्ञानुष्ठान का अधिकारी बना हूँ। हमारे यज्ञ से प्रसन्न होकर आप हम पर सदैव कृपालु बने रहें ।

व्याख्या- इसके बाद 'ॐ भूः स्वाहा, इदमग्नये न ममः ॐ भुवः स्वाहा, इदं वायवे न मम; ॐ स्वः स्वाहा, इदं सूर्याय न मम'-इन तीन आहुतियों को देकर यज्ञकर्ता निज स्वत्व का त्याग करे तथा 'त्वन्नो अग्ने, स त्वन्नो, अयाश्चाग्ने, ये ते शतम्, उदुत्तमम्' इन पांच मन्त्रों की ही आहुतियां पहले की तरह दे तथा 'ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम, इति मनसा' । इस प्रकार नी आहुतियाँ दे। इसका उल्लेख प्रथम कण्डिका में है।

बर्हिर्हुत्वा प्राश्नाति ॥.१२।१२॥

हरिहरभाष्यम् - 'बर्हिर्हुत्वा प्राश्नाति' बर्हिः परिस्तरणार्थम् अग्नौ प्रक्षिप्य प्राश्नाति भक्षयति । अत्र प्राशनोपदेशसामर्थ्यात् प्राश्यमाकाक्षितम्, तत्कि हुतशेषः अन्यद्वा किञ्चित्, उच्यते-पाकयज्ञेष्ववत्तस्यासर्वहोमो हुत्वा शेषप्राशनमिति कात्यायनोक्तेः सुवेणावत्तस्य होमद्रव्यस्य सर्वस्य होमनिषेधात् हुतशेषस्य च प्राशनविधानात् सर्वासामाहुतीनां होमद्रव्यं स्रुवेऽवशेषितं संस्रवत्वेन प्रसिद्धं पात्रान्तरे प्रक्षिप्यते तत्प्राश्यमिति । ननु अकृते वैश्वदेवे त्वित्यादिवचनाद्वैश्वदेवात्प्राक् स्थालीपाकानुष्ठानं प्राप्तं तत्र

संस्रवप्राशनं विहितं तत्कृत्वा कथं माध्याह्निके वैश्वदेवादिकर्मण्यधिकार इति चेत् उच्यते-शेषप्राशनस्य कर्माङ्गत्वेन विधानात् अप्राशने. च कर्मणो वैगुण्यात् नोत्तरकर्माधिकारनिवृत्तिः । बर्हिहोमश्च विधानसामर्थ्यादग्न्याधान एव भवति नान्येषु कर्मसु ॥ १।२।१२॥

अनुवाद-वेदी के चारों ओर बिछे हुए कुशों का हवन कर प्रोक्षणीपात्र में डाले गये घी का भक्षण करे। **व्याख्या-** प्रणीत आदि पात्र में शेष घृतपाशन के बाद पूर्णपात्र ब्राह्मण को दे दे ।

ततो ब्राह्मणभोजनम् ॥ १।२।१३ ॥

हरिहरभाष्यम् -'ततो ब्राह्मणभोजनम्' ततः समाप्ते कर्मणि ब्राह्मणभोजनं दद्यात् । ब्राह्मणभोजनमित्यत्र एकस्मै द्वाभ्यां बहुभ्यो वा भोजनं ब्राह्मणभोजनमिति समासस्य तुल्यत्वात् एकस्मिन्नपि ब्राह्मणे भोजिते अर्थस्यानुष्ठितत्वात् एकस्यैव भोजनमिति युक्तम् इति सूत्रार्थः ॥ १।२।१३ ॥

व्याख्या – कर्म की समाप्ति के पश्चात् ब्राह्मणो को भोजन करवाना चाहिये। यहा संख्या निर्धारित नही है । इच्छा के अनुसार एक,दो, तीन या पांच ब्राह्मणो को भोजन करवाना चाहिये।

तृतीया कण्डिका

षडर्घ्या भवन्ति -आचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक *इति ॥१।३।१॥*

हरिहरभाष्यम् -'षडा भवन्ति' । षट् पुरुषा अर्घ्या भवन्ति अर्घार्हा भवन्तीति शेषः । के ते? 'आचार्य'..."'स्नातक' इति । आचार्य उपनयनपूर्वकं ऋत्विक श्रौतस्मार्तादिकर्मार्थं वृतो ब्रह्मादिः । वैवाह्यो वरः । राजा दिगणवान प्रजापालनेऽधिकृतः क्षत्रियः । प्रियः उत्कृष्टजातिः समानजाति

स्नातकः ब्रह्मचर्यात्समावृतः आचार्यस्यार्घ्यो नान्यस्य । तथा च मनुः-'तं प्रतीत स्वधर्मेण ब्रह्मदायहरं पितुः । स्नग्विणं तल्प आसीनमर्चयेत् प्रथमं गवा ॥' इति ॥ १।३।१॥

प्रसङ्ग- आवसथ्याधान वैवाहिक कर्म के पहले करना चाहिए। अतः वैवाहिक विधि का वर्णन यहाँ प्रसङ्ग सापेक्ष्य है। विवाह कर्म में अर्घ्य प्रदान किया जाता है। उसी अर्घ्य प्रसङ्ग का यह प्रथम सूत्र है। । **अनुवाद**-छः पुरुष मधुपर्कपान के लिए. योग्य होते हैं-आचार्य, ऋत्विक, वैवाह्य (जामाता), राजा, स्नातक और अपने प्रियजन अर्थात् इन छः पुरुषों को अर्थ देकर उनका सत्कार करना चाहिए ।

व्याख्या -यही विधि मधुपर्कान्त अन्य योगादिकों में भी कर्तव्य है।

आचार्य-उपनीत छात्रों को वेद पढाने वाले गुरु आचार्य होते हैं। **ऋत्विक्** - वेद और स्मृति द्वारा प्रतिपादित कर्म के सम्पादनार्थ विधिपूर्वक वरण किये

गये नैष्ठिक ब्राह्मण ही ऋत्विक् होते हैं । **वैवाह्यः**-भारतीय विपश्चितों के द्वारा ये वैवाह्य 'वर' " होते है । किन्तु ओल्डेनवर्ग ने 'वैवाह्य' का अर्थ 'श्वसुर' किया है । शा.गृ.सू २ - १५ - १ पर उनकी टिप्पणी है।

'This sutra presupposes the **श्रौतसूत्र** (4.21.1). Here the fourth person mentioned is **श्वसुर**; while in the **गृह्य** text the expression **वैवाह्य** is used. It is difficult not to believe that both words in the same sense, and accordingly Narayan says **श्वसूर**'।- Second Books of East Grathamala : Gribyasutra parst. भारतीय वैवाहिक परम्परा में वर को ही अर्घ दिया जाता है न कि वो अतः प्रयोगसिद्ध इस व्यवहार को किसी भी स्थिति में नकारा नहीं जा सकता है । प्राचीन भाष्यकारों ने भी 'वैवाह्य' का अर्थ जामाता ही किया है । जहाँ तक ना भाष्य का प्रश्न है-नारायण श्रौतसूत्र के भाष्यकार हैं, न कि गृह्यसूत्र के। श्रौतसूत्र का कार्यक्षेत्र गृह्यसूत्र के कार्यक्षेत्र से भिन्न माना गया है। अतः श्रौतसूत्र में व्यवस्था के क्रम में भले ही इसका अर्थ कुछ और हो, परन्तु गृह्यसूत्र में यह भी ग्राह्य नहीं है।

प्रतिसंवत्सरानहयेयुः॥१॥३॥२॥

हरिहरभाष्यम् - इत्येते 'प्रतिसंवत्सरानहयेयुः' । प्रतिसंवत्सरमागतानेताना चार्यादीनर्पण पूजयेयुर्नार्वाक् ॥ १।३।२॥

अनुवाद-वर्ष में एक बार घर आने पर ऊपर उल्लिखित समादरणीयों को अर्घ्य प्रदान कर इनका सम्मान करना चाहिए ।

व्याख्या- व्याकरण की दृष्टि से 'प्रतिसंवत्सरम्' की जगह 'अतिसंवत्सरम्' का प्रयोग उचित प्रतीत होता है । अर्थ की दृष्टि से 'संवत्सरम् अतीत्य आगतान्' अर्थात् एक वर्ष बीत जाने के बाद आने पर ही इन्हें अर्घ प्रदान करने का विधान है । संवत्सर के बीच में आने पर 'अर्घदान' प्रदाता की इच्छा पर

निर्भर करता है। धर्मशास्त्रीय विधि-व्यवस्था पर नहीं । यहाँ अति के अर्थ में ही प्रति शब्द का उपादान है ।

यक्षमाणास्त्वृत्विजः ॥ १ ॥ ३ ॥ ३ ॥

हरिहरभाष्यम् -'यक्ष्यमाणास्त्वृत्विजः'। यक्ष्यमाणाः यज्ञं करिष्यन्तो यजमानाः "ऋत्विजः' याजकान् तु पुनः अहंयेयुरित्यनुषङ्गः, न प्रतिसंवत्सरः नियमः ॥ १।३।३ ॥

अनुवाद- यज्ञ सम्पन्न करने वाले यजमान ऋत्विज को (कभी भी) अर्घ दे ।

व्याख्या-वर्ष के अन्त में आने पर अर्घदान का विधान किया जा चुका लेकिन उसी वर्ष में आदि वा मध्य में भी यज्ञ के लिए ऋत्विक् आये, तब उनका सत्कार अर्घदान से किया जा सकता है । इसीलिए यहां अलग सूत्र की रचना की गई है ।

आसनमाहार्याह - साधु भवानास्तामर्चयिष्यामो भवन्तमिति ॥ १।३।४॥

हरिहरभाष्यम् - कथमर्हयेयुरित्युपेक्षायामाह - आसन..... ....भवन्तमिति । आसनं वारणादिदिदारुमय पीठादि आहार्यैं अनुचरैरानाम्य आह ब्रवीति अर्चक: किमिति एवं कथं भवान्पूज्यः साधु सुखं यथा भवति तथा आस्तां तिष्ठतु । अर्चयिष्यामः पूजयिष्यामो भवन्तमर्चनीयं यावत् । अर्चयिष्याम इति बहुवचनं भार्यापुत्रादिसर्वगृह्यापेक्षम् । तथा च श्रुतिः यत्र वा अर्हन्नागच्छति सर्वगृह्य इव वै तत्र वेष्टयन्तीति ॥ १॥३॥४॥

प्रसङ्ग- सत्कार कैसे करना चाहिए, इसी विधि का वर्णन यहाँ किया गया है।

अनुवाद -(बन्धु-बान्धव या सेवकों द्वारा) आसन मंगवाकर, आतिथेय अर्चनीय व्यक्ति से कहे - आप निःसंकोच भाव से बैठ जाएँ, हम आपकी पूजा करेंगे।

व्याख्या- 'अर्चयिष्यामः' में बहुवचन का निर्देश यह प्रमाणित करता है, कि

यजमान केवल स्वयं ही नहीं, प्रत्युत पर के अन्य परिजनों के साथ पूजा करेंगे।

आहरन्ति विष्टरं पाद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन ॥ १।३॥५॥

हरिहरभाष्यम् -'आहरन्ति ..... कांस्येन' । आहरन्ति आनयन्ति यजमानपुरुषाः विष्टरादिमधुपर्कपर्यन्ताम्यर्हणोपकरणानि । तत्र विष्टरं पञ्चविंशतिः दर्भतरुणमयं कुर्चम् । पञ्चविंशतिदर्भाणा वेण्यग्रे ग्रन्थिभूषिता । विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥ १॥ विष्टरास्त्रिवृतो दर्भकूर्चदा इति । पाद्यं पद्यामाक्रमणीयमुक्तलक्षणं द्वितीयं विष्टरम् । पादार्थमुदकं पादप्रक्षालनार्थं ताम्रादिपात्रस्थं जलं सुखोष्णम् । अर्घगन्धपुष्पाक्षतकुशतिलशुभ्रसर्षपदधिर्यान्वितं सुवर्णादिपावस्थमुदकम् । आचमनीयम् आचमनार्थं कमण्डलुसम्भृतं जलम् । मधुपर्क कांस्यपात्रस्थं दधिमधुघृतं कांस्यपात्रेणाच्छादितम् ॥ १३॥५॥

प्रसङ्ग- पूर्वनिर्दिष्ट ।

अनुवाद - याजक के सेवक विष्टर अर्थात् मुट्ठीभर कुश की घास, पाद्य अर्थात पैर रखने के लिए कुशासन, पैर धोने के लिए ताम्बे के बर्तन में सुखोष्ण जल, अर्थात् सोने के बर्तन में गन्ध, पुष्प, चावल, कुश, तिल, सफेद सरसों, दही, दूर्वा जल, आचमन के लिए शीतोष्ण जल, मधुपर्क अर्थात् कांसे के बर्तन में रखा हुआ दही, मधु तथा घी, जो कांसे के बर्तन से ही ढंका हो, लायें।

व्याख्या- आहरन्ति अर्थात् लाते हैं । यज्ञ करने वाले व्यक्ति पूजा के सभी उपकरण जुटा लें । (जैसे विष्टर अर्थात् पच्चीस तरुण कुशों का समूह। इसका लक्षण इस प्रकार है

'पञ्चविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषिता।

विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥

पाद्यम् –'पद्भ्यां हितम्' इस विग्रह के अनुसार यह शब्द दूसरे विष्टर के लिए प्रयुक्त हुआ है । यदि पद धातु का अर्थ गत्यर्थक माना जाय तो 'पाद्यम्' अर्थ सुलभ हो सकता है । 'पादार्थम्' का अर्थ पैर धोने के लिए जल । आचमनीयम्-आचमन के लिए कमण्डलु या पवित्र पात्र का जल । मधुपर्क-दही, घी और शहद मिलाकर मधुपर्क बनाया जाता है। मधुपर्क कांसे के बर्तन में कांसे के बर्तन से ढंक कर लाना चाहिए।

अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि ॥ १३॥६॥

हरिहरभाष्यम् -'अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि' । अन्यः अर्चकादपरः विष्टरो विष्टरो विष्टरः इत्येवमेकैकं त्रिस्त्रिः त्रीस्त्रीन्वारान् ब्रूयात् । विष्टरादीनि विष्टरप्रभृतीन्पाद्यपादार्थोदकार्याचमनीयमधुपर्कान् ॥ १।३।६ ॥

अनुवाद -पूज्य और पूजक से भिन्न कोई अन्य व्यक्ति विष्टरादि वस्तुओं का तीन-तीन बार जैसे-'विष्टरो विष्टरो विष्टरः' इस प्रकार नामोच्चार करे ।

व्याख्या- हरिहर प्रभृति भाष्यकारों ने '**अन्यः**' का अर्थ यजमान से भिन्न व्यक्ति किया है । त्रिः का अर्थ है- **'विष्टरो विष्टरो विष्टरः प्रतिगृह्यताम्** । इसी तरह **अर्घोऽर्घः प्रतिगृह्यताम्, मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यताम्'** तीन-तीन बार प्रत्येक शब्द का उच्चारण करें।

विष्टरं प्रतिगृह्णाति ॥ १।३।७॥

हरिहरभाष्यम् - 'विष्टरं प्रतिगृह्णाति' । प्रत्यङ्मुखेन यजमानेन तिष्ठता दत्तमासनात् पश्चिमे प्राङ्मुखस्तिठन्नर्घ्यः पूर्वोक्तलक्षणं विष्टरं तूष्णीं पाणिभ्यामुदगग्रमादत्ते ॥ १।३।७ ॥

अनुवाद-विष्टर को वर आदि ग्रहण करें ।

व्याख्या - यजमान पूर्व की ओर मुख करके , जिस व्यक्ति को अर्घ्यप्रदान

करना है उन्हें पश्चिमाभिमुख करके विष्टर बिना कुछ बोले प्रदान करें।

वर्षोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तममितिष्ठामि यो मा कश्चाभिदासति ॥ इत्येनमभ्युपविशति ॥ १।३।८ ॥

हरिहरभाष्यम् - 'वर्षोऽस्मि'.....: भ्युपविशति' । वर्षोऽस्मीति मन्त्रान्ते एनं विष्टरमुदगग्रमासने निधायाभ्युपविशति ॥ १।३।८ ॥

मन्त्रार्थः -अयं आत्मानं स्तोति अघ्र्याय । कुलज्ञानाचारवपुर्वयोगुणैरहं समानानां सजातीयानां मध्ये वर्मः श्रेष्ठः ज्येष्ठः अस्मि भवामि, उद्यतामुदयं प्रकाशं कुर्वतां ग्रहनक्षत्रादीनां मध्ये सूर्य इव । किञ्च इमं विष्टरं तं पूरुपमूहिश्य विष्ट रवत् बद्धमभिलक्ष्यीकृत्य तिष्ठामि अधः कृबो. पर्युपविशामि। यः कश्चन मा मामभिदासति उपक्षीणं कर्तुमिच्छति । दसु उपक्षये ॥ १।३।८ ॥

अनुवाद-'वर्षोऽस्मि' इत्यादि मंत्र को पढ़ते हुए वेदी के अभिमुख होकर बैठे।

मंत्रार्थ -(अथर्वण ऋषि; अनुष्टुप् छन्द; विष्टर देवता।) मैं अपने सजातीयों के बीच में उसी प्रकार से श्रेष्ठ बनूं , जैसे उदीयमान नक्षत्रादि के बीच सूर्य श्रेष्ठ है । इस आसन पर मैं उन्हें पराजित कर बैठता हूँ, जो मुझे हीन बनाने की कामना मन में लिये हैं।

पादयोरन्यं विष्टर आसीनाय ॥ १॥३॥९॥

हरिहरभाष्यम् - पादयोरन्यं विष्टर आसीनाय' । विष्टरे आसीनायाायान्यं विष्टर यजमानः पर्ववदाति स च तं पर्ववत्प्रतिगृह्य प्रक्षालितयोः
पादयोरधस्ताद्वर्ष्मोऽस्मीत्यनेन मन्त्रेण निदधाति ॥ १।३।९ ।।

अनुवाद- विष्टर पर बैठे हुए पुरुष को पैर रखने के लिए दूसरा विष्टर हैं।

व्याख्या-ओल्डेनवर्ग ने खादिरगृह्यसूत्र-गत 'विष्टरमास्तीर्य' के आधार पर 'पादयोरन्यं विष्टर आसीनाय' का अनुवाद 'With the feet (he threads). the other bundle of grass' किया है; यह भी

अनुपयुक्त प्रतीत होता है। क्योंकि विष्टर का अर्थ 'घास का गठ्ठर' नहीं होता है। यह एक यज्ञीय पारिभाषिक है। इसके अनेक लक्षण एवं कतिपय परिभाषाएँ दी गई हैं, जिसके सम्बन्ध पाश्चात्य विद्वान् अनभिज्ञ हैं । इस सम्बन्ध में निम्नलिखित लक्षण द्रष्टव्य है

पञ्चाशता भवेद् ब्रह्मा तदर्धेन तु विष्टरः । ऊर्ध्वकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः ॥

अथवा- 'दक्षिणावर्त्तब्रह्मा च वामावर्तस्तु विष्टरः'।

अथवा-**'पञ्चविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषिता। विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥**

विष्टर का निर्माण पच्चीस कुशों से होता है, इसे वामावर्त्त होना चाहिए।
गृह्यपरिशिष्ट के अनुसार मधुपर्क

'वरस्य या भवेच्छाखा तच्छाखा गृह्यचोदिता। मधुपर्कः प्रदातव्यो ह्यन्यशाखेऽपि दातरि' ॥

जिस शाखा का वर हो, उसी शाखा के गृह्यसूत्र में बतलाई गई विधि से उसे मधुपर्क देना चाहिए-भले ही दाता की शाखा कोई भी हो। किन्तु याज्ञिक परम्परा इस सिद्धान्त से भिन्न है, इस परम्परा के अनुसार कर्म । जिस शाखा के अनुसार हो रहा हो, उसी शाखा की पद्धति से मधुपर्क दिया जान । चाहिए । मधुपर्क में जूठे का विचार नहीं होता **'मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च। नोच्छिष्टस्तु भवेद्विप्रो यथाऽत्रेवंचनं तथा ॥** मधुपर्क प्रायः घी, दही और मधु को मिलाकर बनाया जाता है। गदाधर' मतानुसार दही के अभाव में दूध या पानी मिलाकर भी मधपर्क तैयार किया' सकता है । आश्वलायन के अनुसार मधु के अभाव में गुड या घी मिलाकर भी का चलाया जा सकता है।

सध्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ॥ १३॥१०॥

हरिहरभाष्यम् -'सव्यं पादं .....प्रक्षालयति' । ततोऽन्येन पाद्यमिति त्रिरुक्ते यजमानर्पितं पाद्योदकमादाय वामं चरणं प्रक्षाल्य इतरं प्रक्षालयति क्षत्रियादिरर्घ्यः ।

अनुवाद- बांया पैर धोकर ही दाहिना पैर धोयें ।

व्याख्या- ब्राह्मण-भिन्न क्षत्रियादि वर दूसरों के द्वारा पाद्य शब्द का तीन बार करने पर यजमान के द्वारा प्रदत्त पाद्य से पहले बांया पैर धो लेने के बाद ही दाहिना पैर धोयें।

ब्राह्मणश्चेद्दक्षिणं प्रथमम् ॥ १।३।११॥

हरिहरभाष्यम् - यदि ब्राह्मणोऽर्घ्यः स्यात्तदा प्रथमं दक्षिणं प्रक्षाल्य वामं प्रक्षालयति ॥ १।३।११॥

अनुवाद-यदि वर ब्राह्मण हो तो पहले दाहिना पैर धोये।

व्याख्या-पाद्य ग्रहण करने वाला यदि ब्राह्मण हो तो दाहिना पैर धोते समय निम्नलिखित मंत्र पढ़कर पैर धोयें।

विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्याय विराजो दोह इति ॥ १॥३॥१२॥

हरिहरभाष्यम् - 'विराजो....."दोह इति' । विराजो दोहोऽसीत्यावृत्तेन मन्त्रेण ॥ १।३।१२॥

मन्त्रार्थः- प्राणधारणादिगुणैः सकलसौहित्येन विविधतया राजत इति विराडन्नं तस्य विराजो दोहः परिणामसारो रसः स ब्रमसि भवसि । हे उदक ! तं ब्रां विराजो दोहमशीय अश्नुवै व्याप्नुयाम् । किञ्च मयि विषये या पाद्या पादयोः साध्वी सपर्या तस्य तदर्थं विराजो दोहः मन्त्रसंस्कृतं जलं भवेति ॥

अनुवाद-(ऋषि प्रजापति; यजुष् छन्द; जल देवता।) हे जलाभिमानी देव ! तुम जिस अन्नरस या विशिष्ट दीप्ति से परिपूर्ण हो, वह मुझमें भी व्याप्त करो।

अपना पद-परिचर्या के निमित्त मैं अभिमन्त्रित जल का प्रयोग करता हूँ।

अर्घ्यं प्रतिगृह्णाति-आपः स्थः युष्माभिः सर्वान् कामानवाप्नवानि इति ॥ १।३।१३ ॥

हरिहरभाष्यम् — 'अर्घं प्रतिगृह्णाति' । ततोऽर्घं इत्येतविरुक्ते यजमानदत्तमर्घम् आपः स्थ..... ..वानीति'। आपः स्थ युष्माभिरित्यनेन मन्त्रेण प्रति.. गृह्णाति ॥ १।३।१३ ॥

मन्त्रार्थः-हे आपः ! यूयमापः स्थ आदि भवथ । युष्माभिः कृत्वा सर्वान्कामानभीष्टार्थान् अवाप्नवानि लभेयम् ॥

अनुवाद -'आपः स्थ.....' इत्यादि मंत्र पढ़कर (पूजक वरादि) यजमान दिये गगे अर्घ्यजल को ग्रहण करता है ।

मंत्रार्थ -(ऋषि प्रजापति; जलदेवता; यजुष् छन्द ।) हे जलाभिमानी देवर आप स्थिर हो जायें, ताकि आपकी दया से मैं अपने सम्पूर्ण मनोरथों की कर सकूँ।

निनयन्नभिमन्त्रयते- समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टा अस्माकं वीरा मा परासेचिमत्पयः। इति ॥ १।३।१४॥

हरिहरभाष्यम् -'निनयन्नभि' 'त्पय इति' । प्रतिगृहीतमर्घं शिरसाऽभिवन्द्यनिनयन् भूमी प्रवाहयन् अभिमन्त्रयते समुद्र व इति मन्त्रेण ।। १।३।१४ ।।

मन्त्रार्थः -हे आपः ! वो युष्मान् समुद्रं प्रहिणोमि, गमयामि । अतः स्वां योनि स्वकारणभूतं समुद्रं अभिलक्ष्यीकृत्य गच्छत व्रजत । किञ्च युष्मत्प्रसादाच्चास्माकं वीराः पुत्रा भ्रातरः अरिष्टा अनुपहताः सन्तु । मत् मत्तः पयः अर्घादिमङ्गलं जलं मापरासेचि अपगतं मास्तु सदैवाहमयो भवानीत्यर्थः ।। १।३।१४ ।। **अनुवाद-** (उस अभिमंत्रित जल को पढ़कर

धरती पर) प्रताहित करते हुए 'समुद्रं वः प्रहिणोमि'..' इत्यादि मंत्र पढ़े।

मंत्रार्थ- (ऋषि अथर्वण; अनुष्टुप् छन्द, जल देवता।) हे जलाभिमानी देव ! आपने हमारी अभिलाषाएँ पूरी कर दी हैं, अतः अब हम आपको आपके जन्मस्थान सागर में पुनः प्रतिष्ठित करते हैं। अब आप वहाँ बिलकुल निश्चित होकर जायें । आपकी कृपा से हमारे सभी बेटे, पोते और सगे-सम्बन्धी सुखी तथा सदैव स्वस्थ रहें। हमें कभी पानी की कमी न हो, सदैव हम ऐसे ही समादरणीय बने रहें ।

आचामति-आमागन्यशसा सासृज वर्चसा । तं मा कुरु प्रियं प्रजानामधिपति पशूनामरिष्टिं तनूनाम् । इति ॥ १॥३॥१५॥

हरिहरभाष्यम् -'आचाम....न्तनूनामिति' । तत आचमनीयमिति त्रिरन्योक्ते यजमानदत्तमाचमनीयं प्रतिगृह्य-आमागन्यशसेत्यनेन मन्त्रेणाचामति सकृत्प्राश्नाति जलम् । ततः स्मार्तमाचमनं करोति एवं सर्वत्र ॥ १।३।१५ ॥

मन्त्रार्थः - हे वरुण जलेश! तमेवंरूपेण ब्रामाश्रितं मा मां यशसा सहभावं सामीप्य वा अगन् आगमय । आङुपसर्गः अगन्निति क्रियापदेन सम्बध्यते। तथा वर्चसा ब्रह्मावर्चसेन संसृज संसृष्ट कुरु। किञ्च प्रजानां पुत्रपौत्रादीनां प्रियं पशूनां गवाश्वादीनामधिपतिं स्वामिनं च तथा तनूनां देहावयवानां शरीराणां वा अरिष्टमहिंसकं कुरु । हिसाऽत्र - अनभ्यासेन वेदानामाचारस्य च लङ्घनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसतीत्यादिदर्शिता ।

अनुवाद-'आमागन् यशसा' इत्यादि मंत्र का उच्चारण करता हुआ (वर यजमान द्वारा दिये गये आचमन योग्य ज़ल से आचमन करें ।

मन्त्रार्थ - ऋषिः परमेष्ठी; बृहती छन्द; वरुण देवता। , हे वरुणदेव ! मैं आपका आश्रित हूँ। मुझे आप यशस्वी बनायें, ब्रह्मवर्चस्वी बनायें। आपकी कृपा से मै समाज में लोकप्रिय और पशुधन का स्वामी बनूँ, मेरे शारीरिक अवयव सर्वथा स्वस्थ बने रहें ।

मित्रस्य ब्रा इति मधुपर्कं प्रतीक्षते ॥ १।३।१६ ॥

हरिहरभाष्यम् -'मित्रस्य ब्रेति मधुपर्कं प्रतीक्षते' । ततो मधुपर्क इति त्रिरयेनोक्ते यजमानहस्तगतमुद्धाटितं मधुपर्कं मित्रस्य ब्रेति मन्त्रेणार्घ्यः प्रतीक्षते पश्यति ॥ १।३।१६ ॥

अनुवाद– 'मित्रस्य ब्रा' इत्यादि मंत्र का उच्चारण करता हुआ वर आदि यजमान-प्रदत्त मधुपर्क (दधि, मधु, घृत) को देखे ।

मंत्रार्थ - हे मधुपर्क ! मैं तुम्हें सूर्य की दृष्टि से देखता हूँ। अर्थात् मूर्य की परम कृपा से ही मैं तुम्हें देखता हूँ।

विशेष-शुक्लयजुर्वेदसंहिता में यह मंत्र अनुपलब्ध है। आचार्य विश्वनाथ ने भी इस कथन की पुष्टि की है। कात्यायनश्रौतसूत्र (२।२।१२) में यह प्राशित्र प्रतीक्षण के अभ्यन्तर विनियुक्त है । वहीं से यहाँ संगृहीत है।

देवस्य ब्रेति प्रतिगलाति ॥ १।३।१७॥

हरिहरभाष्यम् - 'देवस्य ब्रेति प्रतिगृह्णाति'। देवस्य ब्रेति मन्त्रेण यजमानदत्तं मधुपर्कं दक्षिणहस्तेन प्रतिगृह्णाति ॥ १।३।१७ ॥

अनुवाद-'देवस्य ब्रा...' इस सम्पूर्ण मंत्र का उच्चारण करते हुए वर मधुपर्क ग्रहण करे।

(मंत्र)- देवस्य ब्रा सवितः प्रसवेऽश्विनो हभ्यां पूष्णोर्हस्ताभ्यां प्रतिगृह्णामि ।

मंत्रार्थ- (ऋषि प्रजापति; छन्द गायत्री; देवता सूर्य ।) हे मधुपर्क के अधिष्ठाता देव ! मैं तुम्हें ऐश्वर्य के निमित्त सूर्य की आज्ञा, आश्वनाकुमारी की बाहों , पूषन् के हाथों से ग्रहण करता हूँ।

सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयोति । 'नमः श्या यान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि' इति ॥ १।३।१८॥

हरिहरभाष्यम् - 'सव्ये पाणी..... निष्कृन्तामीति' । तं मधुपर्क वामहस्ते

निधाय दक्षिणस्य पाणेरनामिकाङ्गुल्या त्रिवारमालोडयति नमः श्यावास्येति मन्त्रेण ॥ १।३।१८॥

मन्त्रार्थः-हे अग्ने ! ते तुभ्यं नमः । किं भूताय श्यावास्याय कपिशमुखाय । ते तव अन्नशने अन्नाशने अद्यत इत्यन्नं तस्याशने अदनीये मधुपर्के । हर श्छान्दसः । यद्रव्यमाविद्धं संश्लिष्टमनदनीयं तं निष्कृन्तामि निरस्यामि ।।

अनुवादः–'नमः श्यावेति' मंत्र को पढ़ते हुए बाँयें हाथ में मधुपर्क लेकर दाहिने हाथ की अनामिका अँगुली से उसका आलोडन करे ।

मन्त्रार्थ- (ऋषि प्रजापति; यजुष् छन्द; देवता सविता-निरुक्षण ।) हे कपिश वर्ण मुखवाले अग्निदेव ! सर्वप्रथम मैं आपको प्रणाम करता हूँ, पुनः आपके भोज्य पदार्थ में जो कुछ दूषित द्रव्य मिल गया है, उसे निकाल देता हूँ।

अनामिकाङ्गुष्ठेन च त्रिनिरुक्षयति ॥ १।३।१९ ॥

हरिहरभाष्यम् - ' अनामिकाङ्गुष्ठेन च त्रिनिरुक्षयति ।' अनामिका च अङ्गुष्ठश्च अनयोः समाहार अनामिकाङ्गुष्ठं, तेन त्रिवारं निरुक्षयति पात्राद् बहिर्निर्गमयति चकारात्प्रतिसंयवनं निरुक्षणम् ।। १।३।१९॥

अनुवाद-अनामिका अंगुलि और अंगूठे से मधुपर्क का अनुपयुक्त अंश तीन बार वाहर निकाल दे।

विशेष - वसु, रुद्र और आदित्यं के उद्देश्य से तीन बार निरीक्षण करे ।

तस्य त्रिः प्राश्नाति । यन्मधुनो मधव्यम परमह. रूपमन्नाद्यम् । तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादा ऽसानीति ॥१३॥२०॥

हरिहरभाष्यम् - 'तस्य त्रिः' 'नादोऽसानीति' । तस्य मधुपर्कस्यैकदेशमादाय यन्मधुनो मधव्यमित्यादिना मन्त्रेण अनेन मन्त्रेणसकृत्प्राश्य पुनरने व मन्त्रेण उच्छिष्ट एव द्वितीयं प्राश्य तथैव तृतीयं प्राश्नाति ॥ १।३।२०

मन्त्रार्थः - हे देवाः! मकरन्दस्य यन्मधव्यं मधुनि साधु परममुत्कृष्टं रूपयति

प्रकाशयति देहसङ्घातमिति रूपम् । अन्नाद्यं व्रीह्यादिवत्प्राणधारकमन्नोपादानकं च तेन सर्वरूपोपपन्नेन-रसेनोक्तविशेषणविशिष्टेनाहं परमः सर्वभ्यो गुणाधिकः मधव्यो मधुपर्काहः अन्नादः सदन्नभोक्ता च असानि भवानि ।

अनुवाद-फिर उसे 'यन्मधुनो' इत्यादि मंत्र पढ़कर तीन बार प्राशन करें ।

मन्त्रार्थ- (ऋषि कुत्स; छन्द जगती; देवता मधुपर्क ।) हे देवता ! फलों के का जो मधुयुक्त, उत्कृष्ट, सामान्य भोजन रस मधु है, उसी रुचिकर, सुस्वाद प्राणधारक रस से मैं सर्वाधिक सुन्दर भोजन का भोक्ता बने ।

मधुमतीभिर्वा प्रत्युचम् ॥ १॥३॥२१॥

हरिहरभाष्यम् -'मधुमतीभिर्वा प्रत्यृचम्' । मधुव्वाता इति तिसृभिऋग्भिः प्रत्यचं प्रतिमन्त्रं वा पूर्ववत्तिः प्राश्नाति ॥ १।३।२१ ॥

अनुवाद-अथवा मधुपर्कप्राशन के समय 'मधुमतीभिः' निम्नलिखित तीन ऋचाओं का क्रमशः पाठ करते हुए तीन वार प्राशन करे ।

(१) मधुव्वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीनः सन्त्वोषधीः।(य० सं० १३।२७)

मन्त्रार्थ- (ऋषि गौतम; छन्द गायत्री; देवता विश्वेदेव ।) मधुमय हवा बहे नदियों में मीठा जल प्रवाहित हो, हमारे लिए वनस्पति मधुमय हों।

(२) मधुनक्तमुतोषसो मधुमत्पार्थिव, रजः मधुद्यौरस्तु नः पिता। (य० सं० १३।२८)

मन्त्रार्थ- (ऋषि गौतम; छन्द गायत्री; देवता विश्वेदेव ।) रात और प्रभ । मधुमय हो, धरती सरस हो, पिता की तरह परिपालक आकाश भी मधुर हो जाये।

(३) मधुमान्नो वनस्पतिमधुमाऽअस्तु सूर्यः । माध्वीवो भवन्तु नः। (य० सं०

१३।२९)

मन्त्रार्थ- (ऋषि गौतम; छन्द गायत्री; देवता विश्वेदेव ।) औषधियों के स्वामी सोम हमारे लिए आप रसवान् हो, सूर्य संताप रहित और आनन्दकर हो , गाये हमें मीठा-मीठा दूध दें।

पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात् ॥ १।३।२२

हरिहरभाष्यम -'पुत्राया.... 'दद्यात्'। मधुपर्कस्य शेषप्रतिपत्तिमाह - पुत्राय सनवे अन्तेवासिने उपनयनप्रभृतिविद्यार्थिब्रेन आचार्यकुलवासिने शिष्याय वा , कथम्भूताय उत्तरत आसीनाय उच्छिष्टं प्राशितशेषं मधुपर्क प्रयच्छेत् ॥

अनुवाद - उत्तर की ओर बैठे हुए अपने पुत्र अथवा शिष्य को मधुपर्क की अंश दे दे ।

सर्वं वा प्राश्नीयात् ॥ १।३।२३॥

प्राग्वासञ्चरे निनयेत् ॥ १।३।२४ ॥

हरिहरभाष्यम् - अथवा सर्वं भक्षयेत् ।। यद्वा प्राक् पूर्वस्यां दिशि असञ्चरे जनसञ्चारयनितदेशे त्यजेत् । अत्र पूर्वपूर्वासम्भवे उत्तरोत्तरां प्रतिपत्ति कुर्यात्॥

अनुवाद - या स्वयं ही सारा मधुपर्क खा जाय । अथवा उसे जनसंचार शून्य पूर्वदिशा में फेंक दे।

व्याख्या- यह एक व्यवस्थित विकल्प है। गुरु अपने शिष्य को अवशिष्ट मधुपर्क दे दे। पिता अपने प्रिय पुत्र को दे दे। वर और स्नातक सम्पूर्ण मधुपर्क का स्वयं भक्षण करे। किन्तु व्यवहार में यह अवशिष्ट मधुपर्क नाई या सेवक उठा लेता है।

आचम्य प्राणान सम्मृशति । वाङ्म आस्ये अस्तु, नसोर्म प्राणोऽस्तु, अक्ष्णोर्मे चक्षुरस्तु, कर्णयोर्मे श्रोत्रमस्तु, बाह्वोर्बलमोरोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे

सहेति ॥ १।३।२५॥ .

हरिहरभाष्यम् -'आचम्य ... 'सहेति' । आचम्य प्राणान्सम्मृशति वाङ्म इत्यादिभिर्मन्त्रैः । तद्यथा-आचमनं सकृन्मन्त्रेण । ततस्त्रिराचम्य एवं सर्वत्र स्मार्ताचमनं कृत्वा प्राणानिन्द्रियाणि सम्मृशति सजलमालभते । तद्यथा-वाङ्म आस्येऽस्त्विति मुखं, कराग्रेण नसोर्मे प्राणोऽस्त्विति तर्जन्यङ्गुष्ठाभ्यांयुगपदक्षिणादिनासारन्ध्रे, अक्ष्णोर्मे चक्षुरस्त्विति अनामिकाङ्गुष्ठाभ्यां युगपच्चक्षषी, कर्णयोमें श्रोत्रमस्त्विति मन्त्रा क्षिणोत्तरौ कर्णौ, बाह्वोर्मे बलमस्त्विति कर्णवदबाहू, उर्वोमें ओजोऽस्त्विति युगपद्धस्तेनोरू, अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरः प्रभृतीनि पादान्तानि सर्वाण्यङ्गान्युभाभ्यां हस्ताभ्यामालभते।

अनुवाद-आचमन करके जल सहित इन्द्रियों का स्पर्श करे । इन्द्रिय-स्पर्श करने के लिए 'वाङ्म आस्ये...' इत्यादि मन्त्र है । इन्हें अङ्गन्यास भी कहते हैं।

इस मन्त्र से निम्न प्रकार अङ्गन्यास करें - 'वाङ्म आस्ये अस्तु' पानी सहित कराग्र से मुँह का स्पर्श करे। 'नसोर्मे प्राणोऽस्तु' तर्जनी और अँगूठा से एक साथ दोनों नासापुटों का स्पर्श करे । 'अक्ष्णोर्मे चक्षुरस्तु' यह पढ़कर दायें-बायें कान का स्पर्श करे । 'बाह्वोर्मे बलमस्तु' यह पढ़कर दोनों बाहों का स्पर्श करे। 'ऊर्वोम ओजोऽस्तु' इससे दोनों जाँघों का स्पर्श करें। इसके बाद का अंश पढ़कर शिर से पैर तक के सभी अंगों का स्पर्श करें।

आचान्तोदकाय शासमादाय गौरिति त्रिःप्राह ॥ १।३।२६ ॥

हरिहरभाष्यम् -'आचान्तो.....'प्राह' । आचान्तमुदकं येन स आचान्तोदकस्तस्मै अर्घ्याय शासं खड्गं गृहीत्वा यजमानः गौर्गौर्गौरालभ्यतामिति प्राह ब्रवीति ॥ १।३।२६ ॥

अनुवाद- आचमन किये अतिथि के प्रति आतिथेय तीन बार तल में लेकर

गौः शब्द का उच्चारण करे । यथा---गौगौगौः । इति ।

प्रत्याह-माता रुद्राणां दुहिता वसूना स्वसाऽदित्यानाममृतस्य नाभिः। प्रनुवोचञ्चिकितुषे जनाय मागामनागामदिति वधिष्ट । मम चामुष्य च पाप्मानं हनोमीति यद्यालभेत ॥ १।३।२७ ॥

हरिहरभाष्यम् - ततोऽर्थ्यः प्रत्याह- 'माता रुद्रा....'लभेत' । ततो माता रुद्राणामित्यादि वधिष्टेत्यन्तं मन्त्रं पठित्वा मम चामुकशर्मणो यजमान पाप्मानं हनोमीति पठति यदि गामालभेत पाप्मानं हनोमीति प्रयोगः ॥ १।३।२७

मन्त्रार्थः- अमृतस्य क्षीरस्य नाभिः राश्रयः नु वितर्के, छन्दसि व्यवहिताश्चेत्युक्तेरुपसर्गस्य वोचमित्यत्रान्वयः। प्रवोत्र ब्रवीमि चिकितुषे चेतनावते जनाय यूयं इमां गां मा वधिष्ट मा घ्नत किन्तु गोपशं विधातुं घ्नतेति तात्पर्यार्थः । किम्भूतामनागामनपराधाम् । अदितिं देवमातरं पयोदानात् । अहं ममामुष्याघयितुश्च पाप्मानं गोस्थाने हनोमि हन्मीति ॥

अनुवाद -प्रत्युत्तर में वह पूज्य पुरुष 'माता रुद्राणाम् ...' इत्यादि मंत्र पढ़कर गौ का आलम्भन करता हुआ कहे-मैं अपने और आतिथेय दोनों के पापों को नष्ट कर रहा हूँ।

मंत्रार्थ- रुद्रों की माता, वसुओं की बेटी, आदित्यों की बहन, यह गौ अमृतकल्प दूध का आश्रय है, इसे मैं कहता हूँ। चैतन्य मानव के लिए देवताओं की मां के स्वरूप इस निरपराध गौ को मत मारो। **गवालम्भन** - उक्त मंत्र में 'यथालभेत्' का अर्थ बड़ा ही संदिग्ध एवं विवादास्पद है । पारस्करगृह्यसूत्र के सुप्रसिद्ध व्याख्याता हरिहर, गदाधर, कर्क, जयराम, विश्वनाथ जति आचार्यों में से किसी ने भी 'आलम्भन' शब्द की व्याख्या नहीं की है। बी०आप्टे के शब्दकोष में इस शब्द के अनेक अर्थ दिये गये हैं। यथा (आ + लभ+घन + मुम् च पक्षे ल्युट्)-पकड़ना, कब्जा करना, स्पर्श करना, फाड़ना, मार डालना (विशेषतः यज्ञ में पशुबलि देना)।

याज्ञिक प्रसंगानुसार 'गवालम्भन' का अर्थ स्पष्टतः गोबलि ही उपयुक्त प्रतीत होता है। पद्धतिकारों को भी इस समस्या का सामना करना पड़ा है । 'संस्कारदीपक' में इसकी अर्थच्छवि इस रूप में दर्शनीय है- "अन्त्य एव पक्षो ग्राह्य इति पद्धतिकृद्भिस्तदनुसारेणैव प्रयोगो लिखितः। अत एव गोसम्मुखीकरणकाले सूत्रोपदिष्टमपि खड्गर्धिनं 'गौर्गौर्गौरि'ति वाक्यरोषत्वेन भाष्यादलिखितमपि 'आलभ्यताम्' इति वाक्यं पद्धतिकारैरुपेक्षितम्- अर्थलोपेन तद् बाधात् ।"

इस सन्दर्भ में हरिहर का भी विचार द्रष्टव्य है- 'यद्यप्येवं मधुपर्के गवालम्भ आचार्येणोक्तः तथाप्यस्वर्ग्यत्वाल्लोकविद्विष्टत्वाच्च कलौ न विधेयः ।'

याज्ञवल्क्य प्रभृति अन्य स्मृतिकारों ने भी इसका विरोध किया है। पराशरस्मृति का इस सन्दर्भ में कथन भी द्रष्टव्य है - **'यज्ञाधामं गवालम्भं संन्यासं पलपैतृकम्।देवराच्च सुतोत्पत्ति कलौ पञ्च विवर्जयेत् ॥'** उपर्युक्त मंत्र में प्रयुक्त 'आलम्भन' शब्द भी तो गो-बलि का निषेध ही करता है। 'विधि' की अपेक्षा उक्त मंत्र में गोरक्षा का महत्त्व ही तो प्रख्यापित हुआ है ।

सम्पूर्ण प्रकरण पर विचार करने से हम इस निष्कर्ष पर आते हैं कि 'गवालम्भन' की निन्दा पारस्कर के समय में प्रारम्भ हो चुकी थी। यही कारण है कि इस गृह्यसूत्र का २६वां सूत्र अपूर्ण है । इस सूत्र में 'गौः आलभ्यताम्' का स्पष्ट उल्लेख नहीं है । 'आलभ्यताम्' शब्द का प्रयोग तो है ही नहीं। २७वें सूत्र के अन्त में यह शब्द अवश्य प्रयुक्त है। परन्तु उससे पूर्व यदि शब्द का प्रयोग सम्पूर्ण प्रकरण को ही अव्यवस्थित बना देता है। पारस्कर मुनि की आवाज यहाँ उतनी बुलन्द नहीं है जितनी अन्य प्रसंगों में अन्य विधिवेत्ताओं की होती है। स्पष्ट रूप से यहाँ उन्होंने किसी भी पक्ष का समर्थन नहीं किया है। अतः वर्तमान परिपेक्ष के अनुसार गौदान की विधि विविध क्षेत्रीय पद्धति के अनुसार मधुपर्क के बाद की जाती है।

अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हतं उत्सजत ता उत्सजत तृणान्यत्त्विति ब्रूयात् ॥ १।३।२८॥

हरिहरभाष्यम् - 'अथ यद्यु....'ब्रूयात् ।' अथ यद्युत्सिसृक्षेत् अथवा अर्घ्यो यदि गामुत्स्रष्टुमिच्छेत्तदा मम चामुकशर्मणो यजमानस्य च पाप्मा हतः ॐ.. तृणान्यत्त्विति ब्रूयात् । ओमित्यन्तमुपांशु पठित्वा उत्सृजत तान्यत्त्विति ब्यादि मुच्चैः पठेत् ॥ १।३।२८ ॥

अनुवाद- और यदि उस गाय को स्वच्छन्द विचरण हेतु छोड़ना है यह सोचते हुये प्रार्थना करे कि आतिथेय के सारे पाप विनष्ट हो गये, अब यह गौ छोड़ दी गयी है। अब यह अपनी इच्छानुसार घूमकर घास खाये ।

न ह्वेवामा सोऽर्घः स्यात् ॥ १३॥२९॥

हरिहरभाष्यम् -'न ह्वेवामां सोऽर्घः स्यात्' । तु शब्दः पक्षव्यावृत्तौ । अर्घः अमांसः पश्वालम्भजितो नैव भवेत् । अत्र यद्यालभेत यद्युत्सिसृक्षेदित्यनेन सूत्रेण गवालम्भस्य विकल्पं विधाय न ह्वेवामास इत्यनेन गवालम्भनमर्घमात्रे नियमेन विधत्ते। तथा च सति द्वयोः स्मृोविरोधेन अप्रामाण्ये प्राप्ते व्यवस्थामाह ॥१।३।२९ ॥

अनुवाद-ऊपर गवालम्भ सम्बन्धी वितंडावाद को देखकर पारस्कर पुनः कहते हैं— अर्घ तो मांसरहित नहीं हो सकता।परन्तु स्मृति ग्रन्थों में विरोध होने के कारण कलिकाल में स्मृति ग्रन्थों को प्रमाण मानना चाहिये।

अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात् ॥ १॥३॥३०॥

हरिहरभाष्यम् - 'अधियज्ञं..... 'ब्रूयात्' । अधियज्ञं यज्ञे अधिविवाहं विवाहे कुरुत विदधत गवालम्भं पाप्मानं हनोमीत्यस्यान्ते इत्येवं वदेत् । अन्यत्र पाप्मा हत इति पाप्मानं हनोमीति वा विकल्पः (नान्यत्र ?) इति भावः ॥ १।३।३० ॥

अनुवाद-अतः यज्ञ और विवाह में तो गवालम्भन का विधान करना चाहिये।

टिप्पणी- यहाँ कुछ आचार्यों के मत में इस वाक्य में 'तु' का प्रयोग निषेधार्थक है । तीन निषेधों के कारण यहाँ मांस का निषेध ही अपेक्षित है। याज्ञवल्क्य मनि को स्पष्ट शब्दों में लोकविरुद्ध कहकर इसका निषेध किया है-'अस्वर्ग्य लोक में धर्ममप्याचरेन्न तु' (१।१५६) । हरिहर तथा गदाधर भाष्य के अनुसार मांस प्रयोग का निषेध ही आचार के अनुकूल है। अर्थात प्राचीन काल से ही मांसादि के प्रयोग का विरोध भाष्यकारों ने किया है।

यद्यप्यसकृत् संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयकृतार्घ्या इति श्रुतेः॥१३॥३१॥ । हरिहरभाष्यम् - यद्यप्येवं मधुपर्के गवालम्भ आचार्येणोक्तः तथापि अस्वर्य विशिष्टत्वाच्च कलौ न विधेयः । अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न ब्रिति याज्ञवल्क्यादिस्मृतिषु निषेधदर्शनात् । 'यद्यप्यस....कृतार्घ्या इति श्रतेः ।' यद्यप्यरिसंवत्सरस्य संवत्सरे असकृत्पुनः पुनः सोमेन ज्योतिष्टोमादिना यजेत तदा तदापिसोमयाजिनं कृतोऽर्घ्यो येषां ते कृतार्घ्या एव सन्तः याजयेयुर्यज्ञं कारयेयुर्नाकृतार्घ्या याजयेयुरिति श्रुतिवचनात् । सोमेन यजेतेत्यनेन सोमयागार्थमेव वृता ऋत्विजः अर्घ्या इति गम्यते न यागान्तरार्थम् ॥ १।३।३१ ॥ .

अनुवाद- वर्ष में अनेक बार जब-जब सोमयाग करे, तो उसके ऋत्विजों को व प्रदान करना चाहिए, क्योंकि श्रति का कथन है कि अर्घ्य प्राप्त किये ऋत्विज ही यजमान को यज्ञ करायें।

॥ प्रथमकाण्ड में तृतीय कण्डिका समाप्त॥

चतुर्थी कण्डिका

चत्वारः पाकयज्ञाः-हुतोऽहुतः प्रहुतःप्राशित इति ॥ १।४।१।।

हरिहरभाष्यम् -'चत्वारः पाकयज्ञाः'। पच्यते श्रप्यते ओदनादिकमस्मिन्निति पाको गृह्याग्निस्तस्मिन्पाके नान्यत्रेति भावः । पाके यज्ञाः पाकयज्ञाः । यतः केग्नौ कुर्वीत गाह्यं कर्म यथाविधि । पञ्चयज्ञविधानं च पंक्ति चान्याहिकी गृही। मनुना दैनन्दिनपाको गृह्येऽग्नौ स्मर्यते । ते चत्वारः चतुर्विधा भवन्ति, कथम ? (प्रहुतः प्राशित इति ।' तत्र हुतो होममात्र, यथा सायंप्रातर्होमः । अतः होमबलि कर्म, यथा स्त्रस्तरारोहणम् । प्रहुतो यत्र होमो बलिकर्म भक्षणं च, यथा पक्षादिको प्राशितो यत्र प्राशनमात्रं न होमो न बलिः, यथा सर्वासां गवां पयसि पायसश्रपणान ब्राह्मणभोजनम् । इत्थं चतुर्विधः ॥ १।४।१॥

अनुवाद- पाकयज्ञ चार हैं-१. हुतः- हुत अर्थात् केवल होम; जैसे - सायं प्रातःकालीन होम । २. अहुतः-अहुत अर्थात् होम और बलि विहीन कर्म; जैसे प्रस्तरारोहण । ३. प्रहुतः-अर्थात् होम और बलिहरण दोनों; जैसे- पक्षादि कर्म । ४. प्राशितः-अर्थात् केवल ब्राह्मणभोजनादि कर्म ।

पञ्चसु बहिः शालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन । इति ॥ १।४।२॥

हरिहरभाष्यम् - 'पञ्चसुन्नयन इति' । पञ्चसु संस्कारकर्मसु बहिःशालाया गृहाद् बहिःशाला बहिःशाला मण्डप इति यावत् । तस्यां कर्म भवति । यथा विवाह परिणयने चूडाकरणे क्षौरकर्मणि उपनयने मेखलाबन्धे केशान्ते गोदानकर्मणि सीमन्ता नयने गर्भसंस्कारे । एतेषु पञ्चसु

बहिःशालायामनुष्ठानम् । अन्यत्र गृहाभ्यन्तरे मुख्य शालायामेव ॥ १।४।२॥

अनुवाद - विवाह, मुण्डन, यज्ञोपवीत, केशान्त तथा सीमन्तोन्नयन (बालों का विभाजन, बारह संस्कारों में एक, जिसको स्त्रियाँ गर्भाधान के चौथे, छठे या महीने में मानती हैं)-इन पांच संस्कारों में घर के बाहर बने मण्डप में ही अग्नि की स्थापना होनी चाहिए।

टिप्पणी - पच्यते श्रप्यते ओदनादिकमस्मिन्निति पाकः अर्थात् गृह्याग्निः' । पच् + घञ् =पाकः । गृह्याग्नि में ही हुतादि चारों यज्ञ होने का विधान है । मनु का एक कथन द्रष्टव्य है

'वैवाहिकेऽग्नौ कुर्वीत गाह्यं कर्म यथाविधि ।पञ्चयज्ञविधानञ्च पक्ति
चान्वासिकी गृही' ॥ - मनु० ३।६७

उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय ॥ १॥४॥३॥

हरिहरभाष्यम् -'उपलि.....धाय' । उपलिप्ते गोमयोदकेन उद्धते स्फ्येनोल्लिखितेनेति तिसृभी रेखाभिः अवोक्षिते उदकेनाभ्युक्षिते बहिःशालागृहयोः अन्यतरस्मिप्रदेशे अग्निमुपसमाधाय अग्निं लौकिकमावसथ्यं वा उपसमाधाय स्थापयिबा । अयं च लेपनादिविधिर्न पूर्वः। अपि तु परिसमुह्येत्यादिपूर्वोक्तस्यैवानुवादः, ततश्चात्रानुक्तमपि परिसमूहनमुद्धरणं च सर्वत्र भवति, एष एव विधिर्यत्र क्वचिद्धोम इति वचनात् ॥ १।४।३॥

अनुवाद - गोबर से लिपी जगह में (प्रथम कण्डिका में वर्णित कुशकण्डिका परिसमुहन से उपलेपनादि पांच प्रकार के भूसंस्कारों के पश्चात् अग्निस्थापना कर तथा कुमारी का पाणिग्रहण करना चाहिए ।

निर्मन्थ्य मेके विवाहे ॥ १।४।४ ॥

हरिहरभाष्यम -'निर्म' 'वाहे' । एके आचार्याः विवाहे पाणिग्रहे कि मारणेयमग्नि वैवाहिक-होमाधिकरणमिच्छन्ति ॥ १।४।४ ॥

अनुवाद-कुछ आचार्यों के अनुसार विवाह-संस्कार में अरणिमन्थन से प्राप्त की लेनी चाहिए।

उदगयन आपूर्यमाणपक्षे पुण्याहे । कुमार्याः पाणि गृह्णीयात् ॥ १।४॥५॥ .

हरिहरभाष्यम् -अथ विवाहाख्यं कर्माह--'उदग "लीयात्'। उदगयने मकरादिराशिषड्कस्थिते रवौ आपूर्यमाणपक्षे शुक्लपक्षे पुण्याहे ज्योतिःशास्त्रोक्तविष्टयादिदोषरहिते कुमार्याः अनन्यपूर्विकायाः कन्यायाः । अनेन विंशतिप्रसूतायाः स्मृत्यन्तरविहितस्य पुनर्विवाहस्यानियमः इच्छा चेत्करोति । पाणि गृह्णीयात् पाणि हस्तं स्वगृह्योक्तविधिना गृह्णीयात् ।। १।४।५ ॥

अनुवाद-सूर्य के उत्तरायण होने पर शुक्ल पक्ष में ज्योतिषशास्त्रानुसार " लग्न में कुमारी कन्या का पाणिग्रहण करना चाहिए।

त्रिषु त्रिषु उत्तरादिषु ॥ १॥४॥६॥

स्वाती मृगशिरसि रोहिण्यां वा ॥१॥४७॥

हरिहरभाष्यम् - अस्मिन् अयनपक्षदिनानि नियम्य नक्षत्रनियममाह-त्रिषु.....हिण्यां वा' । उत्तरा आदिर्येषां तान्युत्तरादीनि तेषु कतिषु त्रिषु त्रिषु , तथाहि उत्तराफाल्गुनी हस्तः चित्रा इति त्रीणि, उत्तराषाढा श्रवणं धनिष्ठा इति त्रीणि , तथाउत्तराभाद्रपदारेवत्यश्विन्य इति त्रीणि । स्वाती मृगशिरसि रोहिण्यां वा । एतेषां नक्षत्राणामन्यतमे इत्यर्थः ।। १।४।६-७ ॥

अनुवाद - उत्तरा से प्रारम्भ तीन-तीन नक्षत्रों में (अर्थात्-१. उत्तराफाल्गुनी, हस्त, चित्रा; २. उत्तराषाढा, श्रवण, धनिष्ठा तथा ३. उत्तराभाद्रपदा, रेवती और अश्विनी नक्षत्र पाणिग्रहण के लिए शुभ हैं ।) अथवा-स्वाती, मृगशिरा और रोहिणी नक्षत्र में विवाह करे ।

तिस्रो ब्राह्मणस्य वर्णानुपूर्येण ॥ १।४।८॥

हरिहरभाष्यम् - कुमार्याः पाणि गृह्णीयादिति सामान्येनोक्तं तत्र विशेषमाह-

'तिस्रो....."पूर्येण' । ब्राह्मणस्य द्विजाग्यस्य वर्णानुपूर्येण वर्णक्रमेणतिस्रो ब्राह्मणीक्षत्रियावश्या विवाह्या भवन्ति ।। १।४।८ ।।

अनुवाद-ब्राह्मण वर्णानुक्रम से ब्राह्मणी, क्षत्रिया एवं वैश्य कन्या से विवाह कर सकते हैं।

द्वे राजन्यस्य ॥१॥४९॥

हरिहरभाष्यम् - द्वे क्षत्रियावश्ये राजन्यस्य विवाह्ये भवतः ॥ १।४।९ ॥

अनुवाद - क्षत्रिय उसी क्रम से दो कन्याओं अर्थात् क्षत्रिय एवं वैश्य कन्या से उसी क्रम में विवाह कर सकते हैं।

एका वैश्यस्य ॥ १।४।१०॥

हरिहरभाष्यम् - एका वैश्यैव वैश्यस्य विवाह्या भवति । वर्णानुपूर्व्यग्रहणात् व्युत्क्रमो निषिद्धः ॥ १।४।१० ॥

अनुवाद - पूर्वोक्त क्रम में ही वैश्य केवल स्वजाति की कन्या से ही विवाह कर सकते हैं।

सर्वेषांशूद्रामप्येके मन्त्रवर्जम् ॥ १।४।११॥

हरिहरभाष्यम् -'सर्वे ..... वर्जम्'। सर्वेषां ब्राह्मणक्षत्रियविशां शूद्रामप्ये के विवाह मन्यन्ते तत्र विशेषः । मन्त्रवर्जं मन्त्र रहितं यथा भवति तथा । अत्र द्विजातीविशदापरिणयने आचार्येण मन्त्रवत्क्रियानिषेधात् । अतः शद्रस्य शूद्रापरिणयने मन्त्रवत्क्रियानास्ति किन्तु मन्त्ररहितं क्रियामात्रमिति गम्यते । ततश्च शूद्रस्य शूद्रापरिणयने मन्त्रवद्धोमादि कर्म कुर्वन्ति तदशास्त्रीयम् । एके न मन्यन्ते शूद्राविवाहम्, कुतः ? शूद्रायाः धर्मकार्यप्वनधिकारात् । कुतो नाधिकार इति चेत्, रामा रमणायोपेयते न धर्माय कृष्णजातीयेति निरुक्तकारयास्काचार्यवचनात् । अतो रमणार्थं शूद्रापरिणयनं पक्षे । एवं सति षण्मासदीक्षाद्यनन्तरमग्नि चिब्रा प्रथमं न रामामुपेयादिति निषेध उपपद्यते प्राप्तं हि प्रतिषेधस्य विषयः, यदि रामोढा न स्यात्तदा अग्निचितः कथं तत्प्रथमगमनं प्रतिषिध्येत ? तस्माच्छूद्रापरिणयनमुपभोगार्थमिच्छया

कुर्वतो न शास्त्रातिक्रमः धर्मप्रजारत्यर्थो हि विवाहः । प्रासङ्गिकमभिधायेदानी प्रकृतमाह-तत्र पुण्येऽहनि ॥ १।४११ ॥

अनुवाद- आचार्य पारस्कर के अनुसार चतुर्थ वर्ण में विवाह आदि कर्म में बिना मन्त्रोच्चारण क्रिया के विवाह आदि करना चाहिये । कुछ आचार्य शूद्रकन्या को भी मंत्रोच्चार के बिना ही विवाह करने योग्य मानते हैं।

अथैनां वासः परिधापयति - जरां गच्छ परिधित्स्व वासो भवाकृष्टी शास्तपावा। शतं च.जीव शरदः सुवर्चा रयि च पुत्राननुसंव्ययस्वापुण्मतीदं परिधत्स्व वास इति ॥ १।४।१२॥

हरिहरभाष्यम् - अथैनां .....वास इति' । अथाग्निस्थापनानन्तरमेनां कुमारी वासः अहतं सदशं वस्त्र परिधापयति परिहितं कारयति वरो जरां पठित्वा । कुमारी च स्वयं परिधत्ते ॥ १।४।१२ ॥

मन्त्रार्थः- हे कन्ये । त्वं जरा निर्दुष्टवृद्धत्वं मया सह गच्छ प्राप्नुहि वासश्च मया सम्पादित परिधेहि। आकर कामादिभिरित्याकृष्टयो मनुष्याः तेषां मध्ये अभिशस्तिरभिशापः, शसु प्रमादे । तस्मात्पातीत्यभिशस्तिपावा भव । शतं च शरदो वर्षाणि जीव प्राणिहि । सुवर्चा राय च धनं पुत्रांश्च अनु पश्चात् संव्ययस्व । अतिसुसंवृणीष्व उत्पाद्य राशिं आयुष्मति ! इदं वासः परिधत्स्वेत्यनुवादः ।

अनुवाद –'जरां गच्छ...' इत्यादि मंत्रोच्चारण करते हुए वर कन्या को वाली (कन्या नाइन की सहायता से स्वयं वस्त्र धारण करे)।

मंत्रार्थ- (ऋषि प्रजापति, त्रिष्टुप् छन्द, तन्तुदेवियां ।) हे आयुष्मति ! संसार में कामासक्त पुरुषों के लिए तुम अभिशाप बनो; मेरे साथ सौ साल तक जीओ. मेरे साथ ही वृद्धावस्था को प्राप्त करो; तेज, धन और पुत्रों को उत्पन्न करो। . चिरजीविनि ! इस वस्त्र को धारण करो।

अथोत्तरीयम्-या अकृन्तन्नवयं या अतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ, तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिघत्स्व वास इति ॥

हरिहरभाष्यम् -'अथोत्तरी धत्स्व वास इति'। अथोत्तरीयं वस्त्रपरिधानानन्तरमुत्तरीयं वासः परिधापयति वरो या अकृन्तन्निति मन्त्रमुक्त्वा अत्र परिधापयतीति णिजन्तस्य कारितार्थत्वात्परिधत्स्व वास इति मन्त्रस्यापि तदर्थत्वात्परिधापयिताऽन्य इत्यवगम्यते, स किं वरः अध्वर्युर्वा ? इति संशयः । तत्राध्वर्युः कर्मसु वेदयोगादिति परिभाषाबलात् अध्वर्युः परिधापयितेति चेत्तन्न, स्मार्तेषु कर्मसु अध्वर्योः कर्तृत्वयोगाभावात् । समाख्यया हि अध्वर्योः कर्मसु योगः समाख्या च वेदयोगात्, न च स्मृतिर्वेदः स्मरणादेव स्मृतीनां प्रामाण्यान्न पुनर्वेदमूलत्वेन । अतः समाख्याया अभा वात्स्वयंकर्तृत्वं पाकयज्ञेषु, अतो वर एव परिधापयिता। ननु पूर्णपात्रो दक्षिणा वरा वेति पाकयज्ञेषु परिक्रयार्था दक्षिणा श्रूयते सा च दक्षिणा परिक्रेतव्याभावे नोपद्यते। अतस्तदन्यथानुपपत्त्या अन्यस्य कर्तृत्वं कल्प्यताम् । नैतदेवम् । अन्यस्य ब्रह्मणः परिक्रेतव्यस्य कर्तुविद्यमानत्वात् परिक्रयार्थदक्षिणाश्रवणस्योपपत्तेः । किञ्च वचनाभावे

परस्य कर्म कर्तुं न प्रवर्तते नात्र वचनमस्ति पाकयज्ञेष स्वतोऽन्यकर्तृत्वविधायकम् । श्रौतवत्समाख्यापि नास्ति । ननु स्मृतीनां वेदमूलत्वात् यद्वेदमूलं स्मार्तं कर्म तद्वेदसमाख्या अन्यस्य कर्तृत्वं कल्प्यताम् । मैवम् । यतः स्मृतयोऽनिश्चितवेदमूलाः, जायते किं वेदमूलमिदं कर्म, यद्वेदसमाख्यया अन्यः कर्ता कल्प्यते ? मन्त्रलिङ्गाविरोधोऽपि *परकर्तृके, कथं-सा* मानमुव्रता भव, प्रजापतिष्ट्वा नियुक्तु मह्यम् , अमोहमस्मीत्यादि सा नः पूषाशिवतमेत्यायो वैवाहिकमन्त्राःआत्मलिङ्गास्ते च परकर्तृके विरुद्ध्यन्ते तस्मात्पाकयज्ञेषु स्वयं यजमानस्यैव कर्तृत्वमिति सिद्धम् । अत्र वरोऽपि वाससी परिधत्ते परिधास्यै यशसामेति मन्त्राभ्याम् ।

मन्त्रार्थः- या देवीः देव्यः इदं वासः अकृन्तन् कतितवत्यः या अवयन् वीतवत्यः । वेञ् तन्तुसन्ताने । ओतवत्य इत्यर्थः । यास्तन्तुन् सूत्राणि अतन्वत प्रोतवत्यः तिर्यक् तन्तुसन्ताने ओतवत्य इत्यर्थः । चकाराद्यां

ओतान्प्रोताँश्च तन्तूनभित उभयपार्श्वयोरपि ततन्थ तेनु : तुरीवेमादिव्यापारेण ग्रथितवत्यः । ताः तत्तत्सामर्थ्यदात्र्यो देव्यः स्वकार्यरूपवदिदं वासः ब्रा ब्रां जरसे दीर्घकालनिर्दुष्टजीवनाय संव्ययस्व परिधापयन्तु । पुरुषादिव्यत्ययश्छान्दसः अतो हेतोः आयुष्मति इदम् एतादृशं वासः परिधत्स्व उत्तरीयब्रे वृणीष्व ।।

अनुवाद - इसके बाद 'या अकृन्त...' इत्यादि मंत्रों का उच्चारण करते हुए वर वधु को उत्तरीय अर्थात् ओढ़नी प्रदान करे।

मन्त्रार्थ-(ऋषि प्रजापति, गायत्री छन्द, वस्त्रविधातृ देवियाँ ।) जिन देवियों ने वस्त्र के सूत को काटा, जिन्होंने बुना, जिन्होंने इसे फैलाया, जिन्होंने आड़े-बेड़े तन्तुओं से इसे गूंथा, वे सभी देवियाँ तुम्हें निर्मल निर्दुष्ट जीवन व्यतीत करने के लिए वस्त्र धारण करायें।

अर्थनौ समञ्जयति-समजन्तु विश्वेदेवाः समापो हृदयानि नौ। सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ, इति ॥ १।४।१४ ॥

हरिहरभाष्यम् - 'अर्थनौ...नाविति' । अथ वस्त्रपरिधानानन्तरं परस्परं समञ्जेथामिति प्रैषेण कन्यापिता एनौ वधूवरौ समञ्जयति सम्मुखौ वरकुमार्यौ करोति । अत्र विशेषमाह ऋष्यश्रृङ्गः- 'वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम् । नाम सङ्कीर्तयेद्विद्वान् कन्यायाश्चवमेव हि' । तत्र वरः-समजन्तु विश्वेदेवा इत्यादिकं मन्त्रं कन्या. सम्मुखीभूतः पठति ।

अत्र कन्यादानप्रयोगो लिख्यते -

उत्तरत्र पित्रा प्रत्तामिति सूत्रस्मरणात् । तद्यथा-
अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः-प्रपौत्राय-
अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणःपौत्राय-
अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः-पुत्राय-इति
वरपक्षे।अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः-प्रपौत्रीम्-
अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः-पौत्रीम्,

अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम्, इति कन्यापक्षे ।एवमेव पुनवारद्वयमुच्चार्यामुकगोत्रायामकप्रवरायामकशर्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे । पक्ष वर्मणे अमुकगोत्रगुप्ताय अमुकदासायेति विशेषः । अमुकगोत्राममुकप्रवनामिमां कन्यां प्रजापतिदैवतां यथाशक्त्यालंकृतां पुराणोक्तकन्यादान फलकामो भार्यात्वेन तुभ्यमहं सम्प्रददे इति सकुशेन जलेन कन्याहस्तं वरस्य हस्ते दद्यात् । वरश्च-द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति मन्त्रेण प्रतिगृह्णीयात् । ततः कोऽदादिति कामस्तुति पठेत् । ततः कन्यापिता कृततत्कन्य सिद्धयर्थं सुवर्ण गोमिथुनं च दक्षिणां दद्यात् । अत्राचारादन्यदपि यौतकल्पे रजतताम्रगोमहिष्यश्वग्रामादि कन्यापिता यथासम्भवं ददाति अन्येऽपि , यथासम्भवं यौतकं प्रयच्छन्ति । केचन योतक होमान्ते प्रयच्छन्ति । अत्र देशाव्यवस्था ॥ १।४।१४ ॥

मन्त्रार्थः- हे कन्यके ! नौ आवयोः । हृदयानि मनांसि तन्निष्ठव्यापारान् सङ्कल्पविकल्पात्मकान् विश्वेदेवाः आपश्च समञ्जन्तु गुणातिशयाधानेन संस्कुर्वन्तु । तथा सम्यग्भूतो मातरिश्वा अनुकूलो वायुः तथा अनुकलः पतिः देष्ट्री धर्मोपदेष्ट्री देवता आवयोर्ह दयानि सन्दधातु । उ अप्यर्थ ।।

अनुवाद-इसके वाद कन्या का पिता वर-कन्या दोनों को 'परस्परं समजेथा इत्यादि पढ़कर सम्मुखीकरण कराये अर्थात् वर कन्या को एवं कन्या वर को आमने सामने देखे । फिर वर 'समञ्जन्तु 'इत्यादि' मंत्र पढ़े।

मंत्रार्थ- (ऋषि अथर्व, अनुष्टुप् छन्द, लिङ्गोक्त देवता ।) हे कन्ये ! हम दोनों के हृदय को, संकल्प को अच्छे ढंग से विश्वदेव, जलदेव, मातरिश्वा, प्रजापति और धर्मादि की उपदेशिका वाणी सुसंस्कृत करें, सुस्थिर करें।

कन्यादान-विधि - 'वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम् ।
नाम सङ्कीर्तयेत् विद्वान् कन्यायाश्चैवमेव हि ॥
पित्रा प्रत्तामादाय गृहीत्वा निष्कामेतियदैषि मनसा दूरं दिशोऽनु पवमानो वा।
हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसौ इति ॥ १।४।१५॥

हरिहरभाष्यम्- 'पित्रा..."त्यसाविति' । पित्रा जनकेन प्रत्तां सङ्कल्प्य दत्तामादाय प्रतिग्रहविधिना प्रतिगृह्य गृहीत्वा हस्ते धृत्वा निष्क्रामति गृहमध्यात् मण्डपाद्वा । अग्निसमीपं गन्तुम् ॥ यदैषि मनसेत्यादिना मन्त्रेण करोत्वमुकदेवि इत्यन्तेन । अत्र पित्रेत्युपलक्षणं-पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृति स्थः परः परः ।। इति याज्ञवल्क्येन अन्येषामपि कन्यादाने अधिकारस्मरणात् ।।१।४।१५।।

मन्त्रार्थः- हे कन्यके ।यत् एषि गच्छति मनसा चित्तेन दूरं दूरदेशं दिशः ककुभः अनुलक्ष्यीकृत्य पवमान इव चित्तस्म वायुवच्चञ्चलत्वात् । ततः पवमानो वायुः हिरण्यपर्णः सूवर्णपक्षः विकर्णापत्यं गरुत्मान् त्वा त्वां मन्मनसा मद्गतचित्तां करोतु । ममायत्तां मयनरागिणी विदधातु ।

दातृक्रममाह याज्ञवल्क्यः - पिता पितामहो भ्राता सकल्यो जननी तथा। जयाप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ । पितृकुलस्थतदभावे दातृणां कन्या कुर्यात्स्वयंवरम् ।। इति । सकुल्यः प्रत्यासत्तिक्रमेणादौ पितृजलस्थस्तदभावे मातामहकुलस्थः सर्वाभावे जननी इति प्रयोगरत्ने । प्रकृतिस्थ उन्मादमाहितः । गम्यं गमनार्ह लावण्यादिगुणयुक्तम् । नारदोऽपि-पिता दद्यात्स्वयं कन्यां माता वाऽनमते पितुः । मातामहो मातुलश्च सकुल्यो बान्धवास्तथा ॥ माता त्वभावे मला प्रकृती यदि वर्तते । तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ।। तदा तु नैव नाभिस्यात्कन्या राजानमाव्रजेत् । अत्र प्रकृतिस्थग्रहणादप्रकृतिस्थेन यत्कृतं तदकृतमेव । तथा चापरार्के नारदवचनम् - स्वतन्त्रो यदि तत्त्वार्थं कुर्यादप्रकृतिं गतः । तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः ॥ इति । यदि तु सप्तपदीविवाहहोमादि प्रधानं जातं तदाऽङ्गवैकल्येऽपि नावृत्तिविवाहस्येति दाक्षिणात्यगौडग्रन्थेषु। विवाहश्च कन्यास्वीकारोऽन्यदङ्गमिति स्मृत्यर्थसारे ॥

अनुवाद -दानविधि से ही पिता कन्यादान करे, पिता के द्वारा प्रदत्त कन्या को दानविधि से ही ग्रहण कर अग्नि के समीप जाने के लिए यदैषि...' इत्यादि मंत्र

का उच्चारण करते हुए वर कन्या के साथ मण्डप से बाहर निकले ।

मंत्रार्थ - (अथर्वा ऋषि, अनुष्टुप छन्द, पवमान देवता ।) हे कन्ये ! तुम्हारा मन जो पितृगृह से दूर, बहुत दूर पूर्वादि दिशाओं में वायु के समान चंचल हो जाता है, उसे वे वायुदेव केवल मुझ में केन्द्रित करें, जो सोने की पाँखों वाले विकर्णपुत्र गरुड़ की तरह हैं।

अथनौ समीक्षयतिअघोरचक्षरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामा स्योनाशन्नो भव द्विपदे शं चतुष्पदे।
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।
सोमोऽददद् गन्धर्वाय गन्धर्वोऽददद्ग्नये ।
रयिं च पुत्राश्चादादग्निर्मामथो इमाम् ॥
सा नः पूषा शिवतमामरय सा न ऊरू उशती विहर ।
यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्टया ।१।४।१६॥

हरिहरभाष्यम् - 'अर्थनी समीक्षयति' । अथ निष्क्रमणानन्तरमेनौ वधुवरौ परस्परं समीक्षेथामिति प्रैषेण कन्यापिता समीक्षयति समीक्षणं कारयति । तत्र समीक्षमाणो वरः । 'अघोर.. निविष्टया इति' । अघोरचक्षुरित्यादीन् निविष्टया इत्य मन्त्रान् पठति वरः ॥ १।४।१६ ॥

मन्त्रार्थः-हे कन्ये ! ब्रम् अघोरचक्षुः सौम्यदृष्टिरपापदृष्टिर्वा एधि भव । तथा अपतिघ्नी अकार्यकरणेन पत्यर्थघातिनी तथा मा भव। तथा पशुभ्यः पशुवदाश्रितेभ्यः शिवा हितैषिणी च भव सुमनाः प्रसन्नचिता सुवर्चाः सुप्रभावयुक्ता वीरसूः सत्पुत्रजननी देवकामा देवानग्न्यादीन् कामयते स्योना सुखवती नोऽस्माकं शं सुखहेतुः द्विपदे मनुष्यवर्गाय चतुष्पदे पशुवर्गाय शं सुखहेतुर्भव ॥१॥

हे कन्ये ! ते ब्रां सोमश्चन्द्रः ते तव प्रथम आद्यः पतिः विविदे जन्मदिने लब्धवान् । विद्ल लाभे । ततः सार्द्धवर्षद्वयानन्तरं गन्धर्वः सूर्यो विविदे

उत्तरः तद्वद् द्वितीयोऽयं पतिः । ततोऽग्निरपि तावता कालेन विविदे। अतोऽयं तव तृतीयः पतिः । यथाऽऽहुः-पूर्व स्त्रियः-स्युर्भुक्ताश्चसोमगन्धर्ववह्निभिरिति । तथा ते तव तुरीयश्चतुर्थः मनुष्यजः मानुषः अहमेवेत्यर्थः ॥ २ ॥ किमिदानी चतुर्णामपीयं पत्नी नेत्याह। सोमश्चन्द्रस्त्रिशन्मासान्भुक्ता गन्धर्वः सूर्यस्तस्मै अददद्दौ सोऽपि तावत्कालं भुक्ता अग्नयेऽददत् स चाग्निर्मामिमामदात् दत्तवान् । न केवलमिमां किन्तु पुत्रान् सुतान् रयिं धनं च । चकाराद्धर्मादि च, अदादिति सम्बन्धः । या सर्वलोकसाक्षिणी पूषा देवता सा इमां शिवतमां कल्याणगुणशीलां कृबा नोऽस्मान्प्रति ऐरय ईरयतु । आटो दर्शनं विभक्तेरदर्शनं च छान्दसम् । अस्मास्वनुरक्तां करोबित्यर्थः । सा चास्मत्तः सुखं पुत्रांश्च कामयमाना ऊरू सक्थिनी जानुनोरूर्वभागदण्डौ विहरताम् विवृणोतु प्रसारयबित्यर्थः । मध्यमपुरुषश्छान्दसः । प्रयोजनमाह-यस्यां स्त्रीयोनौ उशन्तः सुखमिच्छन्तः शेपं शिश्न प्रहराम प्रवेशयाम वयम्, यस्यां कन्यायाम् उ एवार्थे । यस्यामव क्हवः कामाः धर्मपुत्ररतिसुखरूपाः सन्तु वा । किमर्थम् ? निविष्टय अग्निहोत्राद्युपास. नयाऽन्तःकरणशुद्धिद्वारा सायुज्यमुक्तये ।।

अनुवाद- निकलने के बाद वर-वधू को कन्या के पिता परस्पर अच्छे प्रकार से दोनों का निरीक्षण कराता है । वर 'अघोरचक्षुः' इत्यादि मंत्र का पाठ करता है।

मन्त्रार्थ - (ऋषि प्रजापति, द्वितीय मंत्र अनुष्टुप, तृतीय मंत्र अनुष्टुप् तथा शेष त्रिष्टुप्, कुमारी देवता) हे कन्ये ! तुम्हारी दृष्टि सौम्य हो, तुम पतिघातिनी मत बनो, पशुओं के लिए आश्रितों के लिए हितैषिणी बनो, सदैव प्रसन्नचित्त रहो, तेजोमयी बनो, तुम वीर पुत्रों को जन्म दो, देवताओं की प्रिय बनो, पशु एवं मनुष्य दोनों के लिए समान रूप से सुखकर और कल्याणकारिणी बनो ॥ १।

हे कन्ये ! प्रथम जन्मदिन पर ही तुम्हें चन्द्रमा ने प्राप्त किया, तदनन्तर ढाई

साल की उम्र में गन्धर्वो ने तुम्हें प्राप्त किया, उसी समय अग्निदेव तम्हारे पर और अब मनुष्य योनि में उत्पन्न मैं तुम्हारा चौथा पति हूं ॥२॥ ,
चन्द्रमा ने तुम्हें गन्धर्वो को दिया, गन्धर्वो ने अग्नि को और अग्नि ने धन और पुत्रों की संभावना के साथ तुम्हें मुझे सौंपा है ॥ ३ ॥
सुख और धन की मुझसे कामना करती हुई तुम अपनी दोनों जांघे फैलाओ.उसमें हम सायुज्य मुक्ति हेतु पुत्र एवं रतिजन्य आनन्द की चाह से अपने शिश्न को प्रविष्ट करायें, इसके लिए पूषा देवता हमें प्रेरित करें ॥ ४ ॥
टिप्पणी-पारस्कर के 'सर्वेषां शूद्रामप्येके' के सन्दर्भ में यास्क का कहना है रामा रमणायोपेयते न धर्माय कृष्णजातीया' इति । इसी प्रकार 'अथैनां वासः परिधापयति'पारस्कर के इस सिद्धान्त पर हरिहर ने प्रश्न उठाया है कि कन्या को वर वस्त्र पहनाये या अध्वर्यु ? इसका निर्णय यह है कि स्मार्त कर्मों में अध्वयं की आवश्यकता ही नहीं होती ? वर स्वयं नाइन की मदद से यह कार्य करें। इसी सन्दर्भ में यह भी ज्ञातव्य है कि पारस्कर द्वारा निर्धारित वैवाहिक विधि पक्ष, नक्षत्र के शुभावह होने के बावजूद ज्येष्ठ पुत्र एवं पुत्रियों का विवाह मार्गशीर्ष एवं ज्येष्ठ महीने में होना अशुभ है, अतः इसे प्रयासपूर्वक रोकना चाहिए ।

'मार्गशीर्षे तथा ज्येष्ठे क्षौरं परिणयं व्रतम् । ज्येष्ठपुत्रदुहिनोश्च यत्नतः परिवर्जयेत् ॥

व्यवहार में भी लोग इसे तीन ज्येष्ठ साथ नहीं होना चाहिए, यह कहकर इसे रोकते हैं।

प्रथमकाण्ड में चतुर्थ कण्डिका समाप्त ।

पञ्चमी कण्डिका

प्रदक्षिणमग्नि पर्याणीयके ॥ १॥५॥१॥

हरिहरभाष्यम् -'प्रदक्षि.....'णीयकै '। एके आचार्या अग्नेः, प्रसक्षिणं कारयित्वा वासः परिधानं समञ्जनं समीक्षणं च मन्यन्ते, एके न मन्यन्ते ततो विकल्पः ॥ १॥५॥१॥

अनुवाद-कुछ आचार्यों के विचार से अग्नि की प्रदक्षिणा के बाद कर नवीन वस्त्र पहनाकर वर का साक्षात्कार एवं वर-वधू को एक-दूसरे का भली निरीक्षण कराया जाय । (अन्य आचार्य इस विचार से सहमत नहीं है। ये परम निरीक्षण के पश्चात् ही अग्नि-प्रदक्षिणा के पक्षधर हैं।)

पश्चादग्नेस्तेजनी कटं वा दक्षिणपादेन प्रवृत्त्योपविशति ॥ ११॥२॥

हरिहरभाष्यम् -'पश्चाद.....त्योपविशति' । समीक्षणानन्तरमग्नि प्रदक्षिणीकृत्याग्नेः पश्चिमतः प्राङ्मुख उपविशति दक्षिणतो वरस्य वधूः । किं कृत्वा दक्षिणपादेन तेजनीं तृणपूलिकां कटं वा तृणमयं स्रस्तरं प्रवृत्य प्रक्रम्य उल्लङ्घयेत्यर्थः । दक्षिणपादेनोल्लङ्घयन् चलन् चलित्वा उभयोः संस्कार्यत्वात्सवधूकः ॥ १।५।२ ॥

अनुवाद- पारस्कर के मतानुसार वर-वध का परस्पर ठीक से एक-दूसरे का लेने के पश्चात् अग्नि की प्रदक्षिणा करके वेदी से पश्चिम पर्व की ओर मुह वर बैठे और वर की दाहिनी ओर वधू दाहिने पैर से सरकण्डे के मोढ़े अथवा

चटाई को लांघ कर बैठे ।

अन्वारब्ध आवाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यंस्विष्टकृच्च ॥ १॥५॥३॥

हरिहरभाष्यम् - 'अन्वार...प्टकृच्च । अत्र वैवाहिकहोमप्रसङ्गेन सर्वकर्म साधारणीं परिभाषां करोत्याचार्यः । तद्यथा ब्रह्मणा दक्षिणबाहौ दक्षिणहस्तेन अन्वारब्धे कर्तरि आघारसंज्ञके आज्याहुती यथा मनसा प्रजापतये स्वाहा इदं, प्रजापतये मनसा त्यागमपि, इन्द्राय स्वाहा इदमिन्द्राय । आज्यभागौ आज्यभागसंज्ञकौ होमौ, यथा ओम् भूः स्वाहा इदमग्नये इदं न मम भूरिति त्याग । तथैव ओम् भुवः स्वाहा इदं वायवे न मम भुव इति वा । ओम् स्वः स्वाहा इदं सूर्याय इदं न मम स्वः इति वा । सर्वप्रायश्चित्तसंज्ञकाः पञ्चाहुतयः । चकारः सर्वसमुच्चयार्थः ॥ १।५।३ ॥

अनुवाद - ब्रह्मा से संस्पृष्ट होकर वैवाहिक होम में प्रजापति और इन्द्र की दो आधार आहुतियां, अग्नि और सोम की दो आज्याहुतियां, तीन महाव्व्हृति सम्बन्धी आहुतियां, सर्वप्रायश्चित निमित्त पाँच आहतियाँ, प्रजापति के लिए एक और स्विष्टकृत् अग्नि के लिए एक आहुति दे।

टिप्पणी-१. ॐ प्रजापतये स्वाहा, इदं प्रजापतये, ॐ इन्द्राय स्वाहा इदमिन्द्रा - ये दो आधार आहतियाँ हैं।

२. ॐ अग्नये स्वाहा, इदमग्नये, ॐ सोमाय स्वाहा, इदं सोमाय । - ये दो आज्यहुति है

३. ॐ भूः स्वाहा, इदमग्नये, ॐ भुवः स्वाहा इवं वायवे, ॐ स्वः स्वा सूर्याय- ये तीन महाव्याहृति आहुतियाँ हैं ।

४. बन्नो अग्ने, स बन्नो अग्ने, अयाश्चाग्ने, ये ते शतम्, उत्तमम मंत्रों से दी जाने वाली ये पांच सर्वप्रायश्चित्त आहुतियाँ हैं।

५. ॐ प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा-यह प्राजापत्याइति

६. ॐ यदस्यकर्मणो० इत्यादि-यह स्विष्टकृदाहुति है। इस प्रकार कुल मिलाकर ये चौदह आहुतियाँ हैं।

एतन्नित्य- सर्वत्र ॥ ११॥४॥

हरिहरभाष्यम् -'एतन्नित्य ह. सर्वत्र' । एतदाधारादिस्विष्टकृदवसानं सर्वत्र सर्वेषु होमात्मकेषु कर्मसु नित्यं, यत्र होमाभावस्तत्र नास्ति । यथा स्रस्तरारोहण लाङ्गलयोजनपायसब्राह्मणभोजनेषु । अन्ते विहितस्य स्विष्टकृद्धोमस्य कर्मविशेषे स्थानान्तरमाह ॥ १।५।४ ॥

अनुवाद- पूर्वोक्त चौदह आहुतियां नित्य हैं, जो सभी यज्ञों में दी जाती हैं।

प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः ॥ १५॥५॥

हरिहरभाष्यम् -'प्राङ्महा....."ज्याद्धविः'। महाव्याहृतिभ्यः प्राक् पूर्व स्विष्टकृद्धोमो भवति चेद्यदि आज्यात्सकाशादन्यदपि चरुप्रभृति हविर्भवति । केवलाज्ययागे सर्वाहुतिशेषे भवति ॥ १।५।५ ॥

अनुवाद-यदि घी की जगह चरु आदि की आहुति देनी हो तो स्विष्टकृत् आहुति महाव्याहृति आहुतियों से पहले दी जाय ।

सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतदावापस्थानं विवाहे ॥ १५॥६॥

हरिहरभाष्यम् -'सर्वप्रा..... वाहे'। सर्वप्रायश्चित्तं ब्रह्मो अग्न इत्यारभ्य उत्तममित्यन्तमाहुतिपञ्चकम् । प्राजापत्यः प्राजापत्याहुतिः सर्वप्रायश्चित्तं च प्राजापत्यश्च सर्वप्रायश्चित्तप्राजापत्यौ, तयोरन्तरं सर्वप्रायश्चित्तप्राजापत्यान्तरम्, एतदावापस्थानं कस्मिन्कर्मणि विवाहे। आवापस्थानम् आवापश्चान्यत्र विहितस्य होमजपादेः कर्मणःकर्मान्तरे प्रक्षेपः। आवापस्य आगन्तुकत्वेन अन्ते निवेशो. युक्तः न्यायात् वृत्त्यर्थं तमेवाह ॥ १।५।६ ॥

अनुवाद-विवाह में (राष्ट्रभृत् प्रभृति) अन्य आहुतियों का स्थापन करना हो तो सर्वप्रायश्चित्ताहुति और प्राजापत्याहुति के बीच में ही करना चाहिए ।

राष्ट्रभृत इच्छजयाभ्यातानांश्च जानन् ॥ १।५७॥

हरिहरभाष्यम् -'राष्ट्रभृत इच्छन्' । विवाहे वैवाहिके होमकर्मणि राष्टभृत: राष्टभत्संज्ञकाः आहुती: आवपेदित्यध्याहारः । जयाभ्यातानांश्च' जयाश्च अभ्यातानाश्च जयाभ्यातानाः,) तान् जयाभ्यातानांश्च आवपेत् । किं कुर्वन् इच्छन् राष्ट्रभृज्जयाभ्यातानानां होमफलं कामयन् ।। १।५।७ ॥

अनुवाद - वैवाहिक होम में राष्ट्रभृत्संज्ञक १२ आहुतियां, जया नामक १३ आहुतियां और अभ्यातान नामक आहुतियां भी दी जाय ।

येन कर्मणेर्छेदिति वचनात् ॥ १॥५॥८॥

हरिहरभाष्यम् -किं प्रमाणमिति चेत् 'जानन्येन....वचनात्' । येन कर्मणा अस्मिन्कर्मणि ओप्य तेन यत्फलं भवतीति जानन् विदन् तत्कर्मफलमिच्छंस्तस्मिन् कर्मणि तत्कर्म आवपेदिति वचनात् श्रुतेरित्यर्थः । तत्र राष्ट्रभृतो यथा-ऋताषाड् ऋतधामाग्निर्गन्धर्व इत्यादिका द्वादश मन्त्रा राष्ट्रभृत्संज्ञकाः ॥ १।५।८॥ **अनुवाद-** क्रियमाण कर्म के द्वारा यदि फलप्राप्ति की कामना हो तो जया प्रभृति होम करना चाहिए।

टिप्पणी-राष्ट्रभृत् आहुतियों के १२ मंत्र शुक्लयजुर्वेद (अध्याय १८, मन्त्र ३८ से ४३ तक) से उद्धत हैं । ये १२ मन्त्र निम्नलिखित हैं।

१. ॐ ऋताषाड्तधामाऽग्निर्गन्धवः स न इदं ब्रह्मक्षत्र पातु तस्मै स्वहा व्वाट् । इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय न मम ॥१॥

२. ॐ ऋताषाड्तधामाग्निर्गन्धर्वस्तस्योषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा । इदमोषधीभ्योऽप्सरोभ्यो मुदभ्यो न मम ॥२॥

३. ॐ सं हितो विश्वसामा सूर्यो गन्धवः स न इदं ब्रह्मक्षत्रं पात ही व्वाट् । इदं

सह. हिताय विश्वसान्ने सूर्याय गन्धर्वाय न मम ।। ३ ॥

४. ॐ सं हितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा । इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो न मम ॥४॥

५. ॐ सुषम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्याट् । इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम ॥५॥

६. ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयोनाम ताभ्यः स्वाहा । इदं नक्षत्रेभ्योऽप्सरोभ्य भेकुरिभ्यो न मम ॥६॥

७. ॐ इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् । इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम ॥ ७॥

८. ॐ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जा नाम ताभ्यः स्वाहा। इदमब्योऽप्सरोभ्य ऊर्ग्भ्यो न मम ॥ ८॥

९. ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् । इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम ॥ ९॥

१०. ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा । इदं दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यो न मम ॥१०॥

११. ॐ प्रजापतिविश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम ॥ ११ ॥

१२. ॐ प्रजापतिविश्वकर्मा मनोगन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा । इदं ऋक्सामभ्योऽप्सरोभ्य एष्टिभ्यो न मम ॥ १२ ॥

चित्तञ्च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्करीश्च दर्शश्च पौर्णमासं च बहच्च रथन्तरञ्च । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छनः पृतना जयेषु । तस्मै व्विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहा इति ॥ १।५।९।।

हरिहरभाष्यम् -'चित्तं च "बभूव स्वाहा' । चित्तं चेत्येवमादीनां पदानां चतुर्थ्यन्तानां केचिदिच्छन्ति तदसाम्प्रतम् । कुतः ? नह्येतानि देवतापदानि किन्तु मन्त्राः एवैते, मन्त्राश्च यथाऽम्नाता एव प्रयुज्यन्ते ।। १।५।९ ॥

मन्त्रार्थ – (ऋषि परमेष्ठी, छन्द त्रिष्टुप्, लिङ्गोक्त देवता।) जैसे प्रजापति ने देवराज इन्द्र को विजयी बनाया था, उसी प्रकार हृदय, चेतना, कर्मेन्द्रिय, उनमें अधिष्ठित देवता, शिल्पादि ज्ञान, अपरोक्ष ज्ञान, मन, मानसिक शक्तियाँ, दर्श, पौर्णमास तथा बृहत् और रथन्तर साम मुझे विजयी बनने की प्रवृत्ति प्रदान करें।

प्रजापति ने इच्छित फल पाने के लिए इन्द्र को जया 'नामक' यह मंत्र प्रदान किया। इसे पाकर 'सेना-विजय' नामक कर्म में इन्द्र अत्यन्त शक्तिशाली बन गये । विजयी देवराज को प्रजा ने प्रणाम किया, उन्होंने इन्हें अपना नेता बनाया, उसी दिन से इन्द्र अजेय और पराक्रमी बन गये, यज्ञांश के अधिकारी बने ।

टिप्पणी- इस विषय पर तैत्तिरीय ब्राह्मण में एक कथा है- 'स इन्द्रः प्रजापातमुपाधावत्स तस्मा एताजयान्प्रायच्छत् ताम् अजुहोत् । ततो देवा असुरानजयन्त यदजयस्तज्जयानां जयात्वम्' ।

जया होम में कुछ आचार्यों के विचार से इस मन्त्र के चित्तं आदि पदों को चतुर्थ्यन्त कर देना चाहिए। किन्तु हरिहर ने अपने भाष्य में इस मत का खण्डन हुए अपना विचार इस प्रकार व्यक्त किया है कि ये देवताओं के नाम नहीं है , ये तो मन्त्र है । मन्त्र में किसी प्रकार का व्यतिक्रम या परिवर्तन अपेक्षित नहीं है । परन्तु फिर भी विश्वनाथ ने अपनी प्रयोग-पद्धति में निम्नलिखित परिवर्तन किया है।

चित्तं च स्वाहा इदं चित्ताय, चित्तिश्च स्वाहा इवं चित्यै, आकूतं च स्वाहा इदमाकूताय, आकूतिश्च स्वाहा इदमाकूत्यै, विज्ञातं च स्वाहा इदं

विज्ञाताय,विज्ञातिश्च स्वाहा इवं विज्ञातये, मनश्च स्वाहा इदं मनसे, शाक्करीश्च स्वाहा इदं शाक्करीभ्यः, दर्शश्च स्वाहा इदं दर्शाय, पौर्णमासं च स्वाहा इदं पौर्णमासाय, बृहच्च स्वाहा इदं बृहते, रथन्तरं च स्वाहा इदं रथन्तराय ।

ये चित्तादि १३ मन्त्र जया संज्ञक हैं।

'अग्निर्भतानामधिपतिः स मावविन्द्रो ज्येष्ठानां, यमः पृथिव्या वायुरन्तरिक्षस्य, सूर्यो दिवश्चन्द्रमा नक्षत्राणां, बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां, वरुणोऽपां, समुद्रः स्रोत्यानामन्न साम्राज्यानामधिपति,रूपाणां , विष्णः पर्वतानां, मरुतो गणानामधिपतयस्ते मावन्तु पितरः पिता महाः परेऽवरे ततास्ततामहाः । इह मावन्त्रस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामा शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहेति सर्वात्रानुषजति॥ ११५॥१०॥

हरिहरभाष्यम् -'अग्निर्भूता.....वहूत्यां स्वाहेति । अभ्यातानसंज्ञका ह्येते अष्टादश मन्त्राः । 'सर्वत्रानुषजति' अग्निभूतानामित्यादिषु पितरः पितामहा इत्यन्तेष्वष्टादशसु मन्त्रेषु प्रतिमन्त्रं यथालिङ्गं यथावचनं समावत्रित्यादि देवहुत्यां/ स्वाहेत्यन्तं वाक्यैकदेशमनुषजति संयुनक्ति ॥ १।५।१० ॥

मन्त्रार्थः-अग्निः प्रजापतिः भूतानां स्थावरादीनामधिपतिः ईशः स मा मामवतु पातु, क्व ? अस्मिन्ब्रह्मणि अस्मिन्ब्रह्मकर्मणि होमादौ, पुनरस्मिन्क्षत्रे क्षत्रकर्मणि प्रजापालनादौ, पुनरस्यामाशिषि ब्राह्मणः सम्पादितेष्टाशंसने पुत्रादिसुखकामनाया वा, कुत्र ? अस्यां कन्यायां, किम्भूतायां ? पुरोधायां पुरःस्थितायामस्मिन्कर्मणि विवाहे अस्यां देवहूत्यां देवताह्वाने देवतोद्देशेन होमे वा स्वाहा सुहुतमस्तु । अय वाक्याथं उपरिष्टादपि सप्तदशसु सम्बध्यते, शेषं स्पष्टम् । एतेषु मन्त्रेषु प्रतिमन्त्रं यथ यथावचनं समावत्रित्यादि देवहूत्यां स्वाहेत्यन्तं वाक्यैकदेशमनुवक्तव्यम् ।

मन्त्रार्थ-(ऋषि प्रजापति, छन्द पंक्ति, देवता लिङ्गोक्त ।) जीवों के स्वामी अग्निदेव, सुरपति इन्द्र, पृथ्वीपालक, अंतरिक्ष-स्वामी वायू, द्युलोकपति सूर्य,

नक्षत्राधिपति चन्द्र, वेदों के अधिष्ठाता बृहस्पति, सत्य के पालक मित्र वरुण, नदीपति समुद्र, साम्राज्य-संचालक अन्न, वनस्पतियों के अधिष्ठासोम, प्रेरक वस्तुओं में प्रधान सविता देवता, पशुपति रुद्र, शिल्प और वास्तु प्रमुख ब्रष्टा, पर्वतपति विष्णु , गणपति मरुत् तथा पिता-पितामह और अन्य पूर्वजगण ब्रह्मकर्म, प्रजापालन रूप क्षत्रिय-कर्म में हमारी रक्षा करें। हमारे सामने बैठी इस कन्या को अपने आशीर्वाद से कृतार्थ करें। इन देवताओं के आह्वानसे इस यज्ञ की प्रत्येक आहुति सुहुत हो ।

टिप्पणी- ऊपर लिखित अभ्यातान आहुतियों के १८ मन्त्रों में से प्रत्येक में लिङ और वचन 'समावब्रस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां परोधाया कर्मण्यस्यां देवहत्यां स्वाहा;' जोड़ दिया जायेगा। इस तरह अभ्यातानसंज्ञक १८ मन्त्रों की आज्याहुति निम्नलिखित हैं ।

(१) ॐ अग्निर्भूतानामधिपतिः स मावब्रस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदमग्नये भूतानामधिपतये न मम ॥१॥

(२) ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावब्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदमिन्द्राय ज्येष्ठानामधिपतये न मम ॥२॥

(३) ॐ यमः पृथिव्या अधिपतिः स मावब्रस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं यमाय पृथिव्या अधिपतये न मम ॥३॥

(४) ॐ वायुरन्तरिक्षस्याधिपतिः स मावब्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं वायवे अन्तरिक्षस्याधिपतये न मम ॥ ४॥

(५) ॐ सूर्यो दिवोऽधिपतिः स मावब्रमिन् ब्रह्मण्यस्मिन्

क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं सूर्याय दिवोऽधिपतये न मम ॥ ५ ॥

(६) ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं चन्द्रमसे नक्षत्राणामधिपतये न मम ॥ ६ ॥

(७) ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम ॥७॥

(८) ॐ मित्रः सत्यानामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं मित्राय सत्यानामधिपतये न मम ॥ ८॥

(९) ॐ वरुणोऽपामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं वरुणायापामधिपतये न मम ॥ ९॥

(१०) ॐ समुद्रः स्रोत्यानामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं समुद्राय स्रोत्यानामधिपतये न मम ॥ १० ॥

(११) ॐ अन्न साम्राज्यानामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदमन्नाय साम्राज्यानामधिपतये न मम ॥ ११ ॥

(१२) ॐ सोम ओषधीनामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं सोमायौषधीनामधिपतये न मम ॥१२॥

(१३) ॐ सविता प्रसवानामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं सवित्रे प्रसवानामधिपतये न मम ॥ १३ ॥

(१४) ॐ रुद्रः पशूनामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं रुद्राय पशूनामधिपतये न मम ॥ १४ ॥

(१५) ॐ त्वष्टा रूपाणामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं त्वष्ट्रे रूपानामधिपतये न मम ॥ १५ ॥

(१६) ॐ विष्णुः पर्वतानामधिपतिः स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं विष्णवे पर्वतानामधिपतये न मम ॥ १६ ॥

(१७) ॐ मरुतो गणानामधिपतयस्ते स मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम ॥ १७ ॥

(१८) ॐ पितरः पितामहाः परेऽवरे ततास्ततामहाः । इह मावत्रमिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या स्वाहा । इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यो न मम ॥ १८ ॥

अग्निरैतु प्रथमो देवतानां सोस्य प्रजां मुञ्चतु मृत्युपाशात् ।
तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघन्नरोदात् स्वाहा।
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा।
स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानि धेह्ययथा यजत्र ।

यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा।
सुगन्नु पन्यां प्रदिशन्न एहि ज्योतिष्मध्ये हजरन्न आयुः।
अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा इति ॥१५॥११॥

हरिहरभाष्यम् - 'अग्निरैबित्यादि परंमृत्यविति चैके प्राशनान्ते' ।
अग्निरैबित्यादिकाः परंमृत्यवित्यन्ताः पञ्च मन्त्राः ॥ १।५।११॥

मन्त्रार्थः-अग्नि ऐतु आगच्छतु, किम्भूतः ? देवतानां यज्ञभुजां प्रथमः आद्यः प्रधानबात् । स चाग्निः असौ अस्याः कन्याया प्रजां भाविपुत्रादिरूपां मुञ्चतु मोचयतु , कुतः ? मृत्युपाशात् । यद्वा मृत्युपाशात अग्निः अस्य कन्याय प्रजां मुञ्चतु ददातु, तच्च प्रजामोचनं राजा वरुणोऽनुमन्यताम् अनुजानातु । यथा येनानुज्ञानेन प्रकारेण वा इयं कन्या पौत्रं पुत्रभवम् अघं दुःखं नरोदाव शोकं प्राप्य न रोदिप्यति कदाचिदपि अपत्यवियोगो मा भवत इत्यर्थः ॥ १ ॥

इमा कन्यां गार्हपत्योऽग्निस्त्रायतां रक्षतु गार्हपत्याभिधो भाव्यग्निः पालयतु । इमां पत्नीमग्निहित्रिणीं कृबा रक्षतु । अस्य अस्याः प्रजां दीर्घमायुः निर्दुष्टबहुकालजीवनं नयतु प्रापयतु । इयं च अशून्योपस्था सफलप्रसवा अवन्ध्यतयेति यावत् । यद्वा नित्यं भर्तृसङ्गा अस्तु भवतु जीवतामेव दीर्घायुषां माता चास्तु जीवपुत्रा भवबिकिञ्चत्यर्थः । किञ्च पौत्रं पुत्रसम्बन्धजमानन्दं सुखम् अभि अधिगम्य आभिमुख्येन सर्वभावेन ना प्राप्य विविधं बुध्यतां जानातु सर्वज्ञाऽस्त्बित्यर्थः । यद्वा पौत्रमानन्दं विशिष्टतया निद्रासूखापेक्षां त्यक्का जागबिति ॥ २ ॥

हे अग्ने ! यजन्त वायत इति यजत्रः जिन! यस्माच्वं सर्वप्रत्यक् अतो नोऽस्माकं विश्वानि सर्वाणि कर्माणि अयथा अन्यथा न कर्माणि स्वस्ति सम्पूर्णानि यथा स्यात्तथा धेहि अनुकूलानि कृबा स्थापय । किं च दिव आ स्वर्ग लोकमभिव्याप्य आ पृथिव्याः पृथिवीमभिव्याप्य च यत् महि महिमा मास धेहि स्थापय । किञ्च अस्यां पृथिव्यां जातं यद् द्रविणं वसु चित्रं

नानारूपं स्वर्णरत्नादिभेदेन प्रशस्तं प्रशस्यं श्रेष्ठं यच्च दिवि स्वर्गे जातं तदप्यस्मासु धेहि ॥ ३ ॥

हे अग्ने ! नोऽस्मान् एहि आगच्छ अस्मद्गृहानागत्य नोऽस्माकं सुगं सुखगम्यं पन्थांपन्थानमचिरादिमार्गं प्रदिशन् उपदिशन् सम्पादयन्निति यावत् । आयूनिर्दुष्टं जीवनं धेहि देहि । किम्भूतम् ? अजरं जरारोगादिपराभवरहितमजरमित्यग्निविशेषणं वा विभक्तिव्यपरेन । पुनः किम्भूतं ? ज्योतिष्मत्प्रकाशकं तत्प्रतिबन्धको मृत्युरपि नोऽस्माकं भवत्प्रसादादपैतु अपगच्छतु । अमृतमानन्दं च नोऽस्मान् आगच्छतु वैवस्वतो यमश्च नोऽस्माकमभयं ब्रत्सम्बन्धेन पापाभावाद् दुःखहेतुभयाभावं कृणोतु ॥४॥

मन्त्रार्थ- (ऋषि प्रजापति, छन्द त्रिष्टुप्, देवता अग्नि-वरुण ।) यज्ञभाग के अधिकारी देवताओं में सर्वश्रेष्ठ अग्निदेव यहाँ आकर इस वध की भावी सन्तानों को मृत्यूपाश से मुक्ति दिलायें। राजा वरुण भी इस बन्धनमुक्ति को अपना अनुमोदन दें, जिससे यह वधू भविष्य में सन्ततिजन्य दुःख से कभी न रोए।

(ऋषि और छन्द पूर्वोक्त, देवता अग्नि ।) अग्निदेव इस वधू की सन्तानों को दीर्घायु करें। इस वधू का गर्भाधान कभी व्यर्थ न जाए । यह पुत्र और पौत्र सम्बन्धी सम्पूर्ण आनन्द को प्राप्त करे ।

(ऋषि और छन्द पूर्वोक्त, देवता अग्नि ।) यजमान के रक्षक हे अग्निदेव ! धरती पर जो भी मेरे प्रतिकूल हो, उसे अनुकूल कर मेरे लिए कल्याण का मार्ग प्रशस्त करो। स्वर्ग और भूलोक में व्याप्त गरिमा से मुझे लाभान्वित करो। धरती और स्वर्ग में जो अनेक प्रकार के धन हैं, उन्हें भी मुझे दो।

(ऋषि और छन्द पूर्वोक्त, देवता अग्नि) हमारी राह को सुगम बनाते हुए यहाँ जाकर हे अग्निदेव ! उसे ऊर्जस्कर एवं प्रकाशक वृद्धावस्थारहित आयु

को सम्पुष्ट । आपके आशीर्वाद से हम से मृत्यू दूर हो और यम हम लोगों को अभयदान दें।

परं मृत्यविति के प्राशनान्ते ॥ १॥५॥१२॥

हरिहरभाष्यम् -'परं मृत्यविति च जुहुयात् । एके आचार्याः परं मृत्यवित्येतामाहुतिं प्राशनान्ते संस्रवप्राशनान्ते जुहुयादितीच्छन्ति । उदकस्पर्शः ॥ १।५।१२ ॥

अनुवाद-प्राशन के अन्त में 'परं मृत्यो' इत्यादि मंत्र से आहुति देही ऐसा कुछ आचार्यों का मत है।

(मन्त्र)-परं मृत्योऽअनुपरेहि पन्यां यस्तेऽअन्य इतरो देवयानात।

टिप्पणी-इसे कुछ आचार्य अन्तःपराहुति भी कहते हैं । इस मन्त्र की समय अग्निदेव और वधू के बीच वस्त्र का व्यवधान कर देते हैं।

॥प्रथमकाण्ड में पञ्चम कण्डिका समाप्त ॥

षष्ठी कण्डिका

लाजाहोम

कुमार्या भ्राता शमीपलाशमिश्राल्लाजानञ्जलिनाञ्जलावावपति ।।१।६।१॥

हरिहरभाष्यम् - 'कुमार्या ..."वपति' । कुमार्याः कन्यायाः भ्राता शमीपलाश मिश्रान् शमीपत्रयुक्तान् लाजान् भ्रष्टानि धान्यानि अञ्जलिना कृत्वा वध्वा अञ्जली आवपति निक्षिपति ॥ १।६।१ ॥

अनुवाद- कन्या का भाई शमीपत्र मिला हुआ धान का लावा अपनी अंजलि से बहन की अंजलि में डाले।

तां जुहोति सं हतेन तिष्ठति -

अर्यमणं देवं कन्याऽग्निमयक्षत।
स नो अर्यमा देवःप्रेतो मुञ्चन्तु मा पतेः स्वाहा ॥
इयं नार्युपवते लाजानावपन्तिका।
आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥
इमां लाजानावपाम्यग्नौ समृद्धिकरणं तव ।
मम तुभ्यं च संवननं तदग्निरनुमन्यतामिय स्वाहा ।। इति ॥१६॥२॥

हरिहरभाष्यम् – तान् जुहोति सा च अञ्जलिस्थान् लाजान् संहतेन मिलितेनाञ्जलिना जुहोति विवाहाग्नौ प्रक्षिपति तिष्ठती ऊर्ध्वा । 'अर्यमणं..... स्वाहेति' । (अर्यमणं देवमिति प्रथमम्, इयन्नार्युपब्रूत इति द्वितीयम्,

इमॉल्लाजानावपामीति तृतीयम् ।। १।६।२।।

मन्त्रार्थ:-कन्याः पूर्वाः प्रथममर्यमणं सूर्य देवं कान्तम् अग्निमग्निस्वरूपं वरलाभाय अयक्षत अयजन् । लिडि छान्दसं रूपम् । स चार्यमा देवस्ताभिरिष्टो यतोऽतो नोऽस्मान् इदानीं परिणीयमानाः कन्याः, इतः पितृकुलात् प्रमुञ्चतु प्रमोचयतु, मा पतेः पत्युः कुलात्सहचरिब्राद्वा मा प्रमोचयत् । यद्वा वरो ब्रूते-कन्याः यम् अर्यमणमग्निरूपेणायजन् सोऽर्यमा देवः पतेः पत्युर्मतः सकाशादिमां नो प्रमुञ्चतु मा प्रमोचयतु इत अस्याः कन्यायाः सकाशान्मा मां नो प्रमुञ्चत् । अत्रेदं मन्त्र त्रयं कन्यैव वरपाठिता पठति । इयं नारी वधूः उप पत्युःसमीपे बूते । किं कुर्वती ? लाजान् भ्रष्टव्रीहीन् आवपन्तिका अग्नी विभागशः प्रक्षिपन्ती. स्वार्थे कः। किं ब्रूते ? तदाह- मे मम पतिरायुष्मान् सकलदार्घायुरस्तु भवतु । मम ज्ञातयः एधन्तां वर्द्धन्तामिति । किं च हे पते ! इमानग्नो आवपामि प्रक्षिपामि । किम्भूतान् ? तव समृद्धिकरणं समृद्धिहेतवे अतो मम कन्यायाः तुभ्यं च तव च भर्तुः मलोपश्छादसः, संवननं वशीकरणमन्योन्यमनुरागः तदयमग्निरर्यमा अनुमन्यतामनुमोदनं कुरुताम् । इयं च स्वाहा तत्पत्नी अनुमन्यताम् ।।

अनुवाद-उन लाजाओं को खड़ी होकर मिली हुई अंजली से 'अर्यमणम्' इत्यादि तीन मंत्रों से तीन बार वधू हवन करे ।

मन्त्रार्थ- (ऋषि अथर्वा, छन्द अनुष्टुप्, देवता अग्नि ।) वधू ने अत्यन्त तेजस्वी अग्नि की तरह श्रेष्ठ वर पाने की इच्छा से पहले जिस अर्यमा नामक देवता भगवान् सूर्य की उपासना की थी, यज्ञ किया था, वे भगवान् सूर्य उसे पितृकुल से मुक्त करें, न कि पतिकल से ।

लाजाहोम करती हुई यह विवाहिता कन्या कहती है- मेरे पति दीर्घायु हों और मेरे कुटुम्बीजन समृद्ध हों। वधू वर से कहती है- मैं धान के इन लावाओं को अपनी और तुम्हारी समुन्नति के लिए, समृद्धि के लिए, इस होमाग्नि में

डालती हूँ। अग्निदेवता हमारे परस्पर अनुराग का अनुमोदन करें।

टिप्पणी-१. स्मृति के वचनानुसार लाजाहोम वधू को अञ्जलि के वामभाग से दी करना चाहिए। इस प्रकार लाजा होम की तीन विधियाँ बतलाई गई हैं । अंगलियों के अग्रभाग से, अञ्जलि के बीच से, अञ्जलि के बाँयें भाग से। यहाँ वधु अञ्जलि के वामपार्श्व से ही हवन करेगी। क्योंकि नारी का वामभाग ही देवभाग कहलाता है ।

'अङ्गुल्यग्रे न होतव्यं तथैवाञ्जलिभेदतः ।

अञ्जलेवमिपाइँन लाजाहोमो विधीयते ॥

वामभागस्तु नारीणां देवभाग. इति स्मृतः'।

२ जिस कन्या को अपना सोदर भाई नहीं है तो ऐसी स्थिति में उसके चचेरे. मेरे मौसेरे या फूफ़र भाई से भी काम चल सकता है । यदि ये भी न होना वान्धव भी उपयोग में आ सकते हैं ।

भ्रातृस्थाने पितृव्यस्य, मातुलस्य च यः सुतः ।

मातृस्वसुः सुतस्तद्वत् सुतस्तद्वत् पितृष्वसुः ।

अन्यो भ्रातुरभावे स्याद् बान्धवो जातिरेव च ॥

३. गोभिलगृह्यसूत्र के अनुसार लाजाहोम के समय वधु के हाथ में वर का हाथ भी होना चाहिए।

ओल्डेनवर्ग ने शां० गृ० सू० (१।१३।१५) का सन्दर्भ देकर भाई की जगह पिता का विकल्प भी दिया है, जो युक्तिसंगत प्रतीत नहीं होता।

अथास्यै दक्षिणं हस्तं गृह्णाति साङ्गुष्ठम् -
गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मां त्वादुर्गार्हपत्याय देवाः।
अमोहमस्मि सा त्वः सा त्वमस्यमोऽहम् ।

सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वम् ।
तावेहि विवाहावहै सह रेतो दधावहै, प्रजां प्रजनयावहै, पुत्रान् विन्दावहै बहून् ।
ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ ।
पश्येम शरदः शतं जीवेम शरदः शताः शृणुयाम शरदः शतमिति ॥
१६॥३॥

हरिहरभाष्यम् - 'अथास्य.....शतमिति' । अथ लाजाहोमानन्तरम् अस्यै अस्याः कुमार्या दक्षिणं हस्तं गृह्णाति स्वदक्षिणहस्तेन आदत्ते । कीदृशं हस्तं साङ्गुष्ठं अङ्गुष्ठेन सहितं गृभ्णामि ते सौभगत्वायेत्यादि शृणुयाम शरदः शतमित्यन्तं मन्त्रंपठति वरः ॥ १।६।३ ॥

मन्त्रार्थः - हे कन्ये ! ते तव हस्तं करं गृभ्णामि गृह्णामि । 'हृग्रहोर्भश्छन्दसि' इति भत्वम् । यथा येन गृहीतहस्तेन मया पत्या भर्त्रा सह जरदष्टिः जरच्छरीरा बहुवर्षायुष्मती आसः भवसीत्यर्थे निपातः । ग्रहणमेव तावत्कृत्यं (?) तत्राह-भगादयस्त्वयो देवास्त्वा त्वां मह्यमदुः दत्तवन्तः । किमर्थम् ? गार्हपत्याय गृहस्वामिनीत्वाय भाविगार्हपत्यं सेवितुं वा। किं च सौभगत्वाय सुभगानां समूहः सौभगं तस्य भावः सौभगत्वं तस्मै तदर्थम्, निरतिशयानन्दावाप्तय इत्यर्थः । किम्भूताम् ? त्वां पुरन्धिः पुरधिं द्वितीयार्थे प्रथमा । श्रेष्ठा सुरूपवती वा । तथा च श्रुतिः-पुरन्धिर्योषेति योषित्येवरूपं दधातीति । हे कन्ये ! यत अमो विष्णुरुद्रब्रह्माऽहमस्मि अमति सर्वत्र गच्छति सर्वं जानाति वेति, न मिनोति हिनस्तीति वा अमः तथा सौति सुवति सूते वा विश्वमिति सा लक्ष्मीस्त्वमसि । किञ्च सा देवीत्रयीरूपा त्वमसि अमो देवत्रयरूपोऽहमस्मि । किञ्च अहं सामास्मि त्वं ऋगसि अहं द्यौरस्मि त्वं पृथिव्यसि तावेवावां विवहावहै विवाहं करवावहै । सह संयुक्तो भूत्वा रेतः पुत्रदेहरूपं दधावहै धारयाव । ततः प्रजां स्त्रीरूपां सन्तति प्रजनयावहै उत्पादयाव । पुमान् पुत्रपौवादीन् बहून् विन्द्यावहै, लगायो । ते च पुत्रा जरदष्टयः शतायुपः

सन्तु। आवामपि राम्प्रियो राम्यक् प्रीतो परस्परप्रेमशालिनौ रोचिष्णू सदीप्तौ शोभमानौ वा सुमनस्यमानौ वा शोभनमनोवृत्ति कुर्वाणौ सुमनसो भावः सौमनस्यं तत्कुर्वाणावित्यर्थः । सन्त्विति क्रियां विपरिणमय्य योज्यम् । इन्द्रियपाटवमाशास्ते वयं च पुत्रादिसहिताः शतं शरदो जीवेम निरुपद्रवं प्राणान्धारयाम । तथैव शरदः शतं शृणयाम निर्दष्टं शब्दग्रहणसमर्थमस्माकं श्रवणेन्द्रियं भवत्वित्यर्थः ।।

अनुवाद- इसके बाद वधू के दाहिने हाथ को अंगूठे के साथ पकड़े और 'गृभ्णामि' इत्यादि मंत्र पढ़े।

मन्त्रार्थ - (ऋषि याज्ञवल्क्य, छन्द त्रिष्टुप्, देवता लिङ्गोक्त ।) हे कन्ये ! सौभाग्यकामना से मैं तुम्हारा यह दाहिना हाथ पकड़ता हूँ। मेरे साथ ही तुम भी दीर्घायु बनो । भग, अर्यमा और सविता देवताओं ने मुझे सर्वोत्कृष्ट और सर्वाधिक सुन्दर समझकर तुम्हें गार्हस्थ्य जीवन का आनन्द लेने के लिए सौंपा है।

(ऋषि भरद्वाज, छन्द उष्णिक्, देवता विष्णु ।) हे कन्ये ! मैं विष्णु हूँ, तुम लक्ष्मी हो; मैं त्रिदेव स्वरूप हूँ और तुम देवीरूपा हो; मैं साम हूँ और तुम ऋचा; मैं आकाश हूँ और तुम धरती।

(ऋषि अथर्वा-प्रजापति, छन्द अनुष्टुप्-यजुष, देवता विष्णु ।) आओ, हम दोनों परिणयसूत्र में बँधे, एक साथ वीर्य धारण करें, संतान उत्पन्न करें, हमें बहुसंख्यक पुत्र हों। हमारी वे सन्ताने दीर्घायु हों और हम दोनों एक-दूसरे के प्रति अनुरक्त हों, हम दोनों दीप्तिमय एवं एक-दूसरे के प्रति संतुष्ट रहें । हम सौ साल तक एक-दूसरे को देखते-सुनते हुए जीवित रहें।।

॥ प्रथमकाण्ड में षष्ठ कण्डिका समाप्त ।।

सप्तमी कण्डिका

॥ शिलारोहणम् ॥

अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेन आरोहेममश्मानमश्मेव त्वं स्थिरा भव ।

अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायत ॥ इति ॥१।७॥१॥

हरिहरभाष्यम् - 'अथैनाम..... तनायत इति' । अथ पाणिग्रहणानन्तरमेनां वधूमश्मानं दृषदमुत्तरतोऽग्नेध्रियमाणं दक्षिणपादेन कृत्वा आरोहयति आरोहेममित्यादिपृतनायत इति मन्त्रेण ॥१।७।१ ॥

मन्त्रार्थः- हे कन्ये ! इमं पुरोवर्तिनमश्मानं प्रस्तरमारोह आक्रम अधितिष्ठेति यावत् । आरोहणेन संस्कृता त्वमश्मेव पाषाणवत् स्थिरा दृढा भव । किञ्च अभि अधिकृत्य आक्रम तिष्ठ, कान् ? पृतनां सङ्ग्राममिच्छन्ति पृतन्यन्ति त एव पृतन्यतः तान् पृतन्यतः कलहकारिण इत्यर्थः । ततश्च पृतनाभिः सेनाभिर्यतन्त इति पृतनायतः तान्पृतनायतः अव अवाचीनान्कृत्वा बाधस्व भग्नोद्यमान्कुरु ॥ १।७।१ ॥

अनुवाद- विवाह के बाद वर 'आरोहेममश्मानम्' इत्यादि मंत्र पढ़ते हुए वधू को अग्नि के उत्तर में रखे हुए पत्थर पर दाहिना पैर रखने को कहे।

मन्त्रार्थ- (ऋषि अथर्वा, छन्द अनुष्टुप्, वधू देवता ।) हे वधू ! आगे रखे इस पत्थर पर पैर रखकर तुम चढ़ो, हमारे घर में चट्टान की तरह तुम सदैव सुदृढ बनी रहो। हम पर जो भी आक्रमण करे, उसके सारे प्रयासों को तुम विफल बनाती रहो।

गाथागानम्

अथ गाथां गायति -

सरस्वति प्रेदमव सुभगे वाजिनीवती।
यां ब्रा विश्वस्य भूतस्य प्रजायामस्याग्रतः॥
यस्यां भूतं समभवद् यस्यां विश्वमिदं जगत् ।
तामद्य गाथां गास्यामि ता स्त्रीणामुत्तमं यश इति ॥ १।७।२॥

हरिहरभाष्यम् -'अथ गाथां गायति' । अथ अश्मारोहणानन्तरं गाथां गायति तां गाथामाह-'सरस्वति..."यश इति' । इम मन्त्रं पठति गाथागाने ।।

मन्त्रार्थः स्वति वाग्देवते ! सुभगे कल्याणि वाजिनीवती वाजः अन्नं तदस्ति अस्यामिति वती अन्नवती, यद्वा वाजाः पक्षाः सन्त्यस्या इति वाजिनी हंसी, तद्वतीदं युग्मं कर्म च प्राव प्रकृष्टतया अव रक्ष । ब्रा ब्रामस्य विश्वस्य भूतस्य जातस्य पृथिव्या प्रकृष्टां जनित्रीमाहः, किम्भूतामग्रतः प्रथमां, तदेव प्रपञ्चयति-यस्यां प्रकृति ब्रयीदं सर्वं विश्वं तथाभूतं पृथिव्यादि सर्वं जगत् अस्तं गच्छत् आस प्रलये मित्यर्थः । पुनः सृष्टयादौ च यस्याः सकाशात्समभवत् जातं तस्याः सरस्वत्याः न्धिनी तां गाथां गुणप्रभावस्तुतिप्रकाशिकामद्य गास्यामि या श्रुता सती स्त्रीण श्रेष्ठं यशः कीर्तिं ददाति ॥

अनुवाद-इसके बाद गाथा गाये।

मन्त्रार्थ- (ऋषि विश्वावसु, छन्द अनुष्टुप्, देवता सरस्वती।) हे देवि सरस्वति ! तुम अन्नवती हो, कल्याणमयी हो, इन दोनों कर्म की रक्षा करो। वह गाथा मैं गा रहा हूँ, जिसमें तुम्हें सम्पूर्ण जीवों की जननी कहा गया है। प्रकृति रूप में तुम्ही आदिमाता हो। यह सारी दुनियाँ तुम्हीं में लीन हो जाती है। मैं वही गाथा गा रहा हूँ, जिसमें तुम्हारे नारी रूप में विविध यशस्वी कर्मों का वर्णन है।

अथ परिक्रामतः

तुभ्यमग्ने पर्यवहन्सूर्यां वहतु ना सह ।

पुनः पतिभ्यो जायां दाग्ने प्रजया सह । इति ॥ १७॥३॥

हरिहरभाष्यम् - 'अथ परिका....."सहेति' । अथ गाथायां समाप्तायामग्नि प्रादक्षिण्येन परिक्रामतो वधूवरौ, तत्र मन्त्रः- 'तुभ्यमग्ने पर्यवहन्नि 'त्यादिकस्य प्रजया सहेत्यन्तस्य मन्त्रस्य वरपठितस्यान्ते । अत्र हस्तग्रहणादिपरिक्रमणान्तेषु कर्मसु वर एव मन्त्रान्पठति ॥ १।७।३ ॥

मन्त्रार्थः - हे अग्ने ! तुभ्यं तदर्थमेव सोमादयः अग्रे पूर्व जन्मदिनादारभ्य पर्यवहन् परिगृहीतवन्तः ततः सूर्यां सूर्यसम्बन्धिनी भार्यामिमां भवान्वहतु । किम्भूतः ? ना पुरुषः परमपुरुषार्थहेतुरित्यर्थः । तां जायां जायाबेन पुनः पश्चात्स्वभोगानन्तरं प्रजया पुत्रैः सह मह्यं दाः देहि । सन्धिरार्षः ॥

अनुवाद-वर-वधू अग्नि की परिक्रमा करते हुए यह मंत्र पढ़ें

मन्त्रार्थ - (ऋषि अर्थमा, छन्द अनुष्टुप्, देवता अग्नि ।) हे अग्निदेव ! तुम्हारे लिए ही साम प्रभृति देवताओं ने जन्म से लेकर अब तक इस कन्या का पाणिग्रहण किया है। अब सूर्य की सम्बन्धिनी इस भार्या का भार आप ग्रहण करें, स्वयं इसे र तदनन्तर सन्तानसुख के लिए आप इसे मुझको दें।

एवं द्विरपरं लाजादि ॥ १।७॥४॥

हरिहरभाष्यम् - 'एवं द्विरपरल्लाजादि' । एवमुक्तप्रकारेण द्विः वारद्वयमपरं पुनरपि लाजादि कुमार्या भ्रातेत्यारम्य परिक्रमणान्तं कर्म भवति ।। १।७।४॥

अनुवाद- इसी तरह दो बार और लाजाहोम, पाणिग्रहण, अश्मारोहण, गाथागान और अग्नि की प्रदक्षिणा करे ।

चतुर्थः शूर्पकुष्ठया सर्वाल्लाजानावपति भगाय स्वाहेति ॥ १।७।५।

हरिहरमाष्यम् -'चतुर्थः "स्वाहेति' । ततस्तृतीयपरिक्रमणानन्तरं कुमार्या भ्राता शूर्पकुष्ठया शूर्पस्य कोणेन सर्वान् यावच्छूर्पेऽवशिष्टान् लाजान् कुमार्या अञ्जली आवपति निक्षिपति । तान् लाजान् तिष्ठती कुमारी भगाय स्वाहेति मन्त्रेण चतुर्थं जुहोति । ततः समाचारातूष्णीं चतुर्थं परिक्रमणं वधूवरौ कुरुतः नेतरथावृत्तिम् इतरथावृतेः कारणस्य व्यवायस्याभावात् । ब्रह्मान्योरन्तरागमनं हि इतरथावृत्तिकारणं, कुत इति चेत् 'हविःपात्रस्वाम्यब्रिजां पूर्वं पूर्वमन्तरमृब्रिजां च यथापूर्वम्' इति परिभाषासूत्रात् । तेन परिक्रमणं कुर्वन्तौ वधूवरी ब्रह्माग्न्योर्मध्ये न गच्छेताम् ॥ १।७।५ ।।

अनुवाद- 'भगाय स्वाहा' इस मंत्र का उच्चारण करते हुए वधू चौथी आहूति में सूप के कोने से धान के सभी शेष लावाओं को आग में डाल दे।

त्रिः परिणीतां प्राजापत्य हुब्बा ॥ १।७।६ ॥

हरिहरभाष्यम् - 'त्रिः परि....'हुब्बा' । पूर्ववदुपविश्य प्रजापतये स्वाहेति ब्रह्मान्वारब्ध्यो हुब्बा इदं प्रजापतय इति त्यागं विधाय ॥ १।७६ ॥

अनुवाद- तीन बार परिक्रमा कराने के बाद वधू को बिठाकर आचार्य 'प्रजापतये स्वाहा' कहकर प्रजापति को आहुति देकर पुनः दूसरा कार्य प्रारम्भ करे।

टिप्पणी - लाजा होम में प्रत्येक बार तीन-तीन मंत्रों से आहुतियां दी जाती हैं। साथ ही परिक्रमा भी चलती रहती है। इस प्रकार तीन बार तो मंत्रोच्चारपूर्वक तथा चौथी बार मौन परिक्रमा होती है। विवाह में पारस्कर के अनुसार सात की जगह यही चार परिक्रमाएँ होती हैं। प्रदक्षिणा के बाद वर उत्तर की ओर सात कदम आगे बढ़ता है, यही सप्तपदी का क्रम माना गया है।

इस सन्दर्भ में हरिहर के भाष्य से गदाधर असहमत हैं। हरिहर-भाष्य के

समर्थकों में गंगाधर, रेणु दीक्षित और वासुदेव प्रभृति प्रमुख हैं।

'हविष्पात्रं स्वामृब्जिां पूर्वं पूर्वमनन्तरमृब्जिां च यथापूर्वमिति' । परिभाषा-सूत्र के इस वचन को आधार मानकर हरिहर का कहना है कि चुपचाप चतुर्थ परिक्रमा करते हुए 'वर-वधू' ब्रह्मा और अग्नि के बीच से न जायें।

किन्तु लाजाहोम के प्रसङ्ग में 'अग्निपरिणयन' का विधान है। यह कैसे सम्भव होगा? देवपरिक्रमा की तरह ही तीन बार अग्नि-परिक्रमा भी होती है । आग्न सामीप्य के विधान के कारण ही वर-वधू को ब्रह्मा और अग्नि के बीच से गुजर चाहिए । यहाँ परिभाषा-सूत्र का निर्देश यह है कि हविष् अर्थात् व्रीहि आदि, पात्र सूप इत्यादि, स्वामी यजमान वधू-वर तथा ब्रह्मा आदि ऋब्विक, इनमें पूर्व-पूर्व उत्तर अपेक्षा अग्नि का सामीप्य अधिक उपयुक्त है। जब हविष अन्तरंग है तो पात्र अन्तरंग है तो हविष् बहिरंग, जब पात्र अन्तरङ्ग है तो यजमान अन्तरङ्ग है तो ब्रह्मा प्रभृति बहिरंग । तात्पर्य यह कि अन्तरङ्ग होंगे तब यजमान बहिरङ्ग। ऐसा होने पर परिभाषासूत्र का हो होगा, जो यह बतलाता है कि यजमान अर्थात् वर-वधू ब्रह्मा की अपेक्षा अन्तरङ्ग है । इन्हें अग्नि का सामीप्य अधिक आवश्यक है। परिभाषासूत्र के इस आशय की अवहेलना के कारण ही हरिहर ने उलटा अर्थ किया है। इसीलिए पर तीव्र प्रहार करते हुए गदाधर ने कहा है-'अत्र हरिहरमिश्ररबुध्वंवस्वतः पाण्डित्यं कृतमस्ति ।'

तात्पर्य यह है कि वर-वधू को ब्रह्मा के पीछे से नहीं, प्रत्युत ब्रह्मा और अग्नि के बीन से ही परिक्रमा करनी चाहिए। इसकी सम्पुष्टि प्रयोगरत्न से भी होती है। यथा--'चतुर्थपरिक्रमणवज्यं ब्रह्माग्नी अन्तरागतिर्भवेदिति' ।

॥ प्रथमकाण्ड में सप्तम कण्डिका समाप्त ।।

अष्टमी कण्डिका

सप्तपदीक्रमः

अथैनामुदोचीं सप्त पदानि प्रक्रामयति - एकमिषे, द्वे ऊर्जे, त्रीणि रायस्पोषाय, चत्वारि मायोभवाय, पडन पशभ्यः, षड ऋतभ्यः, सखे सप्तपदा भव सा मामनुव्रता भव ॥१।८।१॥

हरिहरभाष्यम् - 'अथैना.....व्रता भव' । अथ प्राजापत्यहोमानन्तरमेनां वधूमुदीचीमुदङ्मुखीं सप्तपदानि प्रक्रामयति । सप्तप्रक्रमान् दक्षिणपादेन कारयति उत्तरोत्तरं वरः । कथम्भूतां, त्रिः परिणीतां त्रीन्वारानग्नेः प्रादक्षिण्येनानीतामिति व्यवहितेन सम्बन्धः । कुतः ? पाठक्रमादर्थक्रमो बलीयानिति न्यायात् ।। १।८।१॥

अनुवाद -प्राजापत्य होम के बाद वधू को 'एकमिषे इत्यादि क्रमशः मन्त्रोच्चार करता हुआ वर उत्तर की ओर सात कदम चलाता है।

मन्त्रार्थ-हे कन्ये ! तुम्हारा पहला कदम अन्न के लिए, दूसरा कदम शक्ति के लिए, तीसरा कदम धन के लिए, चौथा कदम सुख के लिए, पाँचवाँ कदम पशुधन के लिए, छठा ऋतुओं के लिए और सातवाँ मित्रता के लिए है। तुम मेरे कर्तव्यपालन में सहायक सिद्ध हो।

विष्णुस्त्वा नयत्विति सर्वत्रानुषजति ॥ १।८॥२॥

हरिहरभाष्यम् -एकमिष इत्यादिभिः सप्तभिर्मन्त्रः । तद्यथा-एकमिषे विष्णुस्त्वा नयत्विति वरेणोक्ते मन्त्रे वधूरेकं पदमुदग्ददाति । तथा द्वे ऊर्जे विष्णुस्त्वानयत्विति मन्त्रास्ते द्वितीयम् । त्रीणि रायस्पोषाय विष्णुस्त्वा नयत्वित्युक्ते तृतीयम् । चत्वारि मायोभवाय विष्णुस्त्वा नयत्वित्युक्ते चतुर्थम् ।

पञ्च पशुभ्यो विष्णुस्त्वा नयत्वित्युक्ते पञ्चमम् । षऽतुभ्यो विष्णुस्त्वा नयत्वित्युक्ते षष्ठम् । सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्वित्युक्ते सप्तमम् । विष्णुत्वा नयत्वित्येतावन्मन्त्रभाग सर्वत्र एकमिष इत्यादिसर्वेषु मन्त्रेषु अनुषजति सम्बध्नाति ।। १।८।२ ॥

अनुवाद-विष्णुस्त्वा नयतु' यह अंश पूर्वोक्त सातों मंत्र के साथ जोड़ा जाये ।

टिप्पणी-(१) एकमिषे विष्णुस्त्वा नयतु (पहला कदम)। इसी तरह (२) द्वे ऊर्जे विष्णुस्त्वा नयतु । (३) त्रीणि रायष्पोपाय विष्णुस्त्वा नयतु । (४) चत्वारिमायोभवाय विष्णुस्त्वा नयतु। (५) पञ्च पशुभ्यो विष्णुस्त्वा नयतु । (६) षऽऋतुभ्यो विष्णुरत्वा नयतु । (७) सखे सप्तपदा भव, सा मामनुव्रता भव विष्णुस्त्वा नयतु । 'विष्णुस्त्या नयतु' अंश का अर्थ है-विष्णु तुम्हें इस कार्य के लिए प्रेरित करें।

अभिषेचनम्

निष्क्रमणप्रभृत्युदककुम्भं स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवति ॥१।८॥३॥

उत्तरत एकेषाम् ॥ १।८॥४॥

हरिहरभाष्यम् -निष्क्रमणप्रभृत्युदकुम्भंस्कन्धे कृत्वा दक्षिणतोऽग्नेग्यितः स्थितो भवत्युत्तरत एकेषाम् । निष्क्रमणप्रभृति पित्रा प्रत्तामादाय गृहीत्वा निष्कामतीत्यादित आरभ्य कश्चित्पुरुषो जलपूर्ण कलशं स्कन्धे निधाय वधूवरयोः पृष्ठत आगत्याग्नेक्षिणस्यां दिशि मौनी स्थित आस्ते केपाञ्चित्पक्षे उत्तरतः ॥ १।८।३-४ ।।

अनुवाद- कन्यादान से लेकर जब वर वधू के साथ मण्डप से बाहर निकले, उससे पप कोई व्यक्ति जल से भरे घड़े को कन्धे पर रखकर, वेदी की दाहिनी ओर चूपचाप खड़ा हो जाये । कुछ आचार्यों के अनुसार घडे को लेकर वेदी के उत्तर की ओर खड़े हो जाये।

तत एनां मूर्धन्यभिषिञ्चति आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजमिति ॥ १।८॥५॥

हरिहरभाष्यम् -'तत एनां.... भेषजमिति'। ततस्तस्मात्स्कन्धस्थितादुदसदाम्रादिपल्लवसहितेन हस्तेन जलमादायनां वधुं मूर्द्धानि शिरस्यभिषिञ्चति वरः । आप: शिवा इत्यादिना भेषजमित्यन्तेन मन्त्रेण ।। १।८।५ ।।

मन्त्रार्थः- या आपः शिवाः कल्याणहेतवः शिवतमाः अतिशयाभ्युदयकारिण्यः शान्ततमा: परमानन्ददायः ता आपस्ते तव भेषजमारोग्यं कृण्वन्तु कुर्वन्तु ।

अनुवाद -उसके बाद कन्धे पर रखे कलश से आम्रपल्लव से जल लेकर 'आपः शिवा' इत्यादि मंत्र पढ़ते हुए वधू का मूर्धाभिषेक करे । मन्त्रार्थ- परम मांगलिक एवं अत्यन्त शान्त यह जल वधू को आरोग्य प्रदान करे ।

आपोहिष्ठेति च तिसृभिः ॥ १।॥६ ॥

हरिहरभाष्यम-पुनस्त्रावोदकमादाग-आपोहिष्ठेत्यादि-।-आपोजनयथाचन-इत्यन्ता-भिस्तिसृभिऋृभिरभिषिञ्चतीति चकारादनुपज्यते ॥ १।८।६६ ॥

अनुवाद - आपोहिष्ठा' इत्यादि तीन ऋचाओं भी अभिषिञ्चन करें।

टिप्पणी -'आपोहिष्ठा' इत्यादि तीन मन्त्र निम्नलिखित हैं

(१) आपोहिष्ठामयोभुवस्तानऽऊर्जे दधातन । महेरणाय चक्षते ॥१॥

(२) यो वः शिवतमोरसस्तस्य भाजयतेहनः । उशतीरिव मातरः ॥२॥

(३) तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ ! आपो जनयथा च नः ॥३॥

सूर्यदर्शनम्

अथैना सूर्यमुदीक्षयति तच्चक्षुरिति ॥ १।८७॥

हरिहरभाष्यम् - 'अथैना.."चारिति' । अथाभिषेकादुपरि सूर्यमुदीक्षस्वेति प्रैषेण सूर्यमेनां वधू वर उदीक्षयति सूर्यनिरीक्षणं कारयतीत्यर्थः । सा च वरप्रेषिता

सती तच्चक्षुरिति मन्त्रेण स्वयं पठितेन सूर्यं निरीक्षते दिवाविवाहपक्षे ।।१।८।७।।

अनुवाद- इसके बाद वधू को 'तच्चक्षुरित्यादि' मंत्र पढ़ते हुए सूर्यदर्शन कराये।

टिप्पणी-संभवतः पारस्कर ने दिवा-विवाह का विधान किया है। अन्यथा रात्रिकाल में सूर्यदर्शन तो सम्भव नहीं है ।

हृदयालम्भनम्

अथास्यै दक्षिणांसमधि हृदयमालभते -

मम व्रते वे हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु ।

मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् इति ॥१।८।८॥

हरिहरभाष्यम् - 'अथास्य....मालभते' । अथ सूर्येक्षणानन्तरमस्यै इति षष्ठयर्थे चतुर्थी । अस्या वध्वाः दक्षिणां समधि दक्षिणस्य स्कन्धस्योपरि हस्तं नीत्वा तस्या हृदयमालभते वरः स्पृशति । 'मम व्रते मह्यम्' इत्यनेन मन्त्रेण ।। १।८।८ ॥

मन्त्रार्थः - हे कन्ये ! इत्यध्याहारः । मम व्रते शास्त्रविहितनियमादौ ते तव हृदयं मनः दधामि स्थापयामि । किञ्च मम चित्तमनु मम चित्तानुकूलं ते तव चित्तमस्तु । त्वं च मम वाचं वचनम् एकमना अव्यभिचारिमनोवृत्तिर्जुषस्व हृष्टचित्ताऽऽदरेण कुरुष्व । त्वा त्वां स च एव प्रजापतिर्मह्यं मदर्थं मां प्रसादयितुमित्यर्थः, नियुनक्तु नियोजयतु ।।

अनुवाद-'मम व्रते' इत्यादि मन्त्र पढ़ता हुआ वर वधू के दाहिने कन्धे के ऊपर से हाथ लाकर हृदय का स्पर्श करे।

मन्त्रार्थ - (ऋषि परमेष्ठी, छन्द त्रिष्टुप, देवता प्रजापति ।) 'हे कन्ये ! शास्त्रविहित नियमों के पालन हेतु मैं तुम्हारे हृदय का स्पर्श करता हूँ। तुम्हारी चित्तवृत्तियाँ मेरे मनोनुकूल बन जायें। तुम एकनिष्ठभाव से मेरे

कथनों का अनुगमन करो । प्रजापति देवता तुम्हें मेरे साथ संयुक्त करें। तुम प्रत्येक दृष्टि से मेरी सहयोगिनी बनो।

अभिमन्त्रणम्

अथैनामभिमन्त्रयते सुमङ्गलीरियं वधुरिमाह-समेत पश्यत ।
सौभाग्यमस्य दत्वा याथास्तं विपरेतनेति ॥ १।८।९॥

हरिहरभाष्यम् -'अथैनाम'''तन' इत्यन्तं सूत्रम् । अथ हृदयालम्भनानन्तरमेनां वधू वरोऽभिमन्वयते । सुमङ्गली रित्यादिना मन्त्रेण अन शिष्टसमाचारात् उत्तरत आयतना हि स्त्रीति तिलिङ्गाच्च वधू वरस्य वामभागे उपवेशयति ।।१।८।९।।

मन्त्रार्थः- हे विवाहदेवताः ! इयं वधूः सुमङ्गलीः शोभनमगलरूपा विसर्गरछान्दसः । अत इमां कन्यां समेत सङ्गच्छत सङ्गत्य च इमा पश्यत दृष्टया विलोकयत । किञ्च अस्य कन्याय सौभाग्यं दत्वा अस्तं गृहं याय यात इत्यर्थः । न विपरेत न विमुखतया पराइत अपगच्छत । पुनरपि पुत्रादिमङ्गलमाशास्य पुनरागमनाय अजत इत्यर्थः । यद्वा यद्यस्तं याथ तर्हि न विपरेते ति अस्तं गृहा इति श्रुतेः ।। १।८।९।।

अनुवाद- हृदयस्पर्श के बाद वर वधू को 'सुमङ्गलीरियं' इत्यादि मन्त्रोच्चार करते हुए अभिमंत्रित करे। (इस मंत्र द्वारा सिन्दूर-दान का भी आचार है)

मन्त्रार्थ - (ऋषि ' प्रजापति, छन्द अनुष्टुप, देवता विवाहाधिष्ठातृ ।) ओ विवाह की अधिष्ठात्री देवियो ! यह वधु मंगलमयी है, तुम संगठित होकर समवेत रूप से इसका अवलोकन करो, इसके सौभाग्य और इसकी सन्तान को मंगलमय आशीर्वाद देकर ही तुम स्थान पर जाओ, विमुख होकर नहीं।

तां दृढपुरुष उन्मथ्य प्राग्योदग्वाऽनुगुप्त आगार आनड्डहे रोहिते चर्मण्युपवेशयति

इह गावो निषीदन्त्विहाश्वा इह पुरुषाः। इहो सहस्त्रदक्षिणो यज्ञ इह पूषा निषीदन्तु इति ॥ १॥८।१०॥

हरिहरभाष्यम्-'तां दृढ'..... गाव इति' । ततस्ता वधूं दृढपुरुषः बलवान् कश्चित्पुमानुन्मथ्योत्थाप्य प्राक् पूर्वस्यां दिशि उदक उदीच्यां वा दिशि पूर्वकल्पिते अनु-.. गुप्ते सर्वतः परिवृते आगारे गृहे तत्र च पूर्वमास्तीर्णे आनड्वहे आर्षभे रोहिते लोहितवर्णे चर्मणि अजिने प्राग्ग्रीवे उत्तरलोम्नि उपवेशयति इह गाव इत्यादिना निषीदन्विति । अस्य मन्त्रस्य पाठान्ते । केचन जामातैव दृढपुरुष इत्याहुः, तत्पक्षे जामातैव वधूमुत्क्षिप्य मन्त्रमुक्त्वा चर्मण्युपवेशयति । तत आगत्य यथास्थानमुपविश्य ब्रह्मणाऽन्वारब्धः स्विष्टकृद्धोमं विधाय संस्रवं प्राश्य ब्रह्मणे पूर्णपात्रवरयोरन्यतरं दक्षिणाव्रेन दत्त्वा । 'आचार्याय वरं ददाति' वरः स्वकीयाचार्याय वरं ददाति । वरशब्दार्थमाह-'गौाह्म... "वैश्यस्य' । ब्राह्मणः परिणेता गां वरं ददाति । क्षत्रियश्चेद्वरस्तदा ग्रामं ददाति । वैश्यश्चेदश्वम् । 'अधिरथः शतं दुहितृमते'-'यस्यास्तु न भवेभ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया' ।। इति मनुवचनादभ्रातृमतीपरिणयनं प्रतिषिद्धं तदतिक्रम्य यदि कश्चित्तामुद्हेत् तदा तस्याः पुत्रिकास्वदोषपरिहाराय च एकेन रथेन अधिकं गवां शतं तत्पित्र दत्वा उदहेत् ।। १।८।१०।।

अनुवाद-तब कोई बलवान् पुरुष वधू को उठाकर पूर्व या उत्तर दिशा में पहले में बने कोहबर में, गाड़ी में जुतने वाले लाल बल के चमड़े पर 'इह गावो निषीदन्त' इत्यादि मन्त्र पढकर बिठा दे। (श्रीहरिहर मिश्र के अनुसार यह दृढपुरुष वर ही होता है। कुछ आचार्य मामा को भी उठाकर ले जाने का निर्देशन करते है)

मन्त्रार्थ - (ऋषि प्रजापति, छन्द अनुष्टुप्, लिङ्गोक्त देवता ।) इस आसन पर गायें, घोड़े और पुरुष बैठे। हजारों गायों की दक्षिणामण्डित पुष्टिकर यज्ञदेवता भी यहाँ बैठे।

ग्रामवचनम्

ग्रामवचनम् ग्रामवचनं च कुर्युः॥ १।८।११॥

विवाहश्मशानयोमिं प्राविशतादिति वचनात् ॥ १।८।१२॥

तस्मात्तयोमः प्रमाणमिति श्रुतेः॥१।८॥१३॥

हरिहरभाष्यम् -'ग्रामवचनं च कुर्युः' । अत्र विवाहे ग्रामशब्दवाच्यानां स्वकुलवृद्धाना स्त्रीणां श्मशाने च वाक्यं कुर्युः अङ्कुरार्पणहरिद्राक्षतचन्दनादिधर्मप्रतिपादकम् । कस्मात् ? 'विवाहश्मशानयोमिं प्राविशतादि'ति वचनात्, 'तस्मात्तयोग्रामः प्रमाणमिति श्रुतेः विवाहे च श्मशाने च ग्रामं स्वकुलवृद्धाः स्त्रियः 'प्राविशतात्' शास्त्रातिरिक्तं कर्तव्यमाचारं पृच्छेदिति वचनात्, इति स्मृतेः । न केवलं स्मृतेः श्रुतेश्चापि । का सा श्रुतिः- 'तस्मात्तयोमः प्रमाणमि' ति । यतः स्वकुलवृद्धाः स्त्रियः पूर्वपुरुषानुष्ठीयमानं सदाचारं स्मरन्ति तस्मात्तयोविवाहश्मशानयोामः प्रमाणं सदाचारबोधकमित्यर्थः ॥ १।८।११-१३ ॥

अनुवाद - इसके बाद ग्राम की वृद्ध स्त्रियाँ जो कहें, वह लोकाचार किया जाय, क्योंकि स्मृतियों में कहा गया है कि विवाह और अन्त्येष्टि संस्कारों में शास्त्रीय आचार के अतिरिक्त कुल की वृद्धाओं की वाणी को प्रमाण मानकर चलना चाहिए।

दक्षिणादानम्

आचार्याय वरं ददाति ॥१।८॥१४॥

गौर्ब्रह्मणस्य वरः ॥ १।८।१५॥

ग्रामो राजन्यस्य ॥ १।८॥१६॥

अश्वो वैश्यस्य ॥ १।८॥१७॥

अनुवाद-वर आचार्य को इस प्रकार दक्षिणा दे-माहाण-पर गाय-दाग दे, क्षत्रिय-वर ग्राम-दान दे और वैश्य-वर अश्व-दान दे।

अधिरथमं शतं दुहितृमते ॥ १।८१८॥

अनुवाद - केवल कन्या सन्तान वाले व्यक्ति को सौ गायें एवं एक रप देकर उसकी कन्या से विवाह करें (क्योंकि बिना भाई की कन्या के साथ विवाह निषिद्ध माना गया है)।

ध्रुवदर्शनम्

अस्तमिते ध्रुवं दर्शयति - ध्रवमसि ध्रुवं ब्रा पश्यामि प्रवैधि पोष्ये मयि। मह्यं ब्रादाद् बृहस्पतिर्मया पत्या प्रजावती सजीव शरदः शतम् इति ॥ १।८॥१९॥

हरिहरभाष्यम् -'अस्त... ..'यति'। दिवा विवाहश्चेत्तदा अस्तमिते सूर्ये अमुकि ध्रुवमीक्षस्वेति प्रेषेण वधूं ध्रुवं तारकाविशेषं दर्शयति । रात्रौ विवाहश्चेत् तदा वरदानानन्तरमेव । तद्यथा ध्रुवमसीत्यादि सञ्जीव शरदः शतमित्यन्तं वरेण पाठितेन मन्त्रेण वधवमीक्षते ॥ १।८।१९ ॥

मन्त्रार्थः - हे वधु ! ब्रं ध्रुवमसि ध्रवा शाश्वती असि भवसि यतः ब्रा ब्रां ध्रुवं तारकाविशेषं पश्यामि दर्शयामि । अत्रान्तर्भूतो णिच् ज्ञेयः । अतस्ब्रमपि ध्रवा शाश्वती पोष्या पोषणीया मत्प्रजापोष्ट्री वा एधि भव वर्द्धयेति वा । एतदर्थमेव बृहस्पतिर्ब्रह्मा ब्रा ब्रां मह्यमदात् दत्तवान् । अतो मया पत्या भ; सह प्रजावती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि जीव प्राणिहि ॥ १।८।१९॥

अनुवाद - सूर्यास्त होने पर रात्रि-विवाह में वर-वधू को 'ध्रुवमसि' इत्यादि मंत्र पडते हुए धुव तारा दिखलाए। (रात्रि-विवाह में कन्यादान के बाद ध्रुवदर्शन कराए ।)

मन्त्रार्थ - (ऋषि परमेष्ठी, छन्द पंक्ति, देवता प्रजापति ।) हे वधू ! ध्रुवतारा की तरह हमारे घर में तुम अचल रहों। मैं तुम्हें ध्रुवतारा की तरह ही अचल - अटल देख रहा हूँ। ध्रुव की तरह अचल रहकर तुम मेरी सन्तति का पालन-पोषण करो। ब्रह्मा और प्रजापति ने इसीलिए तुम्हें मुझको सौंपा है। तुम पति, पुत्र और पोतों से युक्त होकर भरी-पूरी रहकर सौ साल तक जीओ।

सा यदि न पश्येत्पश्यामीत्येव ब्रूयात् ॥ १८॥२०॥

हरिहरभाष्यम् - 'सा यदि . . . 'ब्रूयात्' । सा वधूर्यदि ध्रुवं नेक्षेत तथापि पश्यामीत्येवं वदेत् न विपरीतम् ।। १।८।२० ॥

अनुवाद - यदि वधू को ध्रुवतारा नहीं भी दिखलायी दे तब भी उसे कहना चाहिए कि मैं देख रही हूँ।

त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शयीयातां संवत्सरं न मिथुनमुपेयाता द्वादशरात्र-षड्रात्रं त्रिरात्रमन्ततः॥१८॥२१॥

हरिहरभाष्यम् -'त्रिरात्र.....'ताम्'। विवाहदिनमारभ्य त्रिरात्रं त्रीणि अहोरात्राणि अक्षारालपणाशिनौ अक्षारं च अलवणं च अक्षारालवणं तदश्नीत इत्येवंशीलो अक्षारालवणाशिनौ स्यातां भवेताम् । अधः आस्तरणास्तृतायां भूमों न खद्वायां शायाता स्वपेताम । 'संवत्सरं....."मन्ततः'। संवत्सरं वर्ष यावन्मिथुनम् अभिगमनं नोपेयातां नोपगच्छेताम् । अथवा द्वादशरात्रमयबा षडानं यदा त्रिरात्रभन्ततः संवत्सरादिपक्षाणामन्ते त्रिरात्रमित्यर्थः । संवत्सरादिविकल्पास्तु शक्त्यपेक्षया व्यवस्थिता विशेषाः । संपरसराणिक्षाशक्ती त्रिरात्रपक्षाश्रयणेऽपि चतुर्थीकर्मानन्तरं पञ्चम्यादिरात्रावभिगमनं, चतुर्थीकर्मणः प्राक् तस्या भार्याब्रमेव न संवृत्तं विवाह करारपाच्चतुर्थीकर्मणः ॥ १।८।२१ ॥

॥ अथ अष्टमी कण्डिका समाप्त॥

नवमी कण्डिका

नित्यहोमविधिः

उपयमनप्रभृत्यौपासनस्य परिचरणम् ॥ १।९।१॥

हरिहरभाष्यम् - 'उपयम.....परिचरणम्' । अत्रौपासनस्यायराध्यस्याग्नेः परि चरणमुपासनं व्याख्यास्यते कथमुपयमनप्रभृति उपयमनपुशादानमारभ्य । कोऽर्थः । उपयमनकुशानादाय समिधोऽभ्याधाय पर्युष्य जुहुयादिति यावत् ॥ १।९।१ ॥

अनुवाद - विवाहित व्यक्ति प्रतिदिन उपयमन कुशाओं से कुशकण्डिकोक्त विधि से अग्नि की परिचर्या करे।

अस्तमितानुविसयोः वना तण्डुलरक्षतैर्वा ॥ १।९।२॥

हरिहरभाष्यम् - तस्य कालनियममाह-'अस्तमितानुदितयोः' । मस्तमितच अनुदितश्च अस्तमितानुदितो तयोस्तथासूर्ययोः सूर्यस्यास्तमयानुदिताभ्यामुपलक्षितयोः कालयोरित्यर्थः । तत्रास्तमितलक्षणं छन्दोगपरिशिष्टे-'यावत्सम्यङ्न भाव्यन्ते नभस्यक्षाणि सर्वतः । न च लोहितिमापति तावत्सायं तु हूयते' ।। अनुदितस्य द्वैविध्यम्-अनुदितः समयाध्युषितश्च । तत्रानुदितस्पष्टतारकोपलक्षितः ततः परमुदयात्प्राक् समयाध्युषितः । तथा च मनुः-उदितेऽनुदिते चैव समयाध्युषिते तथा । सर्वथा वर्तते यज्ञ इत्यर्था वैदिकी श्रुतिः ॥ इति

सम्पूर्णादित्यमण्डलदर्शनोपलक्षित उदितः । तत्र वाजसनेयिनां नियमेनानुदिते होमः। 'सूर्यो ह वा अग्निहोत्रमित्यारभ्य तस्मादुदितहोमिना विच्छिन्नमग्निहोत्रं मन्यामह' इत्यन्तेन श्रुतिसमाम्नायेन उदितहोमनिन्दापूर्यकमनुदितहोमस्य समर्थितत्वात् । छन्दोगानामुदितानुदितयोविकल्पः उदितेऽनुदिते वेति गोभिलवचनात् । आश्वलायनानां पुनरुदितहोमनियमः, तथा च तैत्तिरीयब्राह्मणम् -प्रातःप्रात नृतं ते वदन्ति पुरोदयात् जुह्वति येऽग्निहोत्रम् । दिवाकीर्त्यमदिवाकीर्तयन्तः सूर्योज्या तदा ज्योतिरेषामिति । अनुदिते होमे निन्दार्थवादपुरः सरं तस्मादुदिते होतव्यमिति उदिते होमविधानात् । होमद्रव्य नियममाह- दध्ना तण्डुलैरक्षैतैर्वा जुहुयात् । दध्ना गव्येन तण्डुलैर्व्रीहिमयैः अक्षतैः सत्वक्कैर्यवैर्वा विकल्पेन एतेषामन्यताइत्यर्थः॥ १।९।२॥

अनुवाद-सूर्योदय के पहले और सूर्यास्त के बाद दही, अरबा चावल अथवा सत्तू से होम करना चाहिए।

टिप्पणी - उदित और अनुदित होम के विषय में बड़ा विवाद है। यजुर्वेदीय ब्राह्मण अनुदित होम ही करते हैं। सामवेदिओं के लिए वैकल्पिक व्यवस्था है। ऋग्वेदीय ब्राह्मण उदित होम ही करते हैं। तैत्तिरीय ब्राह्मण में कहा गया है कि जो लोग अनुदित होम करते हैं वे सबेरे-सबेरे झूठ बोलते हैं ।

'प्रातः प्रातरनृतं ते वदन्ति पुरोदयात् जह्वति येऽग्निहोत्रम् ।

दिवाकीत्यैमदिवाकीर्तयन्तः सूर्योज्योतिर्न तदा ज्योतिरेषाम् ॥

अग्नये स्वाहा प्रजापतये स्वाहेति सायम् ॥ १।९।३॥

हरिहरभाष्यम् -'अग्नये ... स्वाहेति प्रातः' । तत्र सायमग्नये स्वाहेति पूर्वाहुति प्रजापतये स्वाहेत्युत्तरां जुहुयात् । सर्वत्र प्रजापतियाग उपांशु स्वाहाकारः श्राव्यस्त्यागश्च । आधारे तु स्वाहान्तोऽपि मानसः ॥ १।९।३ ॥

अनुवाद - संध्यावेला में 'अग्नये स्वाहा' और 'प्रजापतये स्वाहा' मंत्र पढ़कर

दो आहुतियाँ डालनी चाहिए।

सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः ॥ १।९।४ ॥

हरिहरभाष्यम् -तथा सूर्याय स्वाहेति पूर्वा प्रजापतये स्वाहेत्युत्तरां, प्रातस्त्यागास्तु प्रयोगे वक्ष्यन्ते । ते च यजमानकृत्याः, कुतः ? प्रधानत्वात् । प्रधानं स्वामी फलयोगादिति कात्यायनवचतात् । प्रधानं हि द्रव्यस्वत्वपरित्यागः । ततश्च प्रवसता यजमानेन यथाकालं यथादैवतं शुचिना आचान्तेन प्राङ्मुखोपविष्टेन सर्वकर्मसु कर्तव्याः । तत्र सायमादिप्रातरन्तमेकं कर्म प्रचक्षते इति वचनात् सायंहोमद्रव्येणैव प्रातहोमः कर्तव्यः । तया येन होत्रा सायं हुतं तेनैव प्रातर्होतव्यम् । येनारम्भस्तेनैव समाप्तिरिति न्यायाच्च । तथा दधितण्डुलयवानामलाभे श्यामाकनीवारवेणुयवकन्दमूलफलजलसप्टानां पूर्वपूर्वालाभे परं परं नित्यहोमाय ग्राह्यम् । कन्दं सूरणादि, फलमाम्रादि ॥ १।९।४॥

अनुवाद - प्रभातवेला में 'सूर्याय स्वाहा' और 'प्रजापतये स्वाहा' मन्त्र पढ़कर दो आहुतियाँ डालनी चाहिए।

पुमांसौ मित्रावरुणौ पुमासावश्विनावभौ। पुमानिन्द्रश्च सूर्यन पुमा संवर्ततां मयि पुनः स्वाहेति पूर्वा गर्भकामा ॥ १।९।५॥

हरिहरभाष्यम् - अस्यैव कर्मणः कामसंयोगमाह-'पुमा सो.... गर्भकामा' । पुमा सौ मित्रावरुणावित्यादिना मन्त्रण गर्भकामा पत्नी पूर्वामाहुति जुहुयात् । अत्र पूर्वा गर्भकामेत्यस्य कोऽर्थः ? किं नित्ययोद्वयोराहुत्योः प्रथमा पूर्वशब्देन विवक्षिता, उत ताभ्यां पूर्वा पूर्व होतव्या अन्येव । किन्तावत्प्राप्तम् ? अन्य वेति, मन्यान्तरेण देवतान्तरहोमविधानात्, मन्त्रस्य देवतायाश्च गुणत्वेन कर्मभेदकत्वात् । किञ्च द्वयोः प्रथमायाः पूर्वत्वे विवक्षिते नित्याग्नेयस्य सौर्यस्य च होमस्य बाधः प्रसज्येत । अत्रोच्यते, सत्यं मन्त्रदेवतयोः कर्मभेदकत्वं, पूर्वा गर्भकामेतीदं काम्यं कर्म प्रकृतं तु नित्यं, काम्यं नित्यस्य बाधकं,

पुरुषार्थसमासक्तं काम्यं नित्यस्य बाधकमिति न्यायात् तस्मादग्नये स्वाहा सूर्याय स्वाहेति नित्ये आहुती बाधित्वा पुमा सौ मित्रावरुणावित्यादिमन्त्र विहिता पत्नीकर्तृका कर्मान्तररूपा हि काम्या आहुतिः प्रवर्तते । यथा गोदोहनेन पशुकामस्य प्रणयेदित्यत्र काम्यं गोदोहनप्रणयनं नित्यं चमसं बाधित्वैव प्रवर्तते । अब कथं बाध्यबाधकभावः ? उच्यते-नित्यं तावदफलमकरणे प्रत्यवायजनकं, काम्यं तु फलवत् । तत्र फलवबलवत्, अफलं दुर्बलं बाधते । अत्र यदि केचित् प्रत्यवतिष्ठेरन् अधानानुविधानानन्तरं सायंप्रातर्होमानुविधानं कर्तव्यम्, आचार्येण केन हेतुनाऽत्र कृतम् ? को दोष इति चेत् परप्रकरणाम्नातं कथं षडा भवन्तीत्यारभ्य तामुदुह्येत्यन्तं विवाहप्रकरणं, यतः तत्र समाधीयते-सूत्रकारस्य शैलीयम्, विवाहात्प्राक् आवसथ्याधानकथनं यथा नैतच्छङ्कनीयं विवाहाग्निरेवावसथ्याग्निरिति पक्षश्चाचार्यस्याभिमतस्तेनात्र होमानुविधानं कृतमिति । विवाहाग्नेरोपासनत्वं कुतोऽवगतमिति चेत्-वैवाहिकेऽग्नौ कुर्वीत स्मार्त कर्म यथाविधि । पञ्चयज्ञविधानं च पक्ति चान्वाहिकी द्विज ।। इति मनुवचनात् । कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालादृते वाऽपि श्रौतं वैतानिकाग्निषु ॥ इति याज्ञवल्क्यवचनात्, कृतविवाहस्य सभार्यस्यावसथ्याधानाधिकारः, आश्वलायनगोभिलादिगृह्यकारवचनाच्च, तस्माद् बहुसम्मतत्वाद्विवाहसमनन्तरमेव होमविधानाच्चाचार्यस्य विवाहहोमसाधनाग्निरेवोपासनः सम्मत इति । तत्रोच्यते-आश्वलायनगृहमतं मन्त्रादिवचनं तु यथागृह्यमाहितोपासनाग्निपरं स्वस्वशाखाधर्मप्रतिपादनपरं वाजसनेयिनां पञ्चदशशाखाश्रयिणां माध्यन्दिनकाण्वप्रभृतीनां च । पारस्करचार्यस्य तु आवसथ्याधानप्रयोगं विवाहप्रयोगात्पृथगनु विदधतो नेप पक्षः, सम्मत इति गम्यते । यदि विवाहाग्निरेवोपासनाग्निरिति सम्मतः स्यात्तदाऽऽवसथ्याधानं दारकाल इत्यादि न पृथकप्रयोगमनुविदध्यात्, विवाहहोमेनैव आवसथ्याग्नौ सिद्धे पृयप्रयोगारम्भस्य वयात् ।

तस्मादन्यस्थानपाठो न दोषः । इदं च औपासनपरिचरणं सर्वदा न सकृत,यतः-'ततोऽस्तमितेऽस्तमितेऽग्नि परिचर्यं दर्व्योपघातं सक्तून सर्पभ्यो बलिं हरेत्' इति बलिहरणविधिपरे वाक्ये परिचरणस्य नित्यत्वं ज्ञापयति । छिन्न लूनं च पिष्टं च सान्नाय्यं मन्मयं तथा । लोकसिद्ध गृहीतं चेन्मन्त्रा जप्याः कठासवाद ॥ छिन्नादि लोकसिद्धं चेदाद्रीयेत क्रतुं प्रति । तत्तन्मन्त्रजपं प्राह भारद्वाजः कृतम् ॥ छिन्ने चावहने लने पिष्टे दुग्धे च मृन्मये । खाते च लौकिके प्राप्ते जपो नास्त्यद वाजिनाम् ॥ अत्र च न मन्त्रान्ते स्वाहाकारहोमो किन्तु आदावेव । न चोङ्कारःप्रतिमन्नं किन्तु आद्य एवं।। यदाह- स्वाहाकुर्यान्न मन्त्रान्ते स चैव जुहुयाद्धविः। स्वाहाकारेण कुबाऽग्नौ पश्चान्मन्त्रं समापयेत् ।। सामगानामयम् । नोङ्कुर्याद्धोममममन्त्राणां पृथगादिषु कुत्रचित् । अन्येषां चाविकृष्टानां कालेनाचमनादिना । अविकृष्टानामनन्तरितानां कालेन आचमनादिना वा ॥१।९।५॥

अथ प्रयोगः-आवराध्याधानोत्तरकालं तद्दिवस एव सायंप्रातर्होमनिमित्तं मातृपूजापूर्वकमाभ्युदयिक श्राद्धं कृबा सन्ध्यावन्धनानन्तरमग्निसमीपं गबा पश्चादग्नेः प्राङ्मुख उपविश्य उपयमनकुशान् समिधस्तिस्त्रः गणिकावारि दध्यादीनामन्यतमं होमद्रव्यम् अग्नेरुत्तरतः प्राच आसाद्य उपयमनकुशानादाय तिष्ठन् समिधोऽभ्यादाय पर्युक्ष्य द्वादशपर्वपूरकेण दधितण्डुलयवानामेकतमेन द्रव्येण हस्तेनैव स्वङ्गारिणि स्वर्चिषि वह्नौ मध्यप्रदेशे देवतां ध्यायन् जुहयात् , अग्नये स्वाहा इदमग्नये,तदुत्तरत्तः मनसा प्रजापतये स्वाहा, इदं प्रजापतये इति सायम् । तथैव सूर्याय स्वाहा इदं सूर्याय, प्रजापतये स्वाहा इति (त्याग मिति) प्रातः । पत्नी चेद गर्भकामा भवति तदा **पुमांसौ मित्रावरुणौ पुमासावश्विनावभौ। पुमानिन्द्रश्च सूर्यन पुमा संवर्ततां मयि पुनः स्वाहेति पू**र्वामाहुति पत्नी जुहोति, उत्तरां यजमानः । इदं मित्रावरुणायामक्षियभ्यामिन्द्राय सूर्याय च । इति नित्यहोमविधिः ।।

अनुवाद- धर्म की कामना करने वाली पत्नी पहले 'पुमां पौ' इत्यादि मन्त्र से

हवन करे । श्रेष्ठ पुरुष, मित्र और वरुण, दोनों अश्विनीकुमार, इन्द्र और सूर्य मेरे गर्भाशय में पुरुष रूप में संयुक्त हों।

टिप्पणी-अग्निहोत्री ब्राह्मण को स्वस्थ रहने पर स्वयं हवन करना चाहिए । अस्वस्थता की स्थिति में किसी अन्य नैष्ठिक ब्राह्मण से भी हवन करवाया जा सकता हैं, परन्तु रोका नहीं जा सकता

'सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते ।
स्वयं होमे फलं यत्स्यान्न तदन्येन लभ्यते ॥
होमे यत्फलमुद्दिष्टं जुह्वतः स्वयमेव तु ।
हयमाने तदन्येन फलमर्द्ध प्रपद्यते ॥'-स्मृत्यर्थसार

उसकी विधि भी वहीं बतलाई गई है

'यजमानः प्रधानं स्यात् पत्नी पुत्रश्च कन्यका ।
ऋत्विक् शिष्यो गुरुतिा भागिनेयः सुतापतिः ॥
एतैरेव हुतं यत्तु तद्धतं स्वयमेव हि ।

पत्नी कन्या च जुहुयाद्विना पर्युक्षणक्रियाम् ॥'-वही

॥प्रथमकाण्ड में नवम कण्डिका समाप्त ।।

दशमी कण्डिका

नैमित्तिकहोमः

राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाऽऽज्यसंस्कृत्येहरतिरिति जुहोति नानामन्त्राभ्याम् ॥ १।१०।१॥

हरिहरभाष्यम् -अथ नैमित्तिकमुच्यते-'राज्ञोऽक्ष... श्चोद्वहने'। राज्ञः प्रजापालनाधिकृतस्य यात्रादिप्रस्थितस्य अक्षभेदे रथावयवभङ्गे नद्धविमोक्षे नद्धस्य रथस्य विमोक्षे सन्नहनच्छेदे वा यानविपर्यासे यानस्य विपर्यासे अधोमुखादिभावे वा अन्यस्यां वा व्यापत्तौ अन्यस्मिन्वा अशुभसूचकं निमित्ते स्त्रियाश्चोद्वहने उद्वाहितायाः पूर्वं पतिगृहनयने चशब्दात् रथाक्षभेदादिके निमित्ते सजाते नैमित्तिकं प्रायश्चित्तरूपं कर्मोच्यते । कर्मोपपाते प्रायश्चित्तं तत्कालमिति वचनात् । निमित्तसमनन्तरमेव नैमित्तिकं कुर्यात् । तद्यथा-'तमेवा.... 'मन्त्राभ्याम्' । तमेवेति यदि राज्ञो निमित्तं तदा प्रास्थानिक सेनाग्नि, यदि स्त्रियाः निमित्तं तदा वैवाहिकमग्नि पञ्च भूसंस्कारान्कृत्वा उपसमाधाय स्थापयित्वा ब्रह्मोपवेशनादि पर्युक्षणान्तां कुशकण्डिकां विधाय, एष एव विधिर्य क्वचिद्धोम इत्यनेनैवाज्यसंस्कार प्राप्ते, पुनराज्यह. संस्कृत्येति वचनम् आधारहोमात्प्रागेव इह रतिरित्याज्याहुतिद्वयप्राप्त्यर्थम् । ततश्च पर्युक्षणान्ते इह रतिरिति नानामन्माभ्यां द्वाभ्यां जुहोत्याहुतिद्वयम् । तत आधारादि । स्विष्टकृदन्ते ॥ १।१०।१॥

सन्दर्भ -विवाह के बाद पहली बार पिता के घर से पति-गृह में वधू के जाने पर यान-हवनादि का ऐसे ही दूसरे अवसरों पर भी विधान करते हुए हवन-विधि का वर्णन करते हैं।

अनुवाद-यात्रा के अवसर पर राजा के रथ की धुरी टूट जाने पर, रथ का जुआ टूट जाने पर, रथ के उलट जाने पर अथवा किसी तरह की कोई अन्य आपत्तियां आने पर या प्रथम बार पितृगृह से पति के घर वधु के पहुंचने पर सेनाग्नि या आवसथ्याग्नि या प्रथम कण्डिका में वर्णित विधि से स्थापित कर घी का संस्कार करके 'इह रति' इत्यादि मंत्र पढ़ते हुए दो आहुतियाँ डाले, फिर विविध मन्त्रों से दो-दो आहुतियाँ देकर हवन करे।

टिप्पणी -आहुति-क्रम- 'इह रतिरिह रमध्वं इह धृतिरिह स्वधृतिः स्वाहा', पहली आहुति । 'इदमग्नये० । उपसृजन् वरुणं मात्रे वरुणो मातरन्धयन् । रायस्पोषमस्मासुदीधरस्वाहा' दूसरी आहुति दे । फिर आधार से स्विष्टकृत तक १४ आहुतियां डाली जायेंगी।

अन्यद् यानमुपकल्प्य तत्रोपवेशयेद्राजानं स्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनाबाहार्षमिति चैतया ॥ १।१०।२॥

हरिहरभाष्यम् - 'अन्य द्या'... 'चैतया' । अन्यद्रथादिकं यानं वाहनमुपकल्प्य संयोज्य तत्र तस्मिन् याने राजानं नृपं स्त्रियं चोद्वाहितां वधूगुणवेशयेत् आरोहोत् । कथम् ? प्रतिक्षत्रे प्रतितिष्ठामीत्यादिना प्रतितिष्ठामि यज्ञ इत्यन्तेन गन्त्रण, आत्माहापमित्येतयर्चा च ॥ १।१०।२ ।।

अनुवाद -स्विष्टकृत् आहुति के बाद दूसरी सवारी की व्यवस्था कर राजा को या वधू को 'प्रतिक्षत्रे' तथा 'आबाहार्प' इत्यादि प्रचाएँ पढ़ते हुए फिर से बैठाएँ।

(१) प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्र प्रत्यश्वेषु प्रतितिष्ठामि गोषु ।

प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रतिप्राणेषु प्रतितिष्ठामि पृष्टे प्रतिद्यावापृथिव्योः

प्रतितिष्ठामि यज्ञे।

मंत्रार्थ- (ऋषि प्रजापति, छन्द अतिशक्वरी, देवता विश्वेदेव ।) राष्ट्र के सूरवारों के बीच मेरी प्रतिष्ठा बनी रहे। घोड़े और गायों की गेरी राम्पदाएं बनी रहे । शारीरिक अवयव सुदृढ़ हों। मेरा आत्मबल और मेरी प्राण-शक्ति अक्षुण्ण सर्वथा स्वस्थ बना रहूं । मैं सामर्थ्य सम्पन्न बनकर धरती और आकाश के बीच सामाजिक कल्याणकारी कार्यों में निरन्तर व्यस्त बना रहूँ।

(२) आ ब्रा हार्षमन्तरभूवर्धवन्तिष्ठाविचाचलिः । विशस्त्वा सर्वा पायात मा ब्रद्राष्ट्रमधिभ्रशत् ।

मंत्रार्थ- (ऋषि ध्रुव, छन्द अनुष्टुप्, देवता अग्नि ।) हे अग्निदेव ! मैं तुम्हें यहाँ लाया हूँ। इस राष्ट्र के अन्तःकरण में तुम सर्वथा अटल और अविचल भाव से निवास करो। इस राष्ट्र की सारी प्रजा तुम्हें चाहती है। तुम सदैव इसके हित साधन में तत्पर रहो, ताकि यह राष्ट्र और यह जनपद कभी श्री हीन न हो।

धुर्य्यौ दक्षिणा ॥१॥१०॥३॥

प्रायश्चित्तिः ॥ १।१०॥४॥

हरिहरभाष्यम् - 'धुर्यौ दक्षिणा प्रायश्चित्तिः' । धुर्यौ धुरि साधू अनड्वाहौ दक्षिणा ब्रह्मणे देया, दक्षिणाशब्दः परिक्रयार्थे द्रव्ये वर्तते, येन ऋत्विजामानतिभवति । इदं कर्म प्रायश्चित्तिः दुनिमित्तसूचितदुरितापहारिणी अतः सति निमित्ते ।

अनुवाद –धुरी में जुतने वाले दो बैल दक्षिणा के रूप में दिये जाय । इस कर्म से दुनिमित्त सूचक पापों का निराकरण होता है।

ततो ब्राह्मणभोजनम् ॥ १।१०॥५॥

हरिहरभाष्यम् – 'ततो ब्राह्मणभोजनम्' । ततः कर्मसमाप्त्यनन्तरं ब्राह्मणस्य भोजनं कारयितव्यमिति सूत्रार्थः ।

अथ प्रयोग:-अक्षभेदादिनिमित्तानामेकतमे निमित्ते सञ्जाते शुचौ देशे पञ्च भूसंस्कारान्कृत्वा राज्ञः पुरोहितः सेनाग्निमुपसमाधाय वध्वा वरः वैवाहिकमग्नि ब्रह्मोपवेशनादिपर्युक्षणान्ते इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहेति प्रथमामाहुतिं जुहयात् । इदमग्नये । उपसृजन् धरुणं मात्रे धरुणो मातरन्धयन् । रायस्पोषमस्मासुदीधरत्स्वाहेति द्वितीयाम् इदमग्नये । इत्याहुतिद्वयं हुत्वा तत आघारादिस्विष्टकृदन्तं चतुर्दशाहुतिकं होमं विधाय संस्रवं प्राश्याचम्य धुर्यावनड्वाहौ ब्रह्मणे अस्य कर्मणः प्रतिष्ठार्थमेतावनड्वाहौ तुभ्यं ब्रह्मणे मया दत्ताविति प्रयोगेण दक्षिणां दत्त्वा अन्यद्यानमानीय तत्पुरोहितो राजानं वरो वधूमुपवेशयेत् प्रात क्षत्रे प्रतितिष्ठामि राष्ट्र, आत्वाहार्षमिति मन्त्राभ्याम् । ततो ब्राह्मणभोजनम् ॥ १।१०

अनुवाद - सम्पूर्ण कर्म समाप्त करने के बाद ब्राह्मणभोजन कराना चाहिए ।

टिप्पणी-कुशकण्डिका में बतलाई गई विधि से पंचभू-संस्कार यहाँ भी करना चाहिए।

॥ प्रथमकाण्ड में दशम कण्डिका समाप्त ।।

एकादशी कण्डिका

चतुर्थी कर्म

चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकहं श्रपयित्वाऽऽज्यभागाविष्टवाऽऽज्याहुतीर्जुहोति ॥ १।११।१॥

हरिहरभाष्यम् -'चतुर्थ्याम''र्जुहोति' । चतुर्थी तिथौ विवाहतिथिमारम्य अपररात्रे रात्रैः पश्चिमे यामे अभ्यन्तरतः गृहस्य मध्ये अग्नि वैवाहिकमुपसमाधाय पञ्च भूसंस्कारान्कृत्वा अग्नि स्थापयित्वा दक्षिणतो ब्रह्मासनमास्तीर्य तत्र पूर्ववद् ब्रह्माणमुप. वेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य प्रणीतास्थानादुत्तरत: जलपूर्ण ताम्रादिपात्रं स्थापयित्वा अत्र ब्रह्माणमुपवेश्येति पुनर्वचनमुदपात्रप्रतिष्ठापनावसरज्ञापनार्थम् । स्थालीपाकं चरुं यथाविधि श्रपयित्वा पर्युक्षणान्ते आघारानन्तरमाज्यभागाविष्ट्वाऽऽज्याहुती. जुहोति ॥ १।११।१॥

अनुवाद-विवाह के चौथे दिन रात के पिछले पहर घर के भीतर वैवाहिक अग्नि की स्थापना करे। आग की दाहिनी ओर ब्रह्मा को बैठाए तथा आग के उत्तर की ओर जलपूर्ण कलश रखें, फिर चरु पकाकर अग्नि और सोम की दो आहुतिया डाले । पुनः 'अग्ने प्रायश्चित्ते' इत्यादि पांच मंत्र पढ़कर घी की पाँच आहुतियों है।

अग्ने प्रायश्चित्त ब्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्ब्वा नायका उपधावामि, यास्मै पतिघ्नी तनुस्तामस्यै नाशय स्वाहा ॥

वायो प्रायश्चित्ते ब्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्ब्वा नाथकाम उपधावामि, यास्यै प्रजाघ्नी तमूस्तामस्यै नाशय स्वाहा ॥

सूर्य प्रायश्चित्ते ब्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्ब्वा नाथकाभ उपधावामि, यास्यै पशुघ्नी तनुस्तामस्यै नाशय स्वाहा ॥

चन्द्रप्रायश्चित्ते ब्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्ब्वा नाथकाम उपधावामि, याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा ॥

गन्धर्व प्रायश्चित्ते ब्वं देवानां प्रायश्चित्तिरसि, ब्राह्मणस्ब्वा नाथकाम उपधावामि, यास्यै यशोघ्नी तनुस्तामस्यै नाशय स्वाहेति ॥ १।११।२॥

हरिहरभाष्यम् - 'अग्ने प्राय..... 'नाशय स्वाहा' । आज्येन पञ्चाहुतीरेतैः स्वाहान्तमन्त्रर्जुहोति ॥१।११।२।।

मन्त्रार्थः -हे अग्ने ! हे प्रायश्चित्ते ! सर्वदोषापाकरण यतस्ब्वं देवानामिन्द्रादीनां मध्ये प्रायश्चित्तिः दोपापाकर्ताऽसि अहं च ब्राह्मणः ब्रह्मण्यः वैदिको वा भूब्वोपधावामि आराधयामि । किम्भूतोऽहम् ? नाथ उपयाञ्चायाम् आशीष्कामः ऐश्वर्यकामो वा प्रार्थयानो वा । उपधावनप्रयोजनमाह- या अस्यै पाठ्यर्थे चतुर्थी अस्या वध्वाः पतिघ्नी तनूस्तन्वा अवयवस्ताम् अस्य इमामुपकर्तु नाशय अपनय तुभ्यं स्वाहा सुहुतमस्तु समुदायवाचकोऽपि तनूशब्दोऽत्रावयववाचको ज्ञेयः । तेन यदस्याः पतिनाशकमङ्गलक्षणं हस्तरेखादि सामुद्रिकलक्षणोक्तं तदपाकृत्य शोभनमङ्गं विधेहीति वाक्यार्थः । एवमुपर्यपि व्याख्येयम् । तनविशेषणं देवता च भिद्यते । तद्यथा हे वायो ! पवन प्रजाघ्नी अपत्यनाशिनी एवमुत्तरत्रापि योज्यम् ।।

अनुवाद -सभी प्रकार के दोषों के घातक हे अग्निदेवता ! तुम देवताओं में श्रेष्ठ और दोषों के विनाशकर्ता हो। मैं एक कल्याणकामी ब्राह्मण तुम्हारी

आराधना करता है। इस वध की देह में पति को हानि पहुँचाने वाले जो अवयव हों, उन्हें नष्ट कर दो । आपके लिए सुहुत हो।

सभी प्रकार के दोषों के विनाशक हे वायुदेव ! देवताओं के बीच तुम श्रेष्ठ हो, दोष-विनाशक हो, मैं कल्याणकारी ब्राह्मण तुम्हारी आराधना करता है। इस वध की देह में सन्तान को हानि पहुँचाने वाले जो अवयव हों, उन्हें तुम नष्ट कर दो। मैं तुम्हारे लिए हवन करता हूँ।

सभी प्रकार के दोषों के विनाशक हे भगवान् भास्कर ! देवताओं के बीच तम श्रेष्ठ दोषापहारक हो। मैं कल्याणकामी ब्राह्मण तुम्हारी आराधना करता है। इस वधू की देह में हमारे घर के पशुओं को हानि पहुँचाने वाले जो अवयव हों, उन्हें तम नष्ट कर दो। तुम्हारे लिए मैं यह हवन करता हूँ।

सभा प्रकार के दोषों के विनाशक हे चन्द्रदेव ! तुम देवताओं में श्रेष्ठ दोषों को दूर करने वाले हो। मैं कल्याणकामी ब्राह्मण तुम्हारी आराधना करता हूँ। इस वधू की देह में घर को हानि पहुंचाने वाले जो अवयव हों, उन्हें तुम नष्ट करो । तुम्हारे लिए मैं यह आहति देता हूँ।

सभी प्रकार के दोषों के विनाशक हे गन्धर्व ! तुम देवताओं में श्रेष्ठ दोपहर्ता हो । मै कल्याणकामी ब्राह्मण तुम्हारी आराधना करता हूँ। इस वधू की देह में हमारे यश को हानि पहुँचाने वाले जो अवयव हों, उन्हें नष्ट करो । तुम्हारे लिए मैं यह आहुति देना हूँ।

स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति ॥ १।११।३ ॥

हरिहरभाष्यम् - 'स्थाली..."स्वाहेति' । स्थालीपाकस्य चरोः प्रजापतये स्वाहेत्येकामाहुतिं जुहोति ॥ १।११।३ ॥

अनुवाद -स्थालीपाक को लेकर 'प्रजापतये स्वाहा' इस मंत्र का उच्चारण करते हुए वर अग्नि में आहुति दे।

हुत्वा हुत्वैतासामाहुतीनामुदपात्रे संस्रवान्समवनीय तत एनां मूर्द्धन्यभिषिञ्चति - या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूरिज्नी तत एनां करोमि सा जीर्य त्वं मया सहासाविति ॥१।११।४॥

हरिहरभाष्यम् -'हुत्वाहु..... 'वनीय' । अग्ने प्रायश्चित्त इत्यादीनां प्राजापत्यात्तानां षण्णामाहुतीनां प्रत्येकं हुत्वा संस्रवान् हुतशेषानुदपात्रे समवनीय प्रक्षिप्य केषाञ्चिन्मते स्विष्टकृदाहुतेरपि । 'तत एनां मूर्धन्य भिषिञ्चति' । ततस्तस्मादुदपात्रादुदकमादाय एनां वधू वरो मूर्धन्यभिषिञ्चति । 'याते. सहासाविति' । अभिषेचनमन्त्रोऽयं असावित्यत्र वधूनाम ॥ १।११।४॥

मन्त्रार्थ:-हे असौ कन्ये ! या ते तवापत्यादिघातिनी पञ्चधा दुष्टा तनूः अत एव निन्दिता ततोऽनेनाभिषेचनेन एनां तनूं जारघ्नीम् उपपत्यादिदोषघातिना करोमि । सा त्वं मया पत्या भी सह जीयं निर्दष्ट वृद्धत्वं गच्छ ॥

अनुवाद-प्रत्येक आहुति देकर इन आहुतियों से बचे घी को उत्तर में रखे जल पात्र में डाल दें। उसी जल से वर वधु को अभिषिञ्चित करे तथा 'या ते' इत्यादि । मंत्र का पाठ करे।

मन्त्रार्थ -हे वधू ! तुम्हारी देह में जो पति को, सन्तान को, घर के पशुओं का, घर के यश को हानि पहुंचाने वाले निन्दित अवयव हैं, उनका विनाश हो । उपपत्ति जन्य भी कोई दोष हो, वह भी तुम्हारा नष्ट हो। इसके बाद तुम मेरे साथ बनकर रहो।

अथैनां स्थालीपाकं प्राशयति -

प्राणैस्ते प्राणान्त्सन्दधाम्यस्थिभिरस्थीनि मासांसानि त्वचा त्वचमिति ॥ १।११॥५॥

हरिहरभाष्यम् - 'अपना..... यति' । अथाभिषेकानन्तरमेनां वधू स्थालीपाकं चरुशेष प्राणस्ते प्राणान्त्सन्दधामीत्यादिना त्वचा त्वचमित्यन्तेन मन्त्रेण वरः

प्राशयति ॥ १।११।५ ॥

अनुवाद -अभिषेक के बाद चरुहोम से बची हुई खोर को लेकर 'प्राणस्ते' इत्यादि मंत्र पढ़ते हुए वर वधू को खीर खिलाये । हे वधू ! मैं अपने प्राणों से तुम्हारे प्राणों को, हड्डियों से हड्डियों को, मांस से मांस को, ब्वचा से ब्वचा को एक साथ मिलाता हूँ।

तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत होवित्परो भवति ।

हरिहरभाष्यम् - 'तस्मादे....."भवति'। यतोऽनेन चरुशेषप्राशनकर्मणा भर्त्रा सहैक्यं प्राप्ता दारा तस्मादेवंवित्पुरुषः श्रोत्रियस्य विदुषः दारेण भार्यया सह उपहासं मैथुनं नेच्छेत् न कामयेत्, हि यस्मात् एवंविदपि श्रोत्रियः परः शत्रुर्भवति ॥१।११।६।।

अनुवाद - इस चरु प्राशन के पश्चात् पत्नी पति के साथ एक हो जाती है। अतः । विद्वान् पति की पत्नी के साथ भूल से भी कोई व्यक्ति उपहास तक करने की इच्छा न करे। क्योंकि ऐसा करने पर वह उस श्रोत्रिय पति का परम शत्रु बन जाता है।

तामुदुह्य यथर्तुप्रवेशनम् ॥ १।११७॥

हरिहरभाष्यम् -'तामुदुह्य यथर्तुप्रवेशनम्' । एवं पूर्वोक्तेन प्रकारेण तां वध मुदुह्य विवाहयित्वा विवाहकर्मणा भार्यात्वं सम्पाद्य यथतु प्रवेशनम् ऋतकालमत प्रवेशनमभिगमनं, कुर्यादिति शेषः ॥ १।११।७ ।।

अनुवाद -पूर्वोक्त ढंग से विवाहकर्म संपादित कर उस वधू के साथ प्रत्येक ऋतु: काल में रमण करें।

ययाकामी वा काममाविजनितोः सम्भवामेति वचनात् ॥११॥

हरिहरभाष्यम् -'यथाकामी वा' । स्त्रियाः काममनतिक्रम्य यथाका स्यास्तीति यथाकामी वा भवेत् न ऋतुकालाभिगमननियमः । कुतः ? 'काम.....

वचनात्' । कामं स्वेच्छया आविजनितोः आप्रसवात् सम्भवाम भर्त्रा सह सङ्गता भवामेति स्त्रीणाम् इन्द्राद्वरप्रार्थनावचनात् । प्रजापतेरिति केचित् । अब यद्यपि यथतप्रोत मिति सामान्येनोक्तं तथापि स्मृत्यन्तरोक्तपर्वादिनिषेधपालनं कुर्यात् । यथाह मनुः अमावास्याऽष्टमी चैत्र पौर्णमासी चतुर्दशी। ब्रह्मचारी भवेन्नित्यमप्यती स्नातको द्विजः ।। याज्ञवल्क्योऽपि-षोडऋर्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् । ब्रह्मचार्यव पर्वण्याद्याश्चतस्रश्च वर्जयेत् ।। इत्यादि निषेधो यथाकामपक्षेऽपि समानः प्राप्तेऽभिगमने निषेधः प्रवर्तते । गर्भिण्यभिगमने निषेधस्तु काममाविजनितोः सम्भवामेति वचनात् वाध्यते । ऋतावनभिगमने दोषमाह मनुः-ऋतुस्नातां तु यो भायर्यां सन्निधौ नोपगच्छति। घोरायां ब्रह्महत्यां युज्यते नात्र संशयः ।। तथा च-ऋतुस्नातां तु यो भार्या शक्तः सन्नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ तथा-लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकः । यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः ॥ इत्यादिभिः स्मृतिभिः स्त्रीरक्षाया विहितत्वात् । तासां कामातिक्रमणे व्यभिचारशङ्कासम्भवात्तद्रक्षायं यथाकाम्यं, तस्माद्यथाकामे तु न नियमः यथाकामी वेति विकल्पेनाभिधानात्। अनभिगमने तु प्रत्यवायस्मरणाभावाच्च । अतो लोकानन्त्यं दिवः प्राप्तिश्च ।

अनुवाद-अथवा-नारी जव रमण करने की इच्छा अभिव्यक्त करे, तब उसके साथ मैथुन करना चाहिए। क्योंकि नारियों ने देवराज इन्द्र से यह वर का था कि जव हम चाहें, अपने पति के साथ सहवास करें।

अथास्यै दक्षिणां समधि हृदयमालभते - यत्ते सुसीमे हृदय दिवि चन्द्रमसि श्रितम् ।

वेदाहं तन्मां सदृ विद्यात् पश्येम शरदः शतं जान शतः शृणयाम शरदः शतमिति ॥ १।११।९।।

हरिहरभाष्यम् - 'अथास्यै..... शतम् इति । अयाभिगमनान्तरमस्यै अस्या भार्यायाः दक्षिणांसं दक्षिणस्कन्धमधि उपरि दक्षिणं हस्तं नीत्वा हृदयमालभते हृदयं वक्षः आलभते स्पृशति । यत्ते सुसीम इत्यादिना शृणुयाम शरदः शतमित्यनेन मन्त्रेण ।

मन्त्रार्थः - शोभना सीमा मूनि केशमध्ये पदतिर्यस्याः सा तस्याः सम्बोधनं हे सुसीमे ! शोभनसीमन्तिनि यत्ते तव हृदयं मनः दिवि स्वर्ग वर्तमाने चन्द्रमसि पितं तदधीनतया स्थितम्, तदहं वेद जानीयाम्, तच्च मां विद्यात् जानातु एवं परस्परानुगुणितहृदयाऽपत्यादिसहिता वयं शरदः शतमित्यायुक्तायंम् ।।

अनुवाद-मैथुन के बाद 'यते सुसीमे' मंत्र पढ़कर वधु के दाहिने कन्धे के ऊपर से हाय ले जाकर वधू के हृदय का स्पर्श करे :

मन्त्रार्थ -हे सुकेशि ! स्वर्ग में स्थित चन्द्रमा में जो तुम्हारा मन रमा है, उसे हम ठीक से समझें और हमारे मन को तुम ठीक से समझो। एक-दूसरे के मन को ठीक से समझते हुए हम दोनों सौ साल तक देखें, सौ साल तक जीएं और सौ साल तक सुनें।

एवमत ऊर्ध्वम् ॥ १।११।१०॥

हरिहरभाष्यम् - 'एवमत ऊध्वम्' । एवमनेनैव प्रकारेण अतोऽनन्तरमृतावृतो प्रवेशनं यथाकामं वा । इति सूत्रव्याख्या ।। १।११।१० ।।

अनुवाद-बाद में भी इसी प्रकार गर्भाधान किया जाय ।

टिप्पणी- कर्काचार्य से भिन्न प्रायः सभी आचार्यों ने स्त्री-प्रसंग पर अपना अभिमत व्यक्त किया है । रतिक्रिया सम्बन्धी कुछ संक्षिप्त नियम इस प्रकार हैं.ऋतुमती नारी के साथ भी अमावास्या, अष्टमी, पूणिमा और चतुर्दशी को संगम नहीं करना चाहिए। इसके अतिरिक्त ऋतुकाल में जो व्यक्ति स्त्री-संगम नहीं करता उसे घोर भ्रूणहत्या का पाप लगता है। स्त्री-प्रसंग की दृष्टि से युग्म रात्रिया प्रशा मानी गई हैं। विना स्नान किये, आतुरा, रजस्वला,

कुपिता, अकामा, परस्त्री, भूखी, प्यासी या अधिक खाई हुई और अप्रशस्त स्त्रियों के साथ मैथून नहीं करना चाहिये । स्नानोपरान्त सुगन्धित द्रव्यों के विलेपन के पश्चात अनुरक्ता स्त्री के साथ ही करना चाहिए।

॥ प्रथमकाण्ड में एकादश कण्डिका समाप्त ।।

द्वादशी कण्डिका

पक्षादिकर्म पक्षादिषु स्थालीपाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापथिवीभ्यामिति ॥ १।१२।१॥

हरिहरभाष्यम् -'पक्षादिषु..... पृथिवीभ्यामिति' । पक्षाणामादयः पक्षादयः तासु पक्षादिषु प्रतिपत्सु । अत्र यद्यपि पक्षादिष्वित्युक्तं तथापि सन्धिमभितो यजेतेति वचनात्–'पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः' ॥ इति पर्दचतुर्थोऽशोऽपि यागकालत्वेनाभिमतः, तथा—'पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते । स एव यागकाल: स्यात्परतश्चेत्परेऽहनि ।' तत्रापि'सन्धिर्यद्यपराल् स्यात् यागं प्रातः परेऽहनि । कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति ॥' इत्यादिभिर्वचनैर्यागकालं निर्णीय पर्वदिवसे कृतौपवसथिकाशनः सपत्नीकः शालायां जघनेनाग्नि रात्रौ जाग्रन्मिश्र इतिहास मिश्रो वा पृथक् शयित्वा प्रातः कृतस्नानसन्ध्यावन्दनप्रातर्होमः स्वाचान्तोऽग्नेः पश्चात्प्राङ्मुख उपविश्य पूर्वोक्तविधिना चरुं श्रपयित्वाऽऽज्यभागान्ते दर्श दर्शदेवताभ्यः पौर्णमासे पौर्णमासदेवताभ्यः प्रयोगे वक्ष्यमाणाभ्यश्चरुं हुत्वा ब्रह्मप्रजापतिविश्वदेवद्यावापृथिवीभ्यश्चरुं जुहोति ॥ १।१२।१॥

अनुवाद- प्रत्येक पक्ष की प्रतिपदा के दिन खीर पकाकर दर्श और पौर्णमास देवताओं की आहुतियां डालने के बाद ब्रह्मा, प्रजापति, विश्वेदेव और द्यावापृथिवा को आहुतियां दी जाये।

विश्वेभ्यो देवेभ्यो बलिहरणं भूतगोभ्य आकाशाय च ॥ १।१२।२॥

हरिहरभाष्यम् -'विश्वेभ्यो ....आकाशाय च'। बलिहरणं बलिदानं स्थालीपाकदेवताभ्यो विश्वेभ्यो भूतगृह्येभ्य: आकाशाय च ।। १।१२।२ ।।

अनुवाद-चरुहोम के सभी देवों, भुतदेवों, गुह्य देवों और आकाश को बलि दी जाये।

वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा, प्रजापतये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, अग्नये स्विष्ट कृते स्वाहेति ॥ १।१२।३ ॥

हरिहरभाष्यम् -'वैश्वदेवते स्वाहेति' । वैश्वदेवस्य विश्वेदेवा देवपितृमनुष्या देवा अस्येति वैश्वदेवः पाकः । पञ्चमहायज्ञार्थं साधितपाक इत्यर्थः । ननु वैश्वदेवस्याग्नौ जुहोतीति विश्वदेवसम्बद्धस्य चरोस्तद्भुतोपात्तस्य वा अग्नौ जुहोतीति कथं नोच्यते ? यथा वृषोत्सर्गे पोष्णस्य जुहोतीति पूषसम्बद्धः पृथगेव पिष्टमयः पूर्वसिद्धश्चरुगृह्यते, किमिति पञ्चमहायज्ञार्थः ? उच्यते-स्थालीपाकं-श्रपयिबेत्यत्र -स्थालीपाकस्यैकवचनान्तबाद् द्वितीयस्य वैश्वदेवस्य चरोरभावोऽवगम्यते पौष्णवत् । वैश्वदेवस्य पृथसिद्धस्य उपादानं तु पञ्चमहायज्ञार्थवैश्वदेवपाकस्य सद्भावानिवर्तते । पञ्चमहायज्ञार्थस्य वैश्वदेवबं कुत इति चेत् वैश्वदेवादन्नात्पर्युक्ष्येति सुत्रात् । अग्नौ जुहोतीति अग्निग्रहणं बलिकर्मता मा भूदिति । अग्नये स्वाहेत्यादि प्रयोगदर्शनार्थं सर्वत्र तस्यकदेशस्योद्धत्यासादितप्रोक्षितस्य अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो हुबा स्थालीपाकाद्वैश्वदेवाच्च अग्नये स्विष्टकृते जुहोति ततः शेषसमाप्तिं विधाय ॥ १।१२।३ ॥

अनुवाद-वैश्वदेव के पाक से निम्नलिखित होम करे ।

टिप्पणी-अग्नये स्वाहा, इदमग्नये । प्रजापतये स्वाहा, इदं प्रजापतये । विश्वयो देवेभ्यः स्वाहा. इदं विश्वेभ्यो देवेभ्यः । अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकते। भूः स्वाहादिनवाहुतिः ।

प्राशनान्ते बाह्यतः स्त्रीबलि हरति - नमः स्त्रियै नमः, पुंसे वयसेऽवयसे नमः, शुक्लाय कृष्ण दन्ताय पापीनां पतये नमः । ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददन्निति ॥ १।१२।४ ॥

हरिहरभाष्यम् -'बाह्यत''ऽवयसे नमः' इत्यादिभिर्मन्त्रैः बाह्यतः शालायाः प्राङ्गणे स्त्रीबलि स्त्र्यादिभ्यो बलिः स्त्रीबलिस्तं स्त्रीबलिं हरति ददाति ॥ १।१२।४ ॥

मन्त्रार्थः- स्त्रियै सन्तानसुखविघातिन्यै नमः । नमस्कारोऽस्तु अतः सन्तानसुखेच्छवोऽत्र बाह्यबल्यधिकारिण इति जयरामः । तथा पुंसे उक्तस्वरूपायैव । किम्भूताय ? वयसे अवयसे च वृद्धाय बालाय च शुक्लाय बहिः कृष्णदन्ताय असितान्तरङ्गावयवाय अतिमलिनमनसे इत्यर्थः । अत एव पापीनां पतये श्रेष्ठाय दीर्घश्छान्दसः । अत्र बलित्रये पुमानेव विशिष्यते । ये च मे मम प्रजां सन्तानमुपलाभयन्ति मोहयन्ति ग्रामे वसन्तः उत अपि वा समुच्चये अरण्ये वा वने वाऽपि तेभ्यो नमः नमस्कारोऽस्तु । एभ्यो बलि पूजा हरामि समर्पयामि मम नमस्कारवलिभ्यां यूयं सन्तुष्टा भवत ततो भवतां प्रसादान्मम स्वस्ति कल्याणमस्तु । भवन्तश्च मे मह्यं प्रजां पुत्रादिसुखजातं ददतु प्रयच्छन्तु ॥

अनुवाद – 'नमः स्त्रिय' इत्यादि मंत्र को पढ़कर घर से बाहर दुष्ट स्त्रियों के लिए बलियाँ रखी जायें।

मन्त्रार्थ-सन्तान सुख से वञ्चित करने वाली स्त्रियों को मेरा नमस्कार है। गौरवर्ण, कृष्णदन्त, अत्यन्त मलिन, वे छोटे हों या बड़े, पापियों के मुखियों को भी मेरा नमस्कार है । मैं सर्वप्रथम उन्हें प्रणाम कर बलि देता हूँ, जो हमारी सन्तान को नष्ट करते हैं, वे चाहे ग्रामवासी हों या जंगल में रहते हों। वे मेरा कर मुझें सन्तति-सुख दें।

शेषमद्भिः प्रक्षाल्य । ततो ब्राह्मणभोजनम् ॥ १।१२।५

हरिहरभाष्यम् - शेषमद्भिः प्रक्षाल्य' । स्थालीस्थितमवशिष्ट प्रक्षान्य मज्जयित्वा । अत्रापः प्रणीताः तासां सर्वकर्मार्थत्वेन प्रणीतत्वात् । ततो ब्राह्मणभोजनम्' । व्याख्यातः सूत्रार्थः ॥ १।१२।५ ॥

अनुवाद -चरुपात्र में बची खीर को पानी से साफ कर दे। इसके बाद ब्राह्मण को भोजन कराना चाहिए ।

टिप्पणी-वैश्वदेव पाक का अर्थ है-सभी देवताओं के लिए बनी खीर । शास्त्रीय विधि-निषेधात्मक वाक्यों से यह ज्ञात होता है, कि पक्षादि कर्म करन इच्छुक दम्पति को प्रतिपदा से पहली रात में उड़द, मांस, क्षारीय पदार्थ एवं नमक नहीं खाना चाहिए। उन दोनों को अग्नि के पास ही अलग-अलग सोना चाहि बलि-प्रदान कर्म भी स्रुवा से ही सम्पादित होना चाहिए।

॥ प्रथमकाण्ड में द्वादश कण्डिका समाप्त ।।

त्रयोदशी कण्डिका

सा यदि गर्भं न दधीत सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्टवा दक्षिणस्यां नासिकायामासिञ्चति-

इयमोषधी त्रायमाणा सहमाना सरस्वती।

अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति ॥ १।१३।१॥

हरिहरभाष्यम् -'सा यदि गर्भं न दधीत' । सा भार्या यदि चेत् गर्भं न धारयेत् 'सिं ह्या मासिञ्चति' । गर्भधारणोपायमाह-सिंह्याः कण्टकारिकायाः, कथम्भूतायाः श्वेतपुष्प्याः श्वेतानि पुष्पाणि यस्याः सा श्वेतपुष्पी तस्या उपोष्य उपवासं कृत्वा पुष्येण चन्द्रमसा युक्तेन पुष्यनक्षत्रेण मूलं शिफामुत्थाप्य उद्धृत्य रजोदर्शनाच्चतुर्थेऽहनि स्नातायां भार्यायां रात्रौ उदपेषं यथा भवति तथा तन्मूलम् उदकेन पिष्ट्वा द्रवीभावमापाद्येत्यर्थः, दक्षिणस्यां नासिकायां दक्षिणे नासारन्ध्र सिञ्चति प्रक्षिपति भर्ता 'इयमोष..... भम्' इत्यनेन मन्त्रेण ।। १।१३।१॥

मन्त्रार्थः– ओषति दहति दोषान् धत्ते गुणानित्योषधी, इयं त्रायमाणा यथोक्तप्रयुक्ता रक्षन्ती सहमाना दोषवेगान् सोढ्वाऽपि नाशयन्तीत्यर्थः । सरति कारणतयाऽनुगच्छति इति सरः समुद्रस्तद्वती तत्सम्बद्धा अतः अस्या बृहत्याः महत्याः वृहयति पुत्रादिदानेन वा तस्याः प्रभावाच्चाहं पुत्रः पितुरयमित्यहं नाम जग्रभम् गृह्णीयां लभेयं प्राप्नुयां पुत्रस्य पितेति लोकाः कथयन्ति । सुगमत्वादत्र पदार्थक्रमो नोच्यते ।

अनुवाद-यदि पत्नी गर्भ धारण न कर सके तो श्वेतपुष्पों वाली कण्टकारिका का पुष्य नक्षत्र के साथ चन्द्रयोग होने पर उपवास करके जड़ के साथ उखाड़ लें। उता पत्नी के रजोदर्शन के चौथे दिन जब वह स्नान करके शुद्ध हो जाय तो रात में के साथ पीसकर उसके रस की दो-चार बूदें उसकी नाक के दाहिने छिद्र में 'इयमोषधी...' इत्यादि मंत्र पढते हए डाल दे ।

मंत्रार्थ -(ऋषि प्रजापति, छन्द बृहती, देवता औषधि ।) गर्भधारण में बाधक दोषों को हटाक को हटाकर गुणों का आधान करने वाली यह काष्ठोषधि कष्ट सहन करके भी सेवन करने वालों की रक्षा करती है और दोष के देगों को नष्ट कर देती है। अनेक प्रकार के फल देनेवाली इस वनस्पति की कृपा से जैसे मैं अपने पिता का नाम लेता हूँ, वैसे ही मेरी सन्तान भी मेरा नाम उज्ज्वल करे।

टिप्पणी -गर्ग-पद्धति में गदाधर ने इस प्रसंग का उल्लेख करते हुए कहा है, कि पत्नी की नाक में यह औषधि दालने के बाद ही पति भोजन करे ।

॥ प्रथमकाण्ड में प्रयोदश कण्डिका समाप्त ।।

चतुर्दशी कण्डिका

पुंसवनम्

अथ पुंसवनम् ॥ १॥१४॥१॥

हरिहरभाष्यम्-अथ पुंसवनम् । अथावरारप्राप्तं पुंसवनाख्यं गर्भसंस्कारक कर्म व्याख्यास्यते ॥ १।१४।१॥

अनुवाद-इसके बाद 'पुंसवन' संस्कार का निरूपण किया जा रहा है।

पुरा स्पन्दत इति मासे द्वितीये तृतीये वा ॥ १।१४॥२॥

यदहः पुं सा नक्षत्रण चन्द्रमा युज्येत तदहरुपवास्याप्लाव्याऽहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गांश्च निशायामुदपेषं पिण्ड्वा पूर्ववदासेचनाहिरण्यगर्भोऽद्धयः सम्भृत इत्येताभ्याम् ॥१॥१४॥३॥

हरिहरभाष्यम् –'पुरास्पन्दत इति'। पुरा अग्ने स्पन्दते चलिष्यति । 'यावत्पुरानिपातयोर्लडि'ति पुरायोगे भविष्यार्थे वर्तमानप्रयोगः । इति हेतोः । 'मासे द्विती''''युज्येत' गर्भधारणकालाद् । द्वितीये तृतीये वा मासे यस्मिन्नहनि पुंसा पुरुषनाम्ना पुष्यादिनक्षत्रेण उडुना शशी युक्तो भवेत् । 'तदह ....धाप्य' । तस्मिन्नहनि उपवास्य भोजनमकारयित्वा भार्यामाप्लाव्य स्नापयित्वा अहते नवे सदृशे सकृत्प्रक्षालिते वाससी अन्तरीयोत्तरीये द्वे परिधाप्य परिधानं कारयित्वा। 'न्यग्रोधा...सेचनम्। न्यग्रोधस्यवटस्य अवरोहान् अवाचीनम् अधः रोहन्ति जायन्ते इत्यवरोहास्तान् शुङ्गान् वान् मुकुलाकारान् सान्निध्याच्चकारोऽवरोहसमुच्चयार्थः ततश्चोभयं रात्री

भधारणार्थोक्तवत् पिष्ट्वा पूर्ववदेव आसेचनं भर्तुः दक्षिणनासारन्ध्रे । मन्त्रविशेषमाह-'हिरण्य 'शुच्चके' ॥ १।१४।२-३ ॥

अनुवाद-कम्पन से पहले अर्थात् जब पेट में बच्चा कुछ-कुछ हिलने-डुलने लगे, गर्भ-धारण के दूसरे या तीसरे महीने में पुष्य-प्रभृति किसी पुरुष नक्षत्र का योग जब चन्द्रमा के साथ हो, तब स्त्री को स्नान तथा उपवास कराकर स्वच्छ कपड़ा पहना कर रात में बरगद की डाल में लटकती जटाओं को और उसके कोमल पत्ता का पानी में पीसकर 'हिरण्यगर्भः' तथा 'अद्भ्यः सम्भतः' इत्यादि मंत्रों को पढ़कर पह" कही गई विधि से पत्नी की नाक के दाहिनी पोर में उस जल की दो-चार खूप देनी चाहिए।

(१) हिरण्यगर्भः समवर्ततात्रे भूतस्य जातः पतिरेक आसीत् ।।
स दाधार प्रथिवी द्यामतेमां कस्मै देवाय हविषा विधेम ॥

मन्त्रार्थ- (ऋषि हिरण्यगर्भ, छन्द त्रिष्टूप, देवता प्रजापति ।) सृष्टि से पूर्व सर्वप्रथम स्वर्णिम ब्रह्माण्ड से उत्पन्न प्रजापति ही अकेले प्राणीमात्र का पालक सिद्ध हुआ। उसी ने धरती, अंतरिक्ष और आकाश को धारण कर रखा है । हम उस सुखस्वरूप, दीपन, द्योतनशील और अन्य दैवी गुणों से युक्त पुरुष को हवियां अर्पित करते हैं।

(२) अद्भ्यः सम्भतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताने।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्यस्य देवत्वमाजानमग्रे ॥

मन्त्रार्थ-(ऋषि प्रजापति, छन्द त्रिष्टुप, देवता आदित्य ।) (पूर्व कल्प में सूर्य ने पुरुषमेध का अनुष्ठान किया था। उसके फलस्वरूप ही उसे प्रकृत घटना का सांसारिक दृष्टि से उल्लेख किया गया है ।) पहले जल और पृथ्वी प्रभृति पंचमहाभूतों से परिपुष्ट और विश्वकर्मा काल की प्रीतिवश उत्पन्न रसरूप को धारण कर आदित्य प्रतिदिन पूर्व दिशा में उदित होता है। मरणधर्मा मनुष्य ने इसी तरह पुरुषमेध का अनुष्ठान कर देवताआ के बीच सूर्य के रूप में

प्रमुख स्थान प्राप्त किया था ।

कुशकण्टकं सोमां शुञ्चैके ॥१॥१४॥४॥

हरिहरभाष्यम् -एके आचार्याः न्यग्रोधावरोहशुङ्गेषु पिष्यमाणेषु कुशस्य कण्टकं मूलं सोमांशुं सोमलताखण्डं च प्रक्षिपन्ति तत्पक्षे द्रव्यचतुष्टयपेषणम् ।।१।१४॥४॥

अनुवाद-कूछ आचार्यों के मत से बरगद की जटाओं और उसके कोमल पत्तों के साथ कुश की जड़ और सोमलता भी मिला देनी चाहिए।

कर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते- सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः ॥ १।१४॥५॥

हरिहरभाष्यम् - 'कूर्मपि..... क्रमेभ्यः' । अत्र काम्यमाह स भर्ता यदि कामयेत अयं गर्भः वीर्यवान् शक्तिमान् स्यादितीच्छेत् तदा अस्या भार्यायाः उपस्थे उत्सङ्गे कूर्मपित्तं जलपूर्णशरावं कृत्वा निधाय विकृत्या विकृतिच्छन्दस्कया सुपर्णोऽसीत्य नया ऋचा स्वः पतेत्यन्तया एनं गर्भमभिमन्त्रयते हस्तेन गर्भाशयं स्पृष्ट्वा मन्त्रं जपतीत्यर्थः, विष्णुक्रमेभ्यो विष्णुक्रममन्त्रेभ्यः प्राक् पूर्वं यावद्विकृतेः परिमाणमिति सूत्रार्थः । १।१४।५।

अनुवाद- गर्भस्थ शिशु का पिता यदि चाहे कि सन्तान शक्तिशाली हो तो जल सहित मिट्टी के पात्र को पत्नी की गोद में रखकर हाथ से गर्भाशय का स्पर्श करते हुए विकृति छन्द में निबद्ध-'सुर्पणोऽसि' इस मंत्र को प्रारम्भ कर विष्णु मंत्रों से पहले तक पढ़े।

टिप्पणी -ओल्डेन वर्ग ने कूर्मपित्त का अर्थ कछुए का पित्त कहा है, जब कि भारतीय आचार्यों ने कूर्मपित्त का अर्थ जल मिला हुआ शराव कहा है । ओल्डेन वर्ग का अर्थ परम्परा-विरुद्ध होने के कारण ग्राह्य नहीं है ।

॥ प्रथमकाण्ड में चतुर्दश कण्डिका समाप्त ।।

पञ्चदशी कण्डिका

सीमन्तोन्नयनम्

अथ सीमन्तोन्नयनम् ॥ १।१५॥१॥

हरिहरभाष्यम् - अथ सीमन्तोन्नयनम्'। अथ पुंसवनानन्तरं क्रमप्राप्तं सीमन्तोन्नयनं गर्भसंस्कारकं कर्म व्याख्यास्यते ।। १।१५।१॥

अनुवाद-अब 'सीमन्तोन्नयन' संस्कार की विधि बतलायी जा रही है।

पुंसवनवत् ॥ ११५॥२॥

हरिहरभाष्यम्-तच्च पुह-सवनवत् पुनक्षत्रे भवति ॥ १।१५।२ ॥

अनुवाद - पुंसवन की तरह ही सीमन्तोन्नयन भी होता है।

टिप्पणी-यह संस्कार भी जब चन्द्रमा के साथ पुष्य नक्षत्र का योग होगा, तब स्त्री स्नान कर नये वस्त्र पहन कर उपवास करेगी । फिर यह संस्कार प्रारम्भ होगा।

प्रथमगर्भे मासे षष्ठेऽष्टमे वा ॥ १।१५।३ ॥

हरिहरभाष्यम् - 'प्रथम...ऽष्टमे वा' । आद्यगर्भे गर्भाधानप्रभृति षष्ठेऽष्टमे मास नियमेन कुर्यात् । गर्भान्तरेष्वनियम इति कर्कोपाध्यायः । अन्ये तु प्रथमगर्भे। तथा चाश्वलायनगृह्यपरिशिष्टे प्रथमे गर्भे सीमन्तोन्नयनसंस्कारो गर्भमात्रसस्कार इति । सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः । यं यं

गर्भ प्रसूयन्ते स सर्वःसंस्कृतो भवेदिति हारीतो देवलश्च सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता। उपवासाप्लावनाहतवासोयुगपरिधापनानि वतिना गृह्यन्ते ॥ १।१५।३ ॥

अनुवाद- गर्भाधान के छठे या आठवें महीने में सीमन्तोन्नयन संस्कार होगा।

तिलमुद्गमिश्रं स्थालीपाकं- श्रपयित्वा प्रजापतेर्तुबा पश्चादग्नेर्भद्रपीठ उपविष्टायां युग्मेन सटालुनप्सेनौदुम्बरेण त्रिभिश्च दर्भपिजुलरूप्येण शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्द्धं विनयति भूर्भूवः स्वरिति ॥ १।१५॥४॥

हरिहरभाष्यम् -'तिलमु.....पतेर्तुबा' । तत्र विशेषमाह-तिल मुंद्गमिश्रस्तिल मुद्गमिश्रस्तं स्थालीपाकमोदनं चरुं श्रपयित्वा आज्यभागान्ते प्रजापतये स्वाहेत्येकामाहुति हुत्वा स्विष्टकृदादि प्राशनान्तं विदध्यात् । 'पश्चाद ...'ष्टायाम्' । अग्नेः पश्चिमतः भर्तुर्दक्षिणतः मृद्वासने आसीनायां गर्भिण्यां सत्यां— 'युग्मेन'...स्वरिति । ततो भर्ता औदुम्बरेण उदुम्बरवृक्षोद्भवेन यूग्मेन द्वयादियुग्मफलवता सटालुग्रप्सेन अपक्वफलैकस्तवकनिवद्धेन त्रिभिश्च दर्भपिञ्जुलैस्त्रिभिर्दर्भपवित्रैश्च त्र्येण्या त्रिषु स्थानेषु श्वेता त्र्येणी तया त्र्येण्या शलल्या शल्यकास्यपक्षकण्टकेन वीरतरशङ्कुना शरेपीकया आश्वत्थेन वा शङ्कुना पूर्ण चात्रेण च सूत्रेण पूर्ण चात्रं सूत्रकर्तनसाधनं तर्कुरिति यावत् । तेन लोहकीलकेन च चकारः सर्वसमुच्चयार्थः । अतश्चोदुम्बरयुग्मादिभिः सर्वैः पुञ्जीकृतैः सीमन्तं स्त्रिया ऊर्ध्वं विनयति पृथक्करोति ललाटान्तरमारभ्य केशान् द्विधा करोति भूर्भुवः स्वविनयामि इत्येतावता मन्त्रेण सकृदेव ॥ १।१५।४ ।। .

अनुवाद-तिल ओर मूंग मिला हुआ चावल पकाकर आज्यभागान्त कर्म समाप्त कर, प्रजापति के लिए आहुति देकर, स्विष्टकृत् अग्नि के लिए आहुति दे और फिर, संस्रव प्राशन कर, वेदी के पार्श्ववर्ती अग्नि के पश्चिम तथा पति

की दाहिनी ओर कोमल आसन पर पत्नी के बैठ जाने पर, गूलर के दो कच्चे फलों वाले एक डंठल, तीन बालीदार कुशा, तीन जगह सफेद साही के कांटे, पीपल की एक कील और धागे के साथ कैंची अर्थात् इन पांचों वस्तुओं को एक साथ मिलाकर एक बार में ही पति स्त्री के सिर के बालों को 'भूर्भवः स्वः' का उच्चारण करते हुए ऊपर की ओर मांग संभाल दे।

प्रतिमहाव्याहृतिर्वा ॥१॥१५॥५॥

हरिहरभाष्यम् -पक्षान्तरमाह-वा इति । प्रतिमहाव्याहृतिभिः विनयति । ततश्च भूर्विनयामि भुवर्विनयामि स्वर्विनयामि इत्येवं त्रिविनयनं भवति, अत्र व्याहृतिमन्त्रपदानामाख्यातपदं विना वाक्यस्यासम्पूर्णत्वात् आख्यातपदाध्याहारः कर्तव्यः । तत्र विधियुक्तस्य मन्त्रभावः स्यादिति न्यायात् विनयतीति विधिपदं विपरिणम्य विनयामीत्यध्याहियते ॥ १।१५।५ ॥

अनुवाद - कुछ आचार्यों के अनुसार यह क्रिया प्रत्येक महाव्याहृति का अलगअलग उच्चारण करते हुए तीन बार होगी।

टिप्पणी-मंत्रोच्चार का तीन क्रम इस प्रकार होगा-(१) ॐ भूर्विनयामि । । १) ॐ भुवर्विनयामि । (३) ॐ स्वर्विनयामि ।

त्रिवृतमाबध्नाति - अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेति ॥ १।१५॥६॥

हरिहरभाष्यम् -'त्रिवृतमाबध्नाति' । त्रिवृतं वेणी प्रति आबध्नाति पुञ्जीकृतमौदुम्बरादिपञ्चकं वेण्यां नियुनक्तीत्यर्थः । 'अयम्' 'भवेति' अनेन मन्त्रेण । १।१५।६।

मन्त्रार्थः-हे सीमन्तिनि ! यतोऽयमूर्जावान् वृक्ष इति शेषः, अस्य चोर्जावतो वृक्षस्यो. र्जीव सफलशाखेव फलिनी भव ॥ १।१५।६ ।।

अनुवाद-गूलर प्रभृति पाँचो वस्तुओं को जूड़े में तीन गाँठ देकर

'अयमूर्जावतः। इत्यादि मंत्र पढ़ते हुए बाँध दे।

मन्त्रार्थ - ऋषि प्रजापति, छन्द यजुष, देवता वधू । हे सुकेशी ! यह वृक्ष शक्तिशाली है, इसकी डालें फलों से लदी हैं; इसी की तरह तुम भी फलवती बनो।

अथाह- वीणागाथिनौ राजानं सङ्गायेतां यो वाऽप्यन्यो वीरतर इति ॥ १।१५॥७॥

हरिहरभाष्यम् - 'अथाह..... इति' । अथौदुम्बरादिपञ्चकस्य वेणीवन्धनानन्तरमाह ब्रवीति, किम् ? हे वीणागाथिनौ ! राजानं भूपति सङ्गायेताम् राजवर्णनसम्बद्धं ध्रुवादिरूपकं सम्यग्गायेतां युवामथवा योऽन्योऽपि राजव्यतिरिक्तो वीरतरः प्रकृष्टो वीरः शूरस्तं सङ्गायेतामित्यनुषङ्गः इत्याह ब्रवीति ।। १।१५।७ ।।

अनुवाद -वेणीबन्धन के बाद पति वीणा लेकर गाथा गान करने वाले दो पुरुषा से किसी राजा या वीर पुरुष के विषय में गाथा गाने को कहे ।

नियुक्तामप्येके गाथामुपोदाहरन्ति - सोम एव नो राजेमा मानुषीः प्रजाः। अविमुक्तचक्र आसीरंस्तोरे तुभ्यमसाविति । यां नदीमुपावसिता भवति तस्या नाम गृह्णाति ॥ १।१५॥८॥

हरिहरभाष्यम् -'नियुक्ता .. "हरन्ति'। एके आचार्याः नियुक्तां गाने विहितां गाथां मन्त्रमुपोदाहरन्ति पठन्ति अपिः समुच्चयार्थः, तत्पक्षे राजवीरतरयोरत्यनगानं गाथागानं च समुच्चितं भवति । पक्षान्तरे राजवीरतरयोरन्यतरगान गाथागानं बा तां गाथामाह-'सोम एव तुभ्यम्' इत्यन्ताम् । पद्धतिकारपक्षे राजवीरतरगाथानां एकतमस्यैव गानं तत्पक्षे नियुक्तामपीत्यपिशब्दो विवक्षितार्थः स्यात् । 'असावि..... गाति' । ततो गर्भिणी यां नदीमुप समीपे आवसिता स्थिता भवति तस्या नद्या असाविति गङ्गा यमुना इत्येवं प्रथमान्तं नाम गृह्णाति ।। १।१५।८ ।।

मन्त्रार्थः-सोमश्चन्द्रः नोऽस्माकं प्रजानां राजा प्रभुः अत इमाः प्रजाः मानुषीर्मानुष्यः सौम्याः हे गङ्गादिनदि तुभ्यं तव सोमरूपायास्तीरे आसीरन् ब्रामाश्रित्य स्थिताः । किम्भूते तीरे अविमुक्तचक्रे अनुल्लङ्घितशास्त्रे अतो भवदभ्यां पातव्या इत्यर्थः ।

अनुवाद-कुछ आचार्यों के अनुसार वेदोक्त 'सोम...' प्रभृति गाथा ही गानी चाहिए । गाथा के अन्त में गर्भिणी स्त्री को जिस नदी के समीप हो, उसका प्रथमान्त नाम ले लेना चाहिए !

मन्त्रार्थ- (ऋषि प्रजापति, छन्द यजुष्, देवता वधू ।) ओ नदियो ! चन्द्रमा हमारा स्वामी है और तुम स्वयं सोमरूपा हो, इसीलिए तुम्हारे अविमुक्त चक्र तट पर ये मानवी प्रजाएँ बसी हुई हैं, अतः तुम हमारी रक्षा करो।

ततो ब्राह्मणभोजनम् ॥ १।१५॥९॥

हरिहरभाष्यम् - 'ततो ब्राह्मणभोजनम्' इत्युक्तार्थमिति सूत्रव्याख्या ।१।१५।९।

अनुवाद-इसके बाद ब्राह्मणों को भोजन करायें।

टिप्पणी-गदाधर ने गर्भिणी-धर्म का कुछ उल्लेख इस प्रकार किया है

'अङ्गारभस्मास्थिकपालचुल्लीशूर्पादिकेषूपविशेन्न नारी ।
सोलूखलाये दृषदादिके वा यन्त्रे तुषाद्ये न तथोपविष्टा ।।
नो मार्जनीगोमयपिण्डकादौ मूत्रं पुरीषं शयनं च कुर्यात् ।
नो मुक्तकेशी विवशाऽथवा स्याद् भुङ्क्ते न सन्ध्यावसरे न शेते ॥
नामङ्गलं वाक्यमुदीरयेत् सा शून्यालयं वृक्षतलं न यायात् ।'

अर्थात् गर्भिणी औरत सूप, चूल्हा, खोपडी, हड्डी, राख या दहकते अंगारे पर न बैठे। झाडू और गोबर पर न तो सोये और न ही मलमूत्र त्याग करे । बाल खोलकर । न घूमे । सायंकाल या गोधूलि वेला में न तो कुछ खाए और न ही सोये। अमंगल सूचक कोई शब्द न बोले। किसी सूने घर में प्रवेश न करे

और न किसी पेड़ के नीचे बैठे।

'प्रयोग-पारिजात' में भी कुछ निषेध इस प्रकार है-गभिणी स्त्री को न ता हाथी घोडे की सवारी करना चाहिए और न ही पहाड पर चढना चाहिए। किता तरह का व्यायाम नहीं करना चाहिए और दौड़ना भी बिलकूल वजित है । याज्ञवल्क्य ने यहाँ तक कहा है कि गर्भिणी स्त्री को दोहद का अपमान भी नहीं करना चाहिए. ऐसा करने से गर्भस्थ शिशु का अंग-भंग या मृत्यु भी हो सकती है । जहाँ गर्भिणियों के लिए इतने निषेध हैं, वहाँ 'मदनरत्न' में कुछ विधान भी हैं । तदनुसार हल्दी सिन्दूर, काजल और अन्य मांगलिक आभूषण धारण करने चाहिए, पान खाना चाहिये और जितना पवित्र ढंग से वह रह सकती है, उस प्रकार उसे रहना चाहिए ॥

॥ प्रथमकाण्ड में पञ्चदश कण्डिका समाप्त ।।

षोडशी कण्डिका

जातकर्म

सोष्यन्तीमद्भिरभ्युक्षति-एजतु दशमास्य इति प्राग्यस्यैत इति ॥ १।१६।१॥

हरिहरभाष्यम् - 'सोष्यन्ती .....'यस्यैत इति' । सोष्यन्ती प्रसवशूलवतीं स्त्रियं भर्ता अद्भिर्जलेनाभ्युक्षति प्रसिञ्चति एजतु दशमास्य इत्येतया प्राग्यस्यैत इति प्राक्पठितया ऋचा व्यवसानया विराटजगत्या ॥ १।१६।१॥

अनुवाद-प्रसव-वेदनायुक्त स्त्री के ऊपर उसका पति 'एजतु...' इत्यादि मंत्र का उच्चारण करते हुए जल का सिंचन करे ।

मन्त्र - एजतु दशमास्यो गर्भो जरायुणा सह । यथायं वायुरेजति यथा समुद्र एजति । एवार्य दशमास्यो अस्त्रज्जरायुणा सह ।

मंत्रार्थ- (ऋषि प्रजापति, छन्द महापंक्ति, देवता गर्भ ।) दश महीने का पूरे अवयवों वाला गर्भवत् शिशु अपने गर्भाशय के साथ हिले-डुले; जैसे हवा चलती है और समुद्र हिलता है, उसी प्रकार यह दस मास का गर्भवत् शिशु माँ के पेट से बाहर निकल आए।

अथावरावपतनम्

अवैतु पश्निशेवलं शुने जराय्वत्तवे। नैव मां सेन पीवरीं न
कस्मिश्चनायतनमवजरायुपद्यतामिति ॥ १।१६॥२॥

हरिहरभाष्यम् - अथावरावपतनम् । अथाभ्युक्षणानन्तरमवरावपतनम् अवरमुल्ब जरायुवेष्टितं गर्भवेष्टनमवाचीनमधः पतत्यनेन जन्तेनेत्यवरावपतनो

मन्त्रः तं नासमीप उपविश्य भर्ता जपति, यथा- 'अवैतु पृश्निशेवलमित्यादि अवजरायुपद्यताम' इत्यन्तम् । अवरावपतनमन्त्रो भ; जाप्यः ॥१।१६।२।।

मन्त्रार्थः -हे सोष्यन्ति ! तव जरायु अव अधः एतु आयातु पतत्वित्यर्थः । किम्भूतं पृश्नि नानारूपं शेवलं पिच्छलं जलोपचितं शुने इति श्वानमुपकर्तुम् । यद्वा शुने इति षष्ठयर्थे चतुर्थी। शुनः अत्तवे , पीवरि ! पुत्रादिगर्भधारणेन सुपुष्टगात्रि ! तच्च जरायु मांसेन गर्भ आयतं सम्बद्धं विस्तृतं वा अधः नैव पद्यतां पततु न च कस्मॅिंशन निमित्ते सत्यपीति ।।

अनुवाद -गर्भस्थ शिशु को शीघ्र बाहर निकालने के लिए पिता की इत्यादि मंत्र पढ़े।

मन्त्रार्थ -(ऋषि प्रजापति, छन्द बृहती, देवता अग्नि ।) ओ प्रसवपीडिते तुम्हारा पानी से भींगा गर्भाशय कुत्ते को खाने के लिए नीचे आ जाय । हे मांसल देहवाली ! गर्भनाशक कारणों के बावजूद भी तुम्हारा गर्भ सुरक्षित रहे।

जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननाऽऽयुष्ये करोति ।१।१६॥३॥

हरिहरभाष्यम् - 'जातस्य.... करोति' । ततो जातस्य उत्पन्नस्य कुमारस्य पुत्रस्य अच्छिन्नायां नाड्यागखण्डिते नाले सति मेधाजननायुष्ये मेधाजननं च आयुष्यं च मेधाजननायुष्ये ते करोति पिता मेधाजननं तावदाह ॥ १।१६।३ ।।

अनुवाद-जन्म लेने के बाद तथा नाल कटने से पहले बालक के पिता शिशु के बुद्धि उत्पादन एवं आयुवर्द्धन हेतु जातकर्म करे ।

अनामिकया सुवर्णान्तहितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि । भुवस्त्वयि दधामि । स्वस्त्वयि दधामि । भूर्भुवःस्वः सर्व त्वयि दद्यामीति ।। १।१६॥४॥

हरिहरभाष्यम्- 'अनामि....दधामीति'। अनामिकयाऽङ्गुल्या सुवर्णेनाच्छादितया मधु च घृतं च मधुघृते द्वन्द्वसमाससामदेकीकृते घृतं वा केवलं कुमारं सकृत्याशयति कुमारस्य जिह्वायां निर्माष्टि भूस्त्वयीत्यादि सर्वं त्वयि दधामीत्यन्तेन मन्त्रवाक्य समुदायेन । ननु 'अर्यकत्वादेकं वाक्यम्' इति जैमिनिसूत्राद्, 'तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकाविता' इत्यमरसिंहोक्तेश्चकार्थमेकं वाक्यम् । एकस्य वाक्यस्य च तेषां वाक्यं निराकाङ्क्षं मिथः सम्बद्धमिति कात्यायनवचनेनैकमन्त्रत्वमिति प्रतिपादनात्कथं मन्त्रवाक्यसमुदायस्यकमन्त्रत्वम् ? अत्रोच्यते-सत्यं यदि इतिकारादिकं मन्त्राबमानज्ञायकं किञ्चिन्न स्यात्तदैतच्छक्यम् । अत्र पुनरितिकारो मन्त्रावसानज्ञापको जागर्ति तेन नायं दोषः । यथा स वै भूर्भुव इत्येतावतैव गार्हपत्यमादधाति तैः सर्वैः पञ्चभिराहवनीयमादधाति भूर्भुवःस्वरिति च श्रुतौ वाक्यसमुदायस्य इतिकारेण मन्त्रावसानं ज्ञायते । कातीयसूत्रेऽपि दारुभिर्ज्वलन्तमादधाति भूर्भुव इति आहवनीय मादधाति भूर्भुवःस्वरिति । अत्र यद्यपि एककस्याः व्याहृतेरर्मन्त्रत्वं युक्तं समस्तानां व्याहृतीनां च इतिकारेण द्वयोरपि व्याहृत्योर्मन्त्रत्वं व्यवस्थाप्यते । एवमन्यत्रापि बहुनां मन्त्रवाक्यानामितिकारादिविनियोजकेन मन्त्रैक्यं तत्र तत्रायमेव न्यायोऽनुसर्तव्यः ।। १।१६।४ ।।

अनुवाद–सोने से आच्छादित अनामिका अंगुली से विषम मात्रा में मध और घी मिले हए अथवा केवल घी से ही 'भुवस्त्वयि...' इत्यादि मंत्र का उच्चारण कर हुए एक बार या चार बार पिता बालक को प्राशन कराए (चटाए)।

मन्त्रार्थ-भू आदि व्याहृतित्रय से तीनों वेदों को मैं तुममें स्थापित करता हूँ। अथवा सम्पूर्ण विशेषणों से युक्त अथर्ववेद को तुममें स्थापित करता हूँ।

अथास्याऽऽयुष्यं करोति ॥ १।१६॥५॥

नाभ्यां दक्षिणे वा कर्णे जपति-

अग्निरायुष्मान्त्स वनस्पतीभिरायुष्मास्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि।

सोम आयुष्मान्त्स ओषधीभिरायुष्माँस्तेन ब्राऽऽयुषाऽऽयुष्मन्तं करोमि।
ब्रह्मायुष्मत्तब्राह्मणैरायुष्मत्तेन ब्राऽऽयुषाऽऽयुष्मन्तं करोमि।
देवा आयुष्मन्तस्तेऽमृतेनाऽऽयुष्मन्तस्तेन ब्राऽऽयुषाऽऽयुःमन्तं करोमि।
ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन ब्राऽऽयुषाऽऽयुष्मन्त करोमि।
पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन ब्राऽऽयुषाऽऽयुष्मन्त करोमि।
यज्ञ आयुष्मान्त्स दक्षिणाभिरायुष्माँस्तेन ब्राऽऽयुषाऽऽयुष्मा करोमि ।
समुद्र आयुष्मान्त्स स्रवन्तीभिरायुष्माँस्तेन ब्राऽऽयुषाऽऽयु" करोमीति त्रिस्त्रिः
॥ १।१६।६ ॥

हरिहरभाष्यम्- 'अथास्या.....जपति'। अथ मेधाजननानन्तरम् कुमारस्यायुष्यमायुषे हितं जीवनवर्द्धनं कर्म करोति । तद्यथा नाभिदेशे दक्षिणे वा श्रवणे नाभ्यां दक्षिणे वा कर्णे इति समीपाधिकरणा सप्तमी, गङ्गायां घोष । नाभिसमीपे दक्षिणकर्णसमीपे वा जपति 'अग्निरायूष्मान' इत्यादिकान् - त्रीन् वारान् उपांशु पठति । अग्निसोमब्रह्मदेवऋषिपितृयज्ञसमुद्र इत्यन्तान् ।

अनुवाद - जातकर्म के बाद उत्पन्न बालक का जीवन-वर्द्धन कर्म पिता करे । जातक की नाभि में अथवा दाहिने कान में – 'अग्निरायुष्मान् ...' इत्यादि आठों मंत्रों का पिता तीन-तीन बार उपांशु जप करे।

मन्त्रार्थ- अग्नि वनस्पतियों से, सोम औषधियों से, ब्रह्म ब्राह्मणों से, देवता अमृत से, ऋषि व्रतों से, पितृगण स्वधा से, यज्ञ दक्षिणा से, समुद्र नदियों से जैसे आयुष्मान् हैं, उसी प्रकार उन पदार्थों से मैं तुम्हें आयुष्मान् करता हूँ ।

त्र्यायुषमिति च ॥१॥१६॥

हरिहरभाष्यम् - 'त्र्यायुषमिति च' । ततः त्र्यायुषं जमदग्नेरित्यादि तन्नो अस्तु व्यायुषमित्यन्तं च मन्त्रं तथैव त्रिर्जपति । इदं चायुष्यकरणं कालातिक्रमेऽपि क्रियते । मेधाजननं तु मुख्यकालातिक्रमान्निवर्तते तस्मात्कुमारं जातं घृतं वै वाऽग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्तीति जातमात्रस्य कुमारस्य श्रुत्या

मेधाजननोपदेशात् ।। १।१६।७ ॥

अनुवाद- तथा 'व्यायुषम् ..' इत्यादि मन्त्र का भी तीन बार पाठ करे।

मन्त्र - त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु व्यायुषं तन्नो अस्तु व्यायुषम् ॥

मन्त्रार्थ - (ऋषि नारायण, छन्द उष्णिक, देवता आशीः ।) यमदग्नि और कश्यप ५ ऋषियों तथा देवताओं की तीनों अवस्थाओं का सारभूत अंश हमें प्राप्त हो ।

स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणनमभिमृशेत् ॥ १॥ १६॥८॥ दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि ॥ १।१६।९॥

हरिहरभाष्यम् - 'स यदि.....भिमृशेत्' । स पिता यदीच्छेदयं कुमारः सर्व सम्पूर्णमायुजीवितम् इयात् प्राप्नुयात् इत्येवं तदा वात्सप्रेण वात्सप्रिणाभालन्दनेनदिवस्परीत्यादिद्वादशर्चेन एनं कुमारम् अभि समन्ततः सर्व शरीरमालभेत । तत्र विशेषमाह- 'दिवस्प.....शिनष्टि'। दिवस्परीत्यादिको द्वादशर्चोऽनुवाको वात्सप्रः एतस्य उत्तमामन्त्यां द्वादशीम् अस्ताव्यग्निरित्येतामृचं परिशिनष्टि व्युदस्यति तां परित्यज्य एकादशभिऋ भिरभिमृदित्यर्थः ॥ १।१६।८-९॥

अनुवाद - पिता यदि इच्छा करे कि पुत्र सम्पूर्ण आयु प्राप्त करे तो 'दिवस्परि...' से 'उशिजो विवव्रुः...' तक वत्सप्रीभलिन्दन ऋषि के द्वारा दृष्ट ११ ऋचाओं वाले वात्सप्र अनुवाक को पढ़कर उसका स्पर्श करे। किन्तु अनुवाक की अन्तिम ऋचा 'अस्ताव्यग्नि...' छोड़ दी जाये।

टिप्पणी – वात्सप्र अनुवाक के निम्नलिखित ११ मंत्र हैं

दिवस्परि प्रथमं जज्ञेऽअग्निरस्मद्वितीयं परिजातवेदाः ।
तृतीयमप्सु नृमणाऽअजस्त्रमिन्धान एनजरते स्वाधीः ॥१॥

विद्या ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम बिभुता पुरुत्रा।
विद्मा ते नाम परमं गुहायद्विद्मा तमुत्सं यतआजगन्थ ॥ २॥
समुद्रे ब्वा नमणा अप्स्वन्तर्नृ चक्षा ईधे दिवोऽअग्नऽऊधन् ।
तृतीये ब्वा रजसि तस्थिवासमपामुपस्थे महिषाऽअवर्धन् ।। ३॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समजन् ।
सद्यो जज्ञानो वि होमिद्धोऽअख्यदारोदसी भानुना भात्यन्तः ॥ ४ ॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसोऽअप्सु राजा विभात्यग्रऽउषसाभिधानः ॥५॥
विश्वस्य केतुर्भुवनस्य गर्भऽआ रोदसीऽअपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥६॥
उशिक पावकोऽअरतिः सुमेधामध्वन्निरमतोनिधायि ।
इति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥
दृशानो रुपमा व्यद्यौदुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽअभवद् वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥८॥
यस्ते अद्य कृणववभद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्योऽअच्छाभि सुम्नं देवभक्तं यविष्ठ ।।९॥
आतंभज सौश्रवसेष्वग्नऽउपथऽउक्थाभज शस्यमाने ।
प्रियः सूर्ये प्रियोऽअग्ना भवात्युज्जातेन मिनवद्युज्जनिब्वः ॥ १० ॥
ब्वामग्ने यजमानाऽअनु धून्विश्धा वसु दधिरे वार्याणि ।
ब्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विववः ॥११॥
प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति ॥१॥१६॥१०॥

हरिहरभाष्यम् - 'प्रतिदिशं....मानेषु' इत्यन्तं सूत्रम् । कुमारस्य प्रतिदिशं दिशं प्रति चतसृषु दिक्षु प्राच्यादिषु मध्ये च यथाक्रमं पञ्च ब्राह्मणानवस्थाप्य सन्निवेश्य कुमाराभिमुखांस्तान्प्रति ब्रूयात् । किम् ? इममनुप्राणितेति ॥ १।१६।१०।।

अनुवाद -प्रत्येक दिशा में एक-एक कर कुल पांच ब्राह्मणों को बिठाकर पिता उनसे आग्रह करे-आप इस बालक को प्राणशक्ति से युक्त करें।

पूर्वो ब्रूयात प्राणेति ॥१॥१६॥११॥
व्यानेति दक्षिणः ॥ १।१६।१२॥
अपानेत्यपरः ॥ १।१६।१३ ॥
उदानेत्युत्तरः॥१॥१६॥१४॥
समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात् ॥ १।१६।१५॥
स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु ॥ १।१६।१६ ॥

हरिहरभाष्यम् - इमं कुमारमनुप्राणितानुलक्षीकृत्य प्राणेत्यादि ब्रूत इति प्रैषः । ततः प्रेषिता ब्राह्मणाः पूर्वादिक्रमेण प्राणेति कुमारं लक्षीकृत्य पूर्वो ब्रूयात् व्यानेति , दक्षिणो ब्राह्मण: अपानेति, पश्चिमः उदानेत्युत्तरः समानेति, पञ्चम उपरिष्टामवमवक्षमाणः । अविद्यमानेष असत्सु ब्राह्मणेषु स्वयं वा स्वयमेव अनुप्राणनं कुर्यात् । कथम् ? अनुपरिक्रामं परिक्रम्य परिक्रम्य पूर्वादिकां दिशं प्राणेत्यादि । अनुपरिक्राममिति णमुलन्तम् । अस्मिन्पक्षे प्रषाभावः ॥ १।१६।११-१६ ॥

मन्त्रार्थः-इमं कमारमनुलक्षीकृत्य भो ब्राह्मणाः ! प्राणित यूयं सर्वे प्राणादिपञ्चवायुयुक्तं कृत्वा दीर्घायुष्टवेनायुष्मन्तं-कुरुत।कोष्ठस्थितो-वायुमुख-निःसरन्प्राण: पूनस्तेनैव मार्गेणान्तःप्रविशन्नपानः । प्राणो रेचकः । अपानः पूरकः। तयोर्वा अधः सन्धिः सन्धानं व्यानः कुम्भकरूपः । उत्क्रमणादिर्ध्वगतिरुदानः। देहस्थितस्याशितपीतस्यान्नरसस्य सर्वाङ्गेषु समनयनात्समानः ।

अनुवाद- पूर्व में बैठा हुआ ब्राह्मण 'प्राण' कहे, दक्षिण में बैठा हुआ 'व्यान' कहे, पश्चिम में बैठा हुआ ब्राह्मण 'अपान' कहे, उत्तर में से 'उदान' कहे तथा बीच में बैठा हुआ ब्राह्मण 'समान' कहे। यदि इतने साथ न मिले तो शिशु के पिता स्वयं पाँचों दिशाओं में क्रमशः जाकर पर सम्पादित करें।

स यस्मिन देशे जातो भवति तमभिमन्त्रयते - वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद् विद्यात् पश्येम शरदः शतं जीवेम शरदः शतः शृणुयाम शरदः शतमिति ॥ १।१६।१७॥

हरिहरभाष्यम् - 'स यस्मि' 'मन्त्रयते' । स कुमारः यस्मिन्देशे भूभागे उत्पन्नः पतति तं देशमभिमन्त्रयते हस्तेन स्पृशति वेद ते भूमि इत्यादि शरदःशतमित्यन्तेन मन्त्रेण ॥ १।१६।१७ ॥

मन्त्रार्थः- हे भूमे ! कुमारजन्मप्रदेश ! ते तव हृदयमन्तः करणं भूमिर्वेद यत्र विद्यते गुप्तम् । विसर्गाभावश्छान्दसः । किम्भूतं दिवि द्युलोके वर्तमाने चन्द्रमसि श्रितं कृष्णीभावेन देवयज्ञरूपस्थानमसुरजयार्थं गोपितं तत्प्रदेशोपल क्षितं, तदेतच्चन्द्रमास कृष्णमिति श्रुतेः । तत्कर्मभूतमहं वेद जानामि । तत्कर्तृभूतम् एवं पुनरुपका " विद्याज्जानातु । अतस्वद्दत्तपुत्रेण सह वयं पश्येमेत्याधुक्तार्थम् ॥

अनुवाद - शिशु के जन्म स्थान का स्पर्श कर पिता 'वेद ते...' इत्यादि मंत्र पढे।

मन्त्रार्थ - (ऋषि प्रजापति, छन्द अनुष्टुप, देवता भूमि ।) हे वसुन्धरे ! यह शिशु तुम्हारे हृदय से परिचित है, आकाश और चन्द्रमा में आश्रित चित्त का ज्ञान मुझे है, उसी तरह यह शिशु मुझे भी जाने । मैं सौ शरद तक देखूं, सौ शरद जीऊं , सौ शरद तक सुनू ।

अथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्रतं भव । आ नामासि स जीव शरदः शतमिति ॥ १।१६।१८॥

हरिहरभाष्यम् - 'अथैन .... शतमिति' । अथ जन्मदेशाभिमन्त्राणानन्तरमेनं कुमारं पिता अभिमृशति समन्ततः सर्वशरीर स्पृशति । अश्मा भवेत्यादिना सजीव शरदः शतमित्यन्तेन मन्त्रेण ।वात्सप्राभिमर्शनादि एतदाभ क्रमेऽपि क्रियते संस्कारकर्मत्वात् ।। १।१६।१८।।

अनुवाद - इसके बाद पिता उस बालक को छूकर 'अस्मा...' इत्यादि मंत्र पढ़े।

मन्त्रार्थ - (ऋषि प्रजापति, छन्द अनुष्टुप्, देवता लिङ्गोक्त ।) हे कुमार ! तुम स्पर्शमणि की तरह सुदृढ अंग वाले और प्रिय बनो। कुठार की तरह शत्रु का विनाश करो। सोने की तरह तेजस्वी और स्पृहणीय बनो। पुत्र रूप में तुम वस्तुतः हमारी आत्मा ही हो । तुम्हे सौ वर्ष की आयु प्राप्त हो।

अथास्य मातरमभिमन्त्रयते - इडासि मैत्रावरुणी वीरे वीरमजीजनथाः। सा ब्वं वीरवती भव याऽस्मान् वीरवतोऽकरदिति ॥ १।१६।१९ ॥

हरिहरभाष्यम् -'अथास्य.....ऽकरदिति' । अथ कुमाराभिमर्शनानन्तरमस्य कुमारस्य जननीमभिमन्त्रयते अभिलक्षीकृत्य । इडासीत्यादिना वीरवतोऽकरदित्यन्तेनः ॥ १।१६।१९ ॥

मन्त्रार्थः -हे वीरे ! वीरवति पुत्रवताति यावत् । ब्वम् इडा मानवी यज्ञपात्री तद्गतद्रव्यं वाऽसि । मैत्रावरुणी मित्रावरुणयारशोत्पन्ना। यथेडायां पुरूरवा उत्पन्नः यथा च यज्ञपात्र्यां तद्गतद्रव्ये वा अशा भवति तथा ब्वय्यपि तादशाः स्वर्गादिसाधनपराः पुत्राः सन्त्विति्यभिप्रायः । यतस्त्वं वीरं पुत्रमजीजनथाः असौषीः । अतः सा ब्वं वीरवती पतिपुत्रवती भव । या ब्वमस्मान्वीरवतः पुत्रवतः पुत्रयुक्तान् अकरत् अकरोः कृतवत्यसि ।।

अनुवाद -कुमार को छूने के बाद अब उसकी माता को "इडासि..." मंत्र पढ़ते हुए अभिमंत्रित करे।

मन्त्रार्थ - (ऋषि प्रजापति, छन्द अनुष्टुप, देवता इडा।) अरी ओ वीरमाता ! तुम मित्रावरुण देवताओं के अंश से उत्पन्न बुद्धिस्वरूपा मानव रूप में यज्ञ की पात्र हो, तुमने वीर पुत्र को जन्म दिया तथा मुझे ऐसे वीरपुत्र के पिता बनने का गौरव है, इसके बाद भी जो पुत्र तुमसे उत्पन्न होगा वह भी वीर होगा।

अथास्यै दक्षिणं स्तनं प्रक्षाल्य प्रयच्छतीम स्तनमिति ॥१।१६।२०॥

हरिहरभाष्यम् - 'अथास्यै... स्तनमिति' । अथाभिमन्त्रणं कृत्वा अस्यै अस्याः मातुर्दक्षिणं स्तनं प्रक्षाल्य धावयित्वा कुमाराय ददाति इमं स्तनमित्ये तयर्चा ॥ १।१६।२० ॥

अनुवाद - इसके बाद 'इमं स्तनं.' इत्यादि मंत्र पढ़कर माँ का दाहिना स्तन धोकर बालक के मुख में दे।

मन्त्र - इमं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये।

उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियं सदनमाविशस्व ॥

मन्त्रार्थ -विशिष्ट रसवान् तथा घृत से भरे हुए इस स्रुक् रूप स्तन का पान करो। हे अर्वन् ! लोक के मध्य इस मधुमय स्रोत का आस्वादन करो। हे अग्ने ! तृप्त होकर तुम चयनयाम सम्बन्धी अपने इस गृह में प्रवेश करो।

यस्ते स्तन इत्युत्तरमेताभ्याम् ॥ १।१६।२१॥

हरिहरभाष्यम् -तत उत्तरं वामं स्तनं प्रक्षाल्य प्रयच्छति यस्ते स्तन इम स्तनमित्येताभ्यामृग्भ्याम् ।। १।१६।२१॥

अनुवाद- इसी तरह 'यस्ते स्तन...' मन्त्र पढकर मां के बाँयें स्तन को भी धोकर शिशु के मुख में डालना चाहिए।

मन्त्र - यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सवत्रः।

येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः । उर्वन्तरिक्षमन्वेमि॥

मन्त्रार्थ- (ऋषि दीर्घतमा, छन्द त्रिष्टुप. देवता वाक ।) माँ सरस्वति हमें उस स्तन का दूध पिलाओ, जो अभक्त, सुखद, रत्नराशियों का कन्द्र, ' उदार दानी है, जिस स्तन से तुम विश्व की सभी श्रेष्ठ और रमणीय वस्तुओं को पुष्ट करती हो। मैं उसी स्तन को जो मेरे जीवन का स्रोत है, इस विशाल में खोज रहा हूँ।

उदपात्रं शिरस्तो निदधात्यापो देवेषु जाग्रथ, यथा देवेषु जाग्रथ, एवमस्या सूतिकाया सपुत्रिकायां जाग्रथेति ॥ १।१६।२२।।

हरिहरभाष्यम्-'उदपात्रह..... जाग्रथेति' । उदपात्रं जलपूर्णपात्रं शिरस्तः शिरप्रदेशे कुमारस्य निदधाति स्थापयति । आपो देवेवित्यादिना मन्त्रेण ॥ १।१६।२२।।

मन्त्रार्थः- हे आपः ! जीवन हेतवः यूयं देवेषु देवकार्यनिमित्तं जाग्रथ तत्साधनत्वेन तिष्ठथ । अतो यथा देवेषु जाग्रथ एवं तथाऽस्यां सूतिकायां या हिते जाग्रथ जाग्रतेत्यर्थः । पुरुषव्यत्ययच्छान्दसः ।किम्भूतायां पुत्रादिसहितायाम् सूतिकायाम् ।

अनुवाद –'आपो देवेषु...' इत्यादि मंत्र पढ़ते हुए सूतिका के सिरहाने जलपूर्णपात्र रख दे।

मन्त्रार्थ - हे जल ! तुम देवताओं के प्रति जिस प्रकार जागरूक रहते हो, उसी तरह इस पुत्रवती सूतिका में सदैव जागरूक रहो।

द्वारदेशे सूतिकाग्निसुपसमाधायोत्थानात् सन्धिवेलयोः फलीकरणमिश्रान् सर्षपानग्नावावपति - शण्डामा उपवीरः शौण्डिकेय उलूखलः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा। आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिहन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेति ॥ १।१६।२३ ॥

हरिहरभाष्यम् -'द्वारदेशे..... 'शण्डामर्का' इत्यादि । ततः पञ्च भूसंस्कारपूर्वकं द्वारदेशे सूतिकागृहस्य सूतिकाग्नि स्थापयित्वा ओत्थानात् उत्थानं यावत् सन्धिवेलयोः सायं प्रातः फलीकरण मिश्रान् फलीकरणः तण्डुलकणैः मिश्रान् युक्तान् सर्षपान् तस्मिन्नग्नौ आवपति जुहोति द्वे आहुती शण्डामर्का इति आलिखन्ननिमिष इति द्वाभ्यां नन्त्राभ्याम् । आवपनोपदेशात् होमेतिकर्तव्यतानिवृत्तिः ॥ १।१६।२३ ।।

मन्त्रार्थ: - शण्डः मर्काः मर्कः तत्र शृणोतीति शण्डो बालग्रहः स्वस्थानात् नश्यतात् अपजय च वाक्यार्थ उत्तरत्रापि योज्यः । मारयतीति मर्कः। उपघाते वीरः समर्थ विघ्नकुशल: शौण्डिकेयः। आश्रितपातक उलूखल: । अप्रतिकार्यो मलिम्लुचः नाशय इत्यर्थः । दीर्घनासो द्रोणास: च्यावयत्यङ्गानीति च्यवनः । एते सर्वे मत्कृतावपनोपद्रुताः भीताश्चापसर्पन्त्वित्यर्थः । एवमा समन्ततो भावेन लिखन् भक्षयन् आस्ते स आलिखन् । पराभवितमव्यवच्छिन्नदृष्टिरनिमिषः । उप समीपे श्रुत्वा अपकर्ता उपश्रुतिः। हर्यक्षः पिङ्गलनयनः । कुम्भयति स्तम्भयतीत्येवंशील:. कुम्भी। शातयतीति शत्रः । पात्रहस्तः पात्रपाणि: नृनन्मिनोति हिनस्तीति नृमणिः । हन्त्री हिंसा हननं मुखे यस्यासौ हन्त्रीमुखः । सर्षपवदरुण उग्रो धूसरो वा सर्षपारुणः । च्यवत्यनेनेति च्यवनः । येनोपद्रुतश्चवति प्रकृतेः परिभ्रश्यतीत्यर्थः । इत: स्थानान्नश्यतादिति सर्वपदानामेवमेवान्वयः । गणमभिप्रेत्याह—किंवदन्त इति । एते सर्वे कि दद्गणोऽयमित्यर्थः ॥

अनुवाद--सूतिका-गृह के द्वार पर 'सूतिकाग्नि' का आधान कर सूतक काल की समाप्ति तक प्रातः:-सायं दोनों समय अक्षत मिले सरसों को दो आहुतियाँ 'शण्डामा..., एवं 'आलिखन्ननिमिषः...' इत्यादि मन्त्रों को पढ़कर देनी चाहिए।

मन्त्रार्थ-(ऋषि प्रजापति, छन्द अनुष्टुप्, जाया देवता ।) नाशक, मारक विघ्नकुशल, आश्रितघातक, अप्रतीकार्य, अत्यन्त मलिन बुद्धि, लम्बी नाक वाला और इन्द्रियों की शक्ति क्षीण करने वाला बालग्रह यहाँ से नष्ट हो जाय ।

चारों ओर चबाते हुए टकटकी लगाकर देखने वाला, अस्पष्ट ध्वनि वाला, पास आकर नुकसान पहुंचाने वाला, हरी-हरी आँखों वाला, रुकावट डालनेवाला, दुश्मन की तरह व्यवहार करनेवाला, हाथ में चिथड़े लिए हुए, किसी को नुकसान पहुँचाने की इच्छा रखने वाला, दिन-रात हिंसा में डूबा

सरसो की तरह पीले रंगवाला, हमारी ताकत को विनष्ट करने वाला बालग्रह यहाँ से भाग जाय या विनष्ट हो जाय ।

यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्क आधाय जपति -

कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः ।
चेचेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ।
यत्ते देवा वरमवदुः स ह्वं कुमारमेव वा वृणीथाः॥
चेचेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ।
यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ।
चेचेच्छनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेति ॥१।१६।२४॥

हरिहरभाष्यम् -नैमित्तिकमाह–'यदि 'कूर्कूरः' इत्यादि । यदि चेत्कुमारो बालग्रहः तं बालमुपद्रवेत् अभिभवेत् तदा तं बालं जालेन मत्स्यग्रहणसाधनेन तदलाभे उत्तरीयेण वा वाससा प्रच्छाद्य छादयित्वा अङ्के उत्सङ्गे निधाय धृत्वा कूर्कुर इत्यादिकमपह्वरेत्यतं मन्त्र जपति ।। १।१६।२४ ॥

मन्त्रार्थः - कूर्कुरो भषणाख्यो बालग्रहः । तथा सुकूर्करश्चातिभषणः । बालान्बध्नातीति बालबन्धनः ।

कूर्कुराख्यो बालग्रहः। तथा सुकूर्कुरश्चातिभषणः । बालान्बध्नातीति बालबन्धनः । कूर्कुराख्यो बालग्रहः । सीसरोऽङ्गसारकः। हे शुनक ! तदगणमुख्य! लभेत लापनरोधकेति यावत् । अपह्वर गात्रापहारक । ह्व कौटिल्ये । ते तुभ्यं नमोऽस्तु । ततस्तुष्टश्चैनं कुमारं सृज मुञ्च । कि कुर्वन् ? चेचेच्छुश्छुः शब्दं कुर्वन् ।। १ ॥ हे शुनक तत्सत्यं यत्ते तुभ्यं नाय देवा वरमदुदुः दत्तवन्तः । स च ह्वं हिंसाविहारः कुमारमेव वा वृणीथाः वानसीति । शेषमुक्तार्थम् ॥ २ ॥ हे शुनक ! तत्सत्यं यत्ते तव सरमा देवशुनी माता मसरो देवश्वा पिता । श्यामशबलौ च तव भ्रातराविति । शेषमुक्तार्थम् ।। ३ ।।

अनुवाद -शिशु को यदि बालग्रह पीड़ित करें तो मछली पकड़ने के जाल से अथवा जाल नहीं मिलने पर अपनी चादर से उसे ढंक कर पिता अपने शिशु को गोद में रखकर 'कू'रः...' इत्यादि मन्त्र का जप करें।

मन्त्रार्थ- (ऋषि प्रजापति, छन्द अनुष्टुप्, देवता शुनक ।) यह बालग्रह भयंकर ही नहीं, अति कठोर और कर्कश भी है। ओ जीभ के फैलाने वाले बालग्रह ! समूह के मुखिया शुनक ! तुम्हें मैं प्रणाम करता हूँ। तुम देह विनष्ट करने वाले हो । तुम मुझसे सन्तुष्ट होकर छू-छू करते हुए इस शिशु को छोड़ दो । यह सच है कि देवताओं ने तुम्हें वरदान दिया है। परन्तु क्या यह ठीक है कि उस वरदान के बल पर तुमने इस शिशु को ही आक्रान्त कर लिया है । अरे ओ शनक ! यह भी सच है, कि देवताओं की कुतिया सरमा ने तुमको जन्म दिया है। यह भी सच है, कि तुम्हारे पिता देवताओं के कुत्ते सीसर हैं । मैं यह भी जानता हूँ, कि श्याम और शबल तुम्हारे भाई हैं । अब तुम्हारा कल्याण इसी में है कि तुम इस शिशु को अपने आक्रमण से मुक्त कर दो।

अभिमृशति -

न नामयति न रुदति न हृष्यति न ग्लायति ।
यत्र वयं वदामो यत्र चाभिमृशामसीति । १।१६।२५॥

हरिहरभाष्यम् - अभिमृशति न नामयतीति । जपान्ते कुमारस्य सर्वाङ्गमाभमृशति, न नामयतीत्यादि यत्र चाभिमृशामसीत्यन्तेन मन्त्रेणेति सूत्रार्थः ॥ १।१६।२५ ॥

अनुवाद - 'न नामयति...' इत्यादि मंत्र पढ़ते हुए पिता को उस बच्चे के सभी अंगों का स्पर्श करना चाहिए।

मन्त्रार्थ- ऋषि प्रजापति, छन्द अनुष्टुप्, देवता वायु ।) बच्चे के जिस अंग का स्पर्श कर मैं मंत्र जपता हूँ। उसे न तो वह मोड़ता है, न रोता है, न हँसता है और न ही छटपटा रहा है।

॥ प्रथमकाण्ड में षोडश कण्डिका समाप्त ।।

सप्तदशी कण्डिका

नामकरणम्

दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति ॥१॥१७॥१॥

हरिहरभाष्यम् -'दशम्याः करोति'। प्रसवदिनमारभ्य दशम्यां तिथौ सूतिकां सूतिकागृहादुत्थाप्य नामकरणाङ्गतयां ब्राह्मणान् त्रीन् भोजयित्वा भोजनं कारयित्वा पिता अपत्यस्य नामधेयं करोति । अत्र दशम्यामिति सूतकान्तोपलक्षणम् । ततश्च यस्य यावन्ति दिनानि सूतकं तदन्तदिने सूतिकोत्थापनमित्यर्थः । अपरदिने च नामकरणम् ।। १।१७।१॥

अनुवाद - जन्म के दश दिन बाद पिता बालक को सूतिकागृह से बाहर लाये । फिर तीन ब्राह्मणों को भोजन कराने के बाद शिशु का नामकरण-संस्कार करें ।

द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थम् ।

दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम् ॥ १।१७।२॥

हरिहरभाष्यम् - तथा च गोभिलसूत्रम् - दशरात्रे व्युष्टे नामकरणमिति । याज्ञवल्क्यवचनं च-अहन्येकादशे नामेति नाम करोतीत्यक्तम् । तत्कीदृशामित्यपेक्षायामाह-'द्व्यक्षरं.....तद्धितम्' । द्वे अक्षरे अस्य तत् द्व्यक्षरं, चत्वायत तुरक्षरम् । अनयोर्विकल्पः । किञ्च घोषवदादि घोषवदक्षरं आदौ यस्य नाम्नः तत् घोषवदादि । घोषवन्ति चाक्षराणि गघङ जझन डढण दधन बभम यरलव ह इत्येतानि।

अन्तरन्तस्थं अन्तर्मध्ये अन्तस्था यस्य तदन्तरन्तस्थम् अन्तस्था यरलवाः।

दीर्घाभिमहस्वमभिनिष्ठानमवसानं यस्य तत् दीर्घाभिनिशानम । कृतं कृत्प्रत्ययान्तं कुमारस्य नामधेयं कुर्यात् । पक्षान्तरे 'कृतम्' पितामहादिनाम तत्कुर्यात् । न तद्धितं तद्धितप्रत्ययान्तं न कुर्यात् ॥ १।१७।२॥

अनुवाद -बच्चे का नाम दो या चार अक्षरों का होना चाहिए। उसका पहला अक्षर घोष हो (घोंष वर्ण-ग, घ, ङ, ज, झ, ञ, ड, ढ, ण, द, ध, न, ब, भ, य, र, ल, व । मध्य में अन्तःस्थ वर्ण-य, र, ल, व में से किसी एक को होना चाहिए । नाम के अन्तिम वर्ण दीर्घ हो, कृदन्त हो, तद्धितान्त न हो।)

अयुजाक्षरमाकारान्त स्त्रिय तद्धितम् ॥१।१७॥३॥

हरिहरभाष्यम् -स्त्रिया नाम्नि विशेषमाह-'अयुजाक्षरम्' । अयुजानि विषमाण व्यादीन्यक्षराणि यस्मिन्नाम्नि तदयजाक्षरम् । आकारान्तमाकारः अन्ते यस्य तदाकारान्तम् । तद्धितं तद्धितप्रत्ययान्तं स्त्रिय स्त्रिया नाम कुर्यादित्यनुषङ्गः ।। १।१७।३ ।।

अनुवाद-कन्या के नामकरण में विषम वर्णी. अर्थात् तीन, पाँच, सात अक्षर। अन्तिम वर्ण दीर्घ हो और तद्धितान्त हो ।

शर्म ब्राह्मणस्य, वर्मक्षत्रियस्य, गुप्तेति वैश्यस्य ॥ १।१७॥४॥

हरिहरभाष्यम् - अपि च शर्म..... वैश्यस्य' । ब्राह्मणस्य विप्रस्य पूर्वोक्तलक्षणनामान्ते शर्मेति क्षत्रियस्य **पूर्वोक्तलक्षणनामान्ते वर्मेति वैश्यस्य पूर्वोक्तनामान्ते गुप्तेति पदं कुर्यात् । अथवा ब्राह्मणस्य नाम शर्म मङ्गलप्रतिपादकं कुर्यात् । क्षत्रियस्य वर्म शौर्यरक्षाप्रतिपादकम्, वैश्यस्य गुप्तेति धनवत्ताप्रतिपादकम्, शुद्रस्य प्रेष्यत्वबाद्धव्यम् ।**

अनुवाद-ब्राह्मण के नाम के अन्त में मंगल-प्रतिपादक शर्मा का प्रयोग होना चाहिए, क्षत्रिय के नाम के अन्त में शौर्य-व्यंजक वर्मा शब्द होना चाहिए और धनवत्ताबोधक गुप्त शब्द का प्रयोग वैश्यों के नाम के अन्त में करना चाहिए।

बहिर्निष्क्रामणम्

चतुर्थे मासि निष्क्रमणिका ॥ १।१७।५॥

हरिहरभाष्यम् - 'चतुर्थे..णिका' । कुमारस्य जन्मचतुर्थे मासि निष्क्रमणिका गृहाद् बहिर्निष्क्रमणं करोति पिता ।। १।१७।५ ॥

अनुवाद - पिता अपने पुत्र को चौथे महीने में घर से बाहर निकाले ।

सूर्यमुदीक्षयति तच्चक्षुरिति ॥ १।१७।६ ॥

हरिहरभाष्यम् – 'सूर्य' 'चक्षरिति' । अथ तच्चक्षुर्देवहितमित्यादिना भूयश्च शरदःशतादित्यन्तेन मन्त्रेण श्रीसूर्य भगवन्तं रश्मिमालिनमुदीक्षयति कुमारं प्रदर्शयति पिता ।। १।१७।६ ॥

अनुवाद - तच्चक्षु ...' इत्यादि मंत्र पढते हुए पिता अपने पुत्र को सूर्य के दर्शन कराए।

मन्त्र - तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं श्रृणुमाम शरदः शतं प्रबवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।

मन्त्रार्थ- (ऋषि ब्रह्मा, छन्द त्रिष्टुप्, देवता सूर्य ।) सूर्य संसार की आँख है । दैवी गुणों से युक्त पुरुषों के वे हितैषी हैं। प्रतिदिन पूर्व दिशा में उनका उदय होता । वे श्वेत वर्ण के हैं। इनकी कृपा से हम सौ साल तक देखें, सौ साल तक सूनें,तक बोलें, सौ वर्ष की उम्र तक हम किसी के सामने दीन न बनें । स्वस्थ और समृद्ध बनकर हम शतायु बनें।

॥ प्रथमकाण्ड में सप्तदश कण्डिका समाप्त ।।

अष्टादशी कण्डिका

प्रष्येत्य गृहानुपतिष्ठते पूर्ववत् ॥ १॥१८॥१॥

हरिहरभाष्यम् -'प्रोष्येत्य' पूर्ववत् । प्रोष्य प्रवासादेत्य गृहान् गृहस्थान्भार्यापुत्रादीनुपतिष्ठते प्रार्थयते। कथम् ? पूर्ववत् । आहिताग्निप्रवासप्रकरणोक्तवत् । ग्रहामाबिभीतेत्यारभ्य उपहूतो गृहेषु न इत्येतावत्पर्यन्तैस्त्रिभिर्मन्त्रैः गृहानुपस्थाय क्षेमाय व इत्यादिना शंय्योरित्यन्तेन मन्त्रेण गृहं प्रविशेत् । केचित्तु सूत्रकारेण गृहोस्थानमात्रविधानान्मन्त्रवत्प्रवेशं नेच्छन्ति ।। १।१८।१॥

अनुवाद- प्रवास से लौटने के बाद घर आकर पहले की तरह घर में प्रवेश कर से पूर्व 'गृहा मा बिभीत'.' इत्यादि तीन मंत्र पढ़े।

मन्त्र - गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि ।
ऊजं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥१॥
येषामध्येति प्रवसन्येषु सौमनसो बहुः।
गृहानुप ह्वयामहे ते नो जानन्तु जानतः ॥ २॥
उपहूता इह गाव उपहूता अजावयः।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ॥ ३ ॥
क्षेमाय वः शान्त्य प्रपद्ये शिवक्ष- शग्म- शंयोः शंयोः॥

टिप्पणी- पूर्वोक्त रीति से, तात्पर्य यह है कि कात्यायनश्रौतसूत्र के आहिताग्नि प्रवास-प्रकरण में बतलाई गई विधि से होना चाहिए। तदनुसार ऊपर लिखित तीन मंत्र पढ़ने के बाद 'क्षेमाय व...' मंत्र पढ़कर ही घर में प्रवेश

करना चाहिए। प्रयोगरत्न के अनुसार धनार्जन के लिए ही पुरुष अकेला प्रवासी होता है । यह दृष्ट प्रयोजन है और अदृष्ट प्रयोजनमूलक तीर्थादि यात्रा तो पत्नी के. साथ ही करता है।

पुत्रं दृष्ट्वा जपति -

अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे ।

आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम । इति ॥

हरिहरभाष्यम् - 'पुत्रं ……. शतमिति' । पुत्रमात्मजं दृष्ट्वा विलोक्य अङ्गादङ्गादित्यादिक मन्त्रं जपति ।। १।१८।२।।

मन्त्रार्थः- हे पुत्र ! यतस्त्वमङ्गात्प्रत्यक्षात्मम्मवासि उत्पत्स्यसे । हृदयादन्तरङ्गादपि अधिकतया जायसे । अतस्त्वं वे निश्चितं पणनामा यात्माऽभिन्नपोऽसि । स त्वं शतं शरदो वर्षाणि जीव प्राणिहि ।। **अनुवाद**-पुत्र की ओर देखकर पिता 'अङ्गाददात...' इस मंत्र का जप करे।

मन्त्रार्थ-(अषि प्रजापति, छन्द अनुष्टुप, देवता आयु ।) हे पुत्र ! तुम हमारे अंग-अंग से उत्पन्न हुए हो । तुम हमारे हृदय से भी अधिक प्रिय हो । पुत्र के रूप में यथार्थतः तुम मेरी आत्मा हो । सो वर्ष तक तुम जीवित रहो ।

अथास्य मूर्द्धानमवजिघ्रति -

प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि।

सहस्रायुषाऽसौ जीव शरदः शतम् । इति ॥ १॥१८॥३॥

हरिहरभाष्यम् -'अथा.. घ्रति'। अथ जपानन्तरमस्य पुत्रस्य मूर्दानं शिर. अवजिघ्रति अवाचीनं जिघ्रति । केन मन्त्रेण ? 'प्रजाप शतमिति' अनेन मन्त्रेण सकृत् । असावित्यस्य स्थाने अमुकशमन्निति पुयनामग्रहणम् ॥ १।१८।३ ॥

मन्त्रार्थः - हे पुत्र ! प्रजापतेर्ब्रह्मणः हिङ्कारेण स्नेहार्द्रकृतध्वनिविशेषेण

सामवेदावयवेन वा ब्रा ब्रामवजिघ्रामि शिरसि चुम्बामि । अतोऽवघ्राणात् हे असौ अमुकशर्मन् सहस्रायुषा सुवहुजीवनेन शरदः शतमिति उक्तार्थम् ।।

अनुवाद-मंत्रपाठ के बाद पिता पुत्र के सिर को 'प्रजापतेष्ट्वा 'इत्यादि मंत्र भढ़कर सूंघे।

मन्त्रार्थ - (ऋषि परमेष्ठी, छन्द उष्णिक, देवता प्रजापति ।) हे पुत्र ! ब्रह्मा के स्नेह-सने शब्दों अथवा सामवेद के सामों से मैं तुम्हारा सिर सूंघता हूँ। इसके प्रभाव से तुम शतायु बनो।

गवां ब्रा हिङ्कारेणेति च त्रिदक्षिणेऽस्य कर्णे जपति -

अस्मे प्रयन्धि मघवन्नजीषिन्निन्द्रायो विश्ववारस्य भूरेः ।

अस्मे शत. शरदो जीवसेऽधा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन्निति ॥

हरिहरभाष्यम् – 'गवां त्रिः' । प्रजापतेष्ट्वेति सकृदवघ्राणानन्तरं पुनः गवां ब्रा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमिति मन्त्रेण सकृन्मूर्द्धानमवघ्राय द्विस्तूष्णीमवजिघ्रति । 'दक्षिणेऽ.. 'प्रिन्निति' । अस्य पुत्रस्य दक्षिणे कर्णे अस्मे भयन्धीत्यादि इन्द्रशिप्रिन्नित्यन्तं मन्त्रं जपति ॥ १।१८।४ ॥

मन्त्रार्थः-हे मघवन् इन्द्र ! ऋजीषिन् स्निग्धचित्त ! स्निग्धचित्त ! हे इन्द्र लोकेश ! शिप्रिन् सुखद लघुहस्ते वा। अस्मे अस्मै कुमारायः ऐश्वर्याणि धनानि च प्रयन्धि प्रयच्छ । विश्ववारस्य सर्ववरीवरणीयस्य वराणां समूहो वारं सर्वेषां वाराणां समूहः सर्ववारं तस्येति वा। भूरेःबहुतरस्य। उभयत्र कर्मणि षष्ठी । प्रचुरसर्ववारं रायं प्रयच्छ इत्यर्थः । प्रयोजनमाह-अस्से शतं शरदो जीवसे जीवनायेति । किञ्च अस्मे अस्मिन् वीरान् पुत्रान् शश्वतः शा दीर्घायुषः अधाः निधेहि अस्मै देहीत्यर्थः ॥

अनुवाद -फिर 'गवां ब्रा...' इत्यादि मंत्र पढ़ने के बाद एक बार मंत्र पर संघने

के बाद दो बार बिना मंत्र पढ़े ही पुनः सिर सूंघे । पुत्र के दाहिने कान में 'अस्मे...' इत्यादि मंत्र का जाप करे।

मन्त्रार्थ - (ऋषि प्रजापति, छन्द त्रिष्टुप्, देवता इन्द्र ।) गायों की स्नेहपर्ण ध्वनि से मैं तुम्हे सूंघता हूँ। अतः अत्यधिक आयु से तुम सौ साल तक जीओ। देवराज इन्द्र ! आप सुखद् एवं स्निग्ध चित्त के स्वामी हैं। इस बालक को आप ऐश्वर्य, धन और विश्व की श्रेष्ठ वस्तुओं के साथ सौ वर्ष की पूर्णायु, पुत्र और पौत्र प्रदान करें।

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्ति दक्षस्य सुभगत्वमस्मे ।

पोषं रयीणामरिष्टि तनुनां स्वात्मानं वाचः सुदिन त्वमह्नामिति सव्ये ॥

हरिहरभाष्यम् – 'इन्द्र श्रे' ..... सव्ये' ।' सव्ये वामकर्णे इन्द्रश्रेष्ठेत्यादि सुदिनत्वमहामित्यन्तं मन्त्रं जपति ।। १।१८।५।।

मन्त्रार्थः - हे इन्द्र परमेश्वर्ययुक्त ! अस्मे अस्मिन् श्रेष्ठानि सुमङ्गलानि धाह स्थापय । चित्ति ज्ञानं दक्षस्य दक्षप्रजापतेरिव सुभगत्वं सौभाग्यं सर्वप्रभुत्वं च धाह । तथा रयीणां धनानां पोषं पृष्ट तनूनामवयवानामरिष्टि नीरोगत्वं वाचः वाण्याः स्वात्मानं स्वादुत्वं माधुर्यमिति यावत् । अह्नां दिनानां सुदिनत्व सा धेहि ॥

अनुवाद -उसके बाँयें कान के समीप 'इन्द्र श्रेशानि...' इत्यादि मंत्र ज चाहिए।

मन्त्रार्थ- (ऋषि प्रजापति, छन्द त्रिष्टुप, देवता। इन्द्र ।) हे देवराज ! इस शिशु को आप उत्तम कोटि की मंगलमयी धनराशि प्रदान करें। इसका चैतन्य , इसकी प्रज्ञा, इसका ज्ञान और स्वास्थ्य विमल हो। प्रजापति दक्ष की तरह यह प्रभुत्व सम्पन्न हो। इसे धनधान्य की कमी न हो। इसकी वाणी अत्यन्त मधुर हो । इसका प्रत्येक दिन सफलता का सूचक हो । ऐसा वरदान आप इसे दें।

स्त्रिय तु मूर्धानमेवावजिघ्रति तूष्णीम् ॥ १।१८॥६॥ ।

हरिहरभाष्यम् -'स्त्रियै तूष्णीम्' । स्त्रियाः पुत्रिकायाः मूर्धानमेव अवजिघ्रति तूष्णीं विना मन्त्रेण एवकारेण दर्शनजपकर्णजपयोनिवृत्तिः ॥ १।१८।६ ॥

अनुवाद-बेटे की जगह यदि बेटी हो तो पिता चुपचाप उसका सिर चूम ले । किसी भी मंत्र का उच्चारण न करे।

॥ प्रथम काण्ड में अष्टावश कण्डिका समाप्त ।।

एकोनविंशी कण्डिका

अन्नप्राशनम्

षष्ठे मासेऽन्नप्राशनम् ॥ १।१९।१॥

हरिहरभाष्यम् -'षष्ठे मासेऽन्नप्राशनम्' । जन्मतः षष्ठे मासे , अन्नप्राशनं कर्म कुर्यात् ॥ १।१९।१॥

अनुवाद- जन्म से छठे महीने में अन्नप्राशन संस्कार करना चाहिए।

स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽज्याहुती जुहोति -

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।

सा नो मन्द्रेषमूर्जं दुहाना घेनुर्वागस्मानुपसुष्टुतनु स्वाहेति ॥१।१९।२॥

वाजो नो अद्येति च द्वितीयाम् ॥ १।१९।३ ॥

हरिहरभाष्यम् - 'स्थालीपाक "जुहोति'। अन्नप्राशनस्येतिकर्तव्यताविशेषमाह - स्थालीपाकं चरू यथाविधि श्रपयित्वा आधारावाज्यभागौ हुत्वा द्वे आहुती जुहोति । देवीं वाचमित्यादि वाजो नो अद्येति च द्वितीयाम् इत्यन्तं सूत्रम् । आज्येन देवीं वाचमित्यादिकया ऋचा एकामाहुति जुहुयात् । इदं वाचे इति त्यागं विधाय चकारात्पुनर्देवीं वाचमित्येतस्यान्ते वाजो नः। यथा देवीं वाचमिति वाजो नो अद्येति च द्वाभ्यामृग्भ्यां द्वितीयामाज्याहुति हुत्वा इदं वाचे वाजाय चेति त्यागं कुर्यात् ॥ १।१९।२-३ ॥

मन्त्रार्थः - देवी देवसम्बन्धिनीं वाचं वाणी देवाः प्राणादिवायवः अजनयन्त उत्पादितवन्तः ततस्तां देवीं वाचं विश्वरूपाः नानारूपा ऋषिमुनिब्राह्मणादयः पशवः संसरणब्राद्वदन्ति । पशुरेवं स देवानामिति श्रुतेः । सा नो अस्मान् उपतु सन्निहिताऽस्तु । किम्भूता ? मन्द्रा हर्षकरी । इपं रसम् कर्जम् अन्नादि च दुहाना । सुष्टुता शोभनमन्त्रः तद्रष्टुभिर्वा स्तुता । तत्र दृष्टान्तः । वत्सान् धेनुरिवेति ।। १।१९।२-३ ॥

अनुवाद - पूर्वोक्त विधि से खीर पकाकर अग्नि-सोम के लिए आहुतियाँ डालकर 'देवीं वाचम...' तथा 'वाजो नो...' इत्यादि मंत्रों द्वारा अलग-अलग घी की आहुति दें।

मन्त्रार्थ - (ऋषि प्रजापति, छन्द बिष्टुप्, देवता वाणी।) सबसे पहले ऐश्वर्यमयी और प्रदीप्त वाणी को देवताओं ने उत्पन्न किया। उसके बाद उसका उच्चारण विभिन्न प्राणियों ने किया। वही सुखद और गम्भीर वाणी हमें अन्न, रस और शक्ति प्रदान करती हुई हमारी स्तुति से खुश होकर उसी तरह यहाँ दौड़ी आए जैसे बछड़े के रँभाने पर गाय दौड़कर आती है।

मन्त्र - वाजो नो अद्य प्रसुवाति दानं वाजो देवाऽ ऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिजयेय स्वाहा ।।

मन्त्रार्थ - (ऋषि प्रजापति, छन्द अनुष्टुप्, देवता अन्न ।) हे अन्न के अधिष्ठातृ देवता ! आज से अन्नदान की दृष्टि से हमें पहचान लें । उचित अवसर आने पर हम अन्न से देवताओं को हवियाँ प्रदान करें। अन्नमय ब्रह्म से ही हमारे सभी बेटे-पोतों का जन्म हुआ है । हम अन्नधन से समृद्ध होकर सभी दिशाओं में विजयी बनें।

स्थालीपाकस्य जुहोति

प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा, चक्षुषा रूपाण्यशीय स्वाही, श्रोत्रेण यशोऽशीय स्वाहेति ॥१।१९।४॥

हरिहरभाष्यम् -'स्थालीपाकस्य जुहोति' । स्थालीपाकस्य चरोः प्राणेनान्नमशीयेत्यादिभिश्चतुभिमन्वश्चतस्र आहुतीजुहोति ॥ १।१९।४ ।।

अनुवाद -'प्राणेनान्नमशीय...' इत्यादि चार मंत्रों से चरु की चार आहुतियाँ दें।

प्राशनान्ते सर्वान् रसान्त्सर्वमन्नमेकत उद्धत्याऽथैनं प्राशयेत् ॥१।१९।५॥
तूष्णीं हन्तेति या, हन्तकारं मनुष्या इति श्रुतेः ॥ १।१९।६ ॥

हरिहरभाष्यम् - ततः स्विष्टकृदादि प्राशनान्तं विधाय । सर्वान् …….. इति श्रुतेः । सर्वान् मधुरादीन् रसांसर्वमन्नं भक्ष्यभोज्यलेह्यपेयचोष्यादि । एकतोद्धत्येत्यत्र एकतः एकस्मिन्पात्रे उद्धृत्य विसर्जनीयलोपेऽपि पुनः सन्धिरार्षः पृथगुकारोच्चारणं वा । एकतः एकस्मिन्पात्रे उद्धृत्य कृत्वा अधानन्तरमेनं कुमारं प्राशयेत् तुष्णीं मन्त्ररहितं हन्तेति वा मग हन्तकारं मनुष्या उपजीवन्ति इति श्रवणात् ।। १।१९।५-६ ॥

अनुवाद - संत्रवप्राशन के बाद मधुर आदि सभी रसों को, भक्ष-भोज्यादि सभी अन्नों को एक पात्र से उठाकर शिशु को चटाना चाहिए। यह प्राशन मंत्र रहित चुपचाप या केवल हन्त कहकर करना चाहिए, क्योंकि श्रुति का वचन है 'हन्तकारं मनुष्याः ।

भारद्वाज्यामां सेन वाक्प्रसारकामस्य ॥ १।१९॥७॥

हरिहरभाष्यम् - 'भारद्वाज्या 'पर्याय वा' । अत्र गुणफलमाह-भारद्वाज्याः पक्षिण्याः मांसेन कुमारस्य प्राशनं कारयितव्यम् । यदीयं कामना भवति कस्य पितुः कथम्भूतस्य वाक्प्रसारकामस्य वाचः प्रसारो बहुत्वं तत्कुमारस्य कामयते इति वाक प्रसारकामः तस्य कर्तरि षष्ठी कृत्यप्रत्ययान्तत्वात् ।। १।१९।७ ॥

अनुवाद- पिता यदि पुत्र को वाग्मी बनाना चाहे तो भारद्वाजी (मादा) पक्षी के मांस से प्राशन कराये ।

कपिञ्जलमां सेनाऽन्नाद्यकामस्य ॥ १।१९॥८॥

हरिहरभाष्यम् -एवमन्नाद्य कामस्य कपिञ्जलमांसेन एवमुत्तरत्रापि । अयमर्थः- यदि कुमारस्य अयं वाग्मी स्यादिति कामयेत्तदा भारद्वाज्या मांसं प्राशयत् । यदि कुमारोऽन्नादः स्यादिति कामयेत्तदा कपिञ्जलमांसं प्राशयेत् । कपिजल: कारण्डवो मैरिर्वा मयूरो वा केचित्तित्तिरो वेति ॥ १।१९।८ ॥

अनुवाद- पिता यदि पुत्र को अन्न-भक्षण के योग्य बनाना चाहे तो पहले वह उस बच्चे को कपिञ्जल पक्षी का मांस चखाये।।

टिप्पणी - कपिजल 'पक्षी' की पहचान बड़ी कठिन है । क्योंकि कुछ विद्वानों के अनसार यह तित्तिर है, कोई इसे मोर, कोई कारण्डव और कोई इसे मैरी मानते हैं।

मत्स्यर्जवनकामस्य ॥ १।१९।९॥

हरिहरभाष्यम् - यदि कुमारोऽयं जवनः शीघ्रगामी स्यात्तदा यथासम्भवं मत्स्यान्प्राशयेत् ।। १।१९।९ ॥

अनुवाद- शिशु में यदि धावक शक्ति का विकास चाहे तो उसे मछली खिलाना चाहिए।

कृकषाया आयुष्कामस्य ॥ १।१९।१०॥

हरिहरभाष्यम् -स यदि कुमारों दीर्घायुः स्यादिति कामयेत् तदा कृकषाया मांसं प्राशयेत् ।। १।१९।१० ।।

अनुवाद-बालक को चिरायु की कामना से केकड़े के मांस से अन्नप्राशन कराये।

आटया ब्रह्मवर्चसकामस्य ॥ १।१९।११॥

हरिहरभाष्यम् - यदि कुमारो ब्रह्मवर्चस्वी स्यादिति कामयेत्तदा आटया मांसं प्राशयेत् ॥ १।१९।११ ।।

अनुवाद- यदि ब्रह्मवर्चस की कामना बालक की हो तो आटया अथात् जल पक्षी के मांस से अन्नप्राशन कराये ।

सर्वैः सर्वकामस्य ॥१।१९।१२ ॥

हरिहरभाष्यम् -यदि वाकप्रसारादीनि ब्रह्मवर्चसान्तानि सर्वाणिकामयेत्तदा भारद्वाज्यादीनामान्तानां सर्वाणि मांसानि क्रमेणभवन्बिति कामयेत्तदा । प्राशयेत् ।। १।१९।१२ ।।

अनुवाद - यदि पिता बालक में एक साथ सभी गुणों को चाहे तो ऊपर लिखित सभी मांसों को एक साथ चटा दे।

अन्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम् ॥

हरिहरभाष्यम् - अन्नपर्याय वा अन्नपरिपाट्या वा अन्नवदेकीकृत्य प्राशयेदित्यर्थः । अन्नपर्ययेति अविभक्तिकमार्षं पदम् । 'ततो ब्राह्मणभोजनम्। ततः कर्मसमाप्तो एकस्य ब्राह्मणस्य भोजनं कारयितव्यम् । अत्र काण्डपरिसमाप्तौ द्विरुति कात्यायनसूत्रे अध्यायपरिसमाप्तौ उपस्पृशेदप उपस्पृशेदप इति सूत्रार्थः ।। १।१९

अनवाद– आचार्य पारस्कर ने उपरोक्त सूत्र में स्पष्ट किया है कि अन्न के द्वारा ही अन्नप्राशन संस्कार करवाना चाहिये । अथवा सबके स्थान पर अन्न का रस ही चटा दे तथा इसके बाद ब्राह्मण-भोजन करा दे। टिप्पणी- एक, दस या यथेच्छ ब्राह्मणों को भोजन कराना चाहिए। इस प्रकार अन्नप्राशन संस्कार में स्वकुलपरम्परा के अनुसार निर्धारित भोज्य वस्तुओं के द्वारा ही अन्नप्राशन करना चाहिये । जिन सूदूर क्षेत्रों में अन्नाभाव है वहा के लिये विकल्प हेतु अन्य वस्तुओं के द्वारा अन्नप्राशन बिधान बताया है । परन्तु स्मृतिग्रन्थों के आधार पर यहा चयन करना चाहिये ॥

पारस्करगृह्यसूत्र में प्रथमकाण्ड की हिन्दीव्याख्या समाप्त ॥१॥